अप्रत्याख्यानकषायचतुष्के ओघे आहारकद्विकवर्जमष्टादशाग्रशतं बन्धे प्राप्यते, मिथ्यात्वे सप्तदशाग्रशतं, सास्वादने एकाग्रशतं, मिश्रे चतुःसप्ततिः, अविरते च सप्तसप्ततिर्भवति । प्रत्याख्यानचतुष्केऽपि चतुर्षु गुणस्थानेष्वप्रत्याख्यानकषायवद्द्रष्टव्यम् । देशविरते पुनः सप्तषष्टिरिति । नाम्नो बन्धस्थानानां, बन्धस्थानभङ्गानां च यन्नानात्वं तद् यन्त्रतोऽवलोकनीयम् ।

॥ अप्रत्या० ४ कस्य गुण० चतुष्के, प्रत्याख्या० ४ कस्य च गुण० पञ्चके बन्धप्रकृतियन्त्रम् ॥

गुणस्था०	ज्ञाना०	दर्शना०	वेदनीय	मोहनीय	आयुः	नाम	गोत्र	अन्तराय	सर्वाग्रम्
ओघे	५	९	२	२६	४	६५	२	५	११८
मिथ्यात्वे	५	९	२	२६	४	६४	२	५	११७
सास्वादने	५	९	२	२४	३	५१	२	५	१०१
मिश्रे	५	६	२	१९	०	३६	१	५	७४
अविरते	५	६	२	१९	२	३७	१	५	७७
देशविरते	५	६	२	१५	१	३२	१	५	६७

॥ ४ अप्रत्या० गुणस्थानचतुष्के, ४ प्रत्याख्या० गुणस्थानपञ्चके च बन्धस्थानानां यन्त्रम् ॥

बन्धस्थानानि	ज्ञाना०	दर्शना०	वेदनीय	मोहनीय	आयुः	नाम	गोत्र	अन्तराय
ओघे	१	२	२	३–४	४	६	२	१
मिथ्यात्वे	१	१	२	१	४	६	२	१
सास्वादने	१	१	२	१	३	३	२	१
मिश्रे	१	१	२	१	०	२	१	१
अविरते	१	१	२	१	२	३	१	१
देशविरते	१	१	२	१	१	२	१	१

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

। प्र० चतुष्के ओघतो भ० य०। स० १३९६२

बन्ध०	भङ्ग०	कस्य प्रा० कति भङ्गाः	बन्धकाः
२३	४	अप० ए० प्रा० ४	तिर्यग्नराः
२५	२५	अप० विक० प्रा० ३	,,
		अप० पं० ति० प्रा० १	,,
		,, मनुष्यप्रा० १	,,
२५	२०	प०ए०प्रा०सूक्ष्मसा० भ्यां ४	,,
		,, सू० प्रत्येकाभ्यां ४	,,
		,, बादरसा० भ्यां ४	,,
		,, ,, प्र०भ्यां ८	नारकवर्जाः
२६	१६	प०ए०प्रा० आतपोद्यो० १६	,,
२८	९	देवप्रा० ८	तिर्यग्नराः
		नरकप्रा० १	,,
२९	९२४८	प० पं० ति० ४६०८	चतुर्ग०
		,, मनु० प्रा० ४६०८	,,
		,, विक० प्रा० २४	तिर्यग्नराः
		देवप्रा० ८	सम्य० नराः
३०	४६४०	प० ति० प्रा० ४६०८	चतुर्ग०
		,, विक०प्रा० २४	तिर्यग्नराः
		,, मनु० प्रा० ८	सम्य.देवना०

। मिथ्यादृष्टौ भङ्गयन्त्रम्। सर्वा० १३९४६

बन्ध०	भङ्ग०	कस्य प्रा० कति भङ्गाः	बन्धकाः
२३	४	अप० ए० प्रा० ४	तिर्यग्नराः
२५	२५	अप० विक० प्रा० ३	,,
		,, पं० ति० प्रा० १	,,
		,, मनुजप्रा० १	,,
२५	२०	प०ए०प्रा०सूक्ष्मसा०भ्यां ४	,,
		,, सूक्ष्मप्र० भ्यां ४	,,
		,, बादरसा० भ्यां ४	,,
		,, बादरप्र० भ्यां ८	नारकवर्जाः
२६	१६	,, आतपेनोद्योतेन च १६	,,
२८	९	देवप्रा० ८	तिर्यग्नराः
		नरकप्रा० १	,,
२९	९२४०	प० विक० प्रा० २४	,,
		,, पं० ति० प्रा० ४६०८	चतुर्गति०
		,, मनु० प्रा० ४६०८	,,
३०	४६३२	प० विक० प्रा० २४	तिर्यग्नराः
		,, पं० ति० प्रा० ४६०८	चतुर्गति०

। सा० नाम्नो ब० भङ्गयन्त्रम्। सर्वाग्रं ९६०८

बन्ध-स्था०	भङ्ग-सं०	कस्य प्रा०	बन्धकाः
२८	८	देवप्रा० ८	तिर्यग्नराः
२९	६४००	प० पं०ति० नरप्रा० ६४००	चतुर्गतिकाः
३०	३२००	,, ति० प्रा० ३२००	,,

। मिश्रे नाम्नो ब० भङ्गयन्त्रम्। सर्वाग्रं १६

बन्ध-स्था०	भङ्ग-सं०	कस्य प्रा०	बन्धकाः
२८	८	देवप्रा० ८	तिर्यग्नराः
२९	८	मनुजप्रा० ८	देवनारकाः

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अविरतौ नाम्नो ब० भङ्गयन्त्रम् । सर्वाग्रं ३२

ध ०	भङ्ग०	कस्य प्रा०	बन्धकाः
२८	८	देवप्रा० ८	तिर्यग्नराः
२९	१६	,, ८	मनुजाः
		प० मनु० प्रा० ८	देवनारकाः
३०	८	,, ८	,,

देशविरतौ नाम्नो ब० भङ्गयन्त्रम् स० १६

बन्ध-स्था०	भङ्ग-सं०	कस्य प्रा०	बन्धकाः
२८-२९	८-८	देव प्रा० ८-८	मनुजाः

संज्वलनत्रिके नवगुणस्थानानि संज्वलनलोभे च दशगुणस्थानानि भवन्ति । यत्र यत्र गुणस्थाने या या ओघे बन्धप्रकृतयो भवन्ति तत्र तत्र तास्ताः प्रकृतयो वक्तव्याः । बन्धस्थानानि नाम्नो बन्धस्थानभङ्गाश्चौघोक्ता एव वक्तव्या इति समाप्तं कषायद्वारम् ॥

॥ अथ ज्ञानद्वारे बन्धादिविचारः ॥

ज्ञानद्वारेऽज्ञानत्रिके मत्यज्ञानश्रुताज्ञानविभङ्गरूपे मिथ्यात्वसास्वादनमिश्ररूपाणि त्रीणि गुणस्थानानि भवन्ति । मिश्रदृष्टेश्च यद्यपि "मीसंमि वामिस्सं" इति वचनात् ज्ञानव्यामिश्राण्यज्ञानानि प्राप्यन्ते न शुद्धान्यज्ञानानि तथापि तान्यज्ञानान्येव यथावस्थितवस्तुतत्त्वनिर्णयाभावात् । अन्ये पुनराहुः–'यद्यपि न तदानीं वस्तुतत्त्वनिर्णयस्तथापि न तान्यज्ञानान्येव, सम्यग्ज्ञानलेशव्यामिश्रत्वात्, तदुक्तम्–"मिथ्याधिकस्य मिश्रदृष्टेरज्ञानबाहुल्यं सम्यक्त्वाधिकस्य पुनः सम्यग्ज्ञानबाहुल्यम्"' इति ।

हरिभद्रकृतषडशीतिवृत्तौ तु–"यदभिप्रायेण त्रीणि गुणस्थानानि भवन्ति तेषामयमाशयः–'यदुत मिश्रदृष्टेर्व्यामिश्रज्ञानान्यप्यज्ञानान्येव, यथावस्थिततत्त्वनिर्णयाभावात्, अतस्त्रीण्यपि गुणस्थानान्यत्राज्ञानत्रिके भवन्ती'ति । यदभिप्रायेण च द्वे गुणस्थानके भवतस्तेषामिदमाकूतम्–'यदुत मिश्रदृष्टेः किञ्चित्सम्यग्रूपत्वात्तज्ज्ञानानि किञ्चित्कलुषाण्यपि सम्यग्ज्ञानान्येव, अतोऽज्ञानत्रये द्वे एव गुणस्थानके भवतः, आहैवं तर्हि सासादनस्यापि सम्यग्दृष्टित्वेन तदवबोधस्यापि ज्ञानरूपत्वात्कथमज्ञानत्रये सासादनगुणस्थानकसंभवः ? इति, सत्यमेतत् नवरं तज्ज्ञानस्यानन्तानुबन्धिप्रथमकषायोदयेनातिदूषितत्वादज्ञानमेवेति भावः'" इति ।

तत्रौघे मिथ्यात्वे च सप्तदशाग्रशतं, सास्वादने एकाग्रशतं, मिश्रे च चतुस्सप्ततिरिति गुणस्थानत्रिके बन्धप्रकृतयो वेदितव्याः ।

॥ गुणस्थानत्रिके अज्ञानत्रिकबन्धप्रकृतियन्त्रम् ॥

गुणस्था०	ज्ञाना०	दर्शना०	वेदनीय	मोहनीय	आयुः	नाम	गोत्र	अन्तराय	सर्वाग्रम्
ओ०, मि० च	५	९	२	२६	४	६४	२	५	११७
सास्वादने	५	९	२	२४	३	५१	२	५	१०१
मिश्रे	५	६	१	१९	०	३६	१	५	७४

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ज्ञानावरणान्तराययोः पञ्चप्रकृत्यात्मकं, दर्शनावरणीयस्य नवप्रकृत्यात्मकं, षट्प्रकृत्यात्मकं च, वेदनीयस्य सातारूपमसातारूपं च, मोहनीयस्य द्वाविंशत्येकविंशतिसप्तदशरूपाणि त्रीणि, आयुषश्चत्वारि, नाम्नस्त्रयोविंशतिपञ्चविंशतिषड्विंशत्यष्टाविंशत्येकोनत्रिंशत्रिंशद्रूपाणि षट्, गोत्रस्योच्चैर्गोत्ररूपं, नीचगोत्ररूपं च बन्धस्थानानि भवन्ति। गुणस्थानवर्त्तिबन्धस्थानानि यन्त्रतोऽवलोकनीयानि नाम्नो बन्धस्थानभङ्गास्तु तिर्यग्गतिवद्वाच्याः।

॥ गुणस्थानत्रिके अज्ञानत्रिकबन्धस्थानयन्त्रकम् ॥

गुणस्था०	ज्ञाना०	दर्शना०	वेदनीय	मोहनीय	आयुः	नाम	गोत्र	अन्तराय
ओघे	१	२	२	३	४	६	२	१
मिथ्यात्वे	१	१	२	१	४	६	२	१
सास्वादने	१	१	२	१	३	३	२	१
मिश्रे	१	१	२	१	०	२	१	१

तथा मतिज्ञानादित्रिके सम्यग्दृष्ट्यादीनि क्षीणमोहपर्यवसानानि गुणस्थानानि नव भवन्ति। सयोग्ययोगिकेवलिगुणस्थानद्विकं तु न संभवत्येव, मत्यादिव्यवच्छेदेनैव केवलज्ञानस्य प्रादुर्भावात्, "नट्ठंमि उ छाउमत्थिए नाणे" इति वचनप्रामाण्यात्। ननु यदि मतिज्ञानादीनि स्वस्वावरणक्षयोपशमभावेऽपि प्रादुर्भवन्ति तर्हि निःशेषतः स्वस्वावरणक्षये सुतरां भवेयुः, चारित्रपरिणामवत्, तत्कथं तदानीं तेषामभावः?, तदुक्तं—"आवरणदेसविगमे जाइं विज्जंति मइसुयाईणि। आवरण सव्वविगमे कह ताइं न होंति जीवस्स॥" इति चेद्?, अत्रोच्यते—इह यथा सहस्रभानोरुपचितघनपटलान्तरितस्यावान्तरालावस्थितकटकुड्याद्यावरणविवरप्रविष्टः प्रकाशो घटपटादीन् प्रकाशयति, तथा केवलज्ञानावरणावृत्तस्य केवलज्ञानस्यापान्तरालमतिज्ञानाद्यावरणक्षयोपशमरूपविवरविनिर्गतः प्रकाशो जीवादीन् प्रकाशयति, स च तथा प्रकाशयन् मतिज्ञानमित्यादि लक्षणं तत्तत्क्षयोपशमानुरूपमभिधानमुद्वहति, ततो यथा सकलघनपटलकटकुड्याद्यावरणापगमे स तथाविधः प्रकाशः सहस्रभानोरस्पष्टरूपो न भवति, किन्तु सर्वात्मना स्फुटरूपोऽन्य एव; तथेहापि सकलकेवलज्ञानावरणमतिज्ञानाद्यावरणविलयेन न तथाविधो मतिज्ञानादिसंज्ञितः केवलज्ञानस्य प्रकाशो भवति, किन्तु सर्वात्मना यथावस्थितं वस्तु परिच्छिन्दन् परिस्फुटरूपोऽन्य एवेत्यदोषः, तदुक्तं—"कडविवरागयकिरणा मेहंतरियस्स जेह दिणेसस्स। ते कडमेहावगमे न होंति जह तह इमाइंपि॥१॥" इति। अन्ये पुनराहुः—'सन्त्येव मतिज्ञानादीन्यपि सयोगिकेवल्यादौ, केवलमफलत्वात् सन्त्यपि तदानीं न विवक्ष्यन्ते, यथा सूर्योदये नक्षत्रादीनि, तदुक्तम्—"अण्णे आभिणिबोहियणाणाईणि वि जिणस्स विज्जंति। अफलाणि य सूरुदये जहेव णक्खत्तमाईणि॥१॥"' इति। तत्र सामान्येन मतिज्ञाना-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

दित्रिके एकोनाशीतिर्बन्धे प्राप्यते । अविरतसम्यग्दृष्टौ सप्तसप्ततिं बध्नाति । देशविरतौ सप्तषष्टिं बध्नाति । प्रमत्ते त्रिषष्टिं बध्नाति । अप्रमत्ते एकोनषष्टिरष्टपञ्चाशद्वा बन्धे भवति । अपूर्वकरणे प्रथमभागेऽष्टपञ्चाशत् भवति । अपूर्वकरणद्वितीयादिभागपञ्चके षट्पञ्चाशद्भवति । सप्तमभागे षड्विंशतिं बध्नाति । अनिवृत्तिकरणप्रथमभागे द्वाविंशतिर्द्वितीयभागे एकविंशतिस्तृतीयभागे विंशतिश्चतुर्थभागे एकोनविंशतिः पञ्चमभागे चाष्टादश बन्धे प्राप्यन्ते । सूक्ष्मसम्पराये सप्तदश भवन्ति । उपशान्तादिद्विके सातारूपामेकामेव बध्नातीति ।

॥ मतिज्ञानादित्रिके बन्धप्रकृतियन्त्रम् ॥

गुणस्था०	ज्ञाना०	दर्शना०	वेदनीय	मोहनीय	आयुः	नाम	गोत्र	अन्तराय	सर्वाग्रम्
ओघे	५	६	२	१९	२	३९	१	५	७९
अविरते	५	६	२	१९	२	३७	१	५	७७
देशविरते	५	६	२	१५	१	३२	१	५	६७
प्रमत्ते	५	६	२	११	१	३२	१	५	६३
अप्रमत्ते	५	६	१	९	१—०	३१	१	५	५८—५९
अपूर्वक० प्र०	५	६	१	९	०	३१	१	५	५८
अपू० २—६	५	४	१	९	०	३१	१	५	५६
अपू० ७ भा०	५	४	१	९	०	१	१	५	२६
अनि० प्र०	५	४	१	५	०	१	१	५	२२
अनि० द्वि०	५	४	१	४	०	१	१	५	२१
अनि० तृ०	५	४	१	३	०	१	१	५	२०
अनि० च०	५	४	१	२	०	१	१	५	१९
अनि० पं०	५	४	१	१	०	१	१	५	१८
सूक्ष्मः	५	४	१	०	०	१	१	५	१७
उप० क्षी० च	०	०	१	०	०	०	०	०	१

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अथ मतिज्ञानादित्रिके ज्ञानावरणान्तराययोः पञ्चप्रकृत्यात्मकं बन्धस्थानं सूक्ष्मसम्परायं यावद्भवति । दर्शनावरणस्य षट्प्रकृत्यात्मकमपूर्वकरणप्रथमभागं यावत् ततः परं चतुष्कं सूक्ष्मसम्परायं यावद्भवति । वेदनीयस्य द्वे बन्धस्थाने भवतः । तत्र प्रमत्तं यावद्द्वे भवतः । ततः क्षीणमोहं यावत्सातरूपमेकमेव भवति । मोहनीयस्याष्टौ बन्धस्थानानि भवन्ति तद्यथा—सप्तदश, त्रयोदश, नव, पञ्च, चतुः, त्रि, द्वि, एकरूपाणीति । तत्राविरते सप्तदशप्रकृत्यात्मकं, देशविरते त्रयोदशप्रकृत्यात्मकं, प्रमत्तादित्रिके नवप्रकृत्यात्मकं, अनिवृत्तिकरणे च पञ्चचतुस्त्रिद्व्येकप्रकृतिरूपाणि पञ्च बन्धस्थानानि भवन्ति । आयुषोऽविरतसम्यग्दृष्टौ द्वे बन्धस्थाने भवतः । देशविरत्यादित्रिके सुरायूरूपमेकमेव भवति । नाम्नः पञ्च बन्धस्थानानि भवन्ति । तत्राविरतसम्यग्दृष्टावष्टाविंशत्येकोनत्रिंशत्त्रिंशद्रूपाणि त्रीणि भवन्ति । देशविरतौ प्रमत्ते चाष्टाविंशत्येकोनत्रिंशद्रूपे द्वे भवतः । अप्रमत्तेऽष्टाविंशत्येकोनत्रिंशत्त्रिंशदेकत्रिंशद्रूपाणि चत्वारि भवन्ति । अपूर्वकरणेऽष्टाविंशत्येकोनत्रिंशत्त्रिंशदेकत्रिंशदेकरूपाणि पञ्च भवन्ति । अनिवृत्तिकरणे सूक्ष्मसम्पराये च यशःकीर्त्तिरूपमेकमेव भवति । गोत्रस्याविरतसम्यग्दृष्ट्यादितः सूक्ष्मसम्परायं यावदुच्चगोत्ररूपमेकमेव बन्धस्थानं भवतीति ।

॥ मत्यादित्रिके बन्धस्थानयन्त्रम् ॥

गुणस्था०	ज्ञाना०	दर्शना०	वेदनीय	मोहनीय	आयुः	नाम	गोत्र	अन्तराय
ओघे	१	२	२	८	२	५	१	१
अविरते	१	१	२	१	२	३	१	१
देशविरते	१	१	२	१	१	२	१	१
प्रमत्ते	१	१	२	१	१	२	१	१
अप्रमत्ते	१	१	१	१	१-०	४	१	१
अपूर्वकरणे	१	२	१	१	०	५	१	१
अनिवृत्तिकरणे	१	१	१	५	०	१	१	१
सूक्ष्मसम्पराये	१	१	१	०	०	१	१	१
उ०, क्षी० च	०	०	१	०	०	०	०	१

मत्यादित्रिके नाम्नो भङ्गा लिख्यन्ते—तत्राष्टाविंशतावष्टौ, एकोनत्रिंशति षोडश, त्रिंशति अष्टौ, एकत्रिंशत्येकः, एकस्मिंश्च बन्धस्थान एकः, एवं सर्वेऽपि पञ्चत्रिंशद्भवन्ति । तत्रावि-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

रतसम्यग्दृष्टावष्टाविंशतावष्टौ देवप्रायोग्याः, जिननामयुते एकोनत्रिंशति चाष्टौ देवप्रायोग्याः, मनुजप्रायोग्याश्चाष्टौ, त्रिंशति च मनुजप्रायोग्या अष्टौ एवं सर्वे द्वात्रिंशद् भवन्ति ।

देशविरते द्वे बन्धस्थाने भवतस्तद्यथा–अष्टाविंशतिरेकोनत्रिंशच्चेति ।. तत्राष्टाविंशतावष्टावेकोनत्रिंशति चाष्टाविति । प्रमत्तगुणस्थानकेऽप्येवमेव, नवरमष्टाविंशतिबन्धका नरा एव, न तिर्यञ्चः, तेषां प्रमत्तगुणस्थानकाभावात् ।

अप्रमत्ते चत्वारि बन्धस्थानानि भवन्ति, तद्यथा–अष्टाविंशतिरेकोनत्रिंशत्त्रिंशदेकत्रिंशच्चेति । चतुर्ष्वपि बन्धस्थानेष्वेकैक एव भङ्गः, सर्वे चत्वारः । एवमपूर्वकरणे पञ्च बन्धस्थानानि भवन्ति, चत्वार्यप्रमत्तोक्तानि, पञ्चमं त्वेकं यशःकीर्त्तिरूपं भवति । भङ्गाः पञ्च भवन्ति। अनिवृत्तिकरणे सूक्ष्मसम्पराये चैकं यशःकीर्त्तिरूपं बन्धस्थानं, भङ्गश्चैकैको भवति ।

।मत्यादित्रिकस्याविरतौ नाम्नो ब० भ०३२ ।

बन्धस्था०	भङ्गसं०	कस्य प्रा०		बन्धका०
२८	८	देवप्रायोग्याः	८	तिर्यङ्नराः
२९	१६	,,	८	मनुजाः
		मनुजप्रा०	८	देवनारकाः
३०	८	,,	८	,,

। देशविरते नाम्नो ब० भङ्गयन्त्रकम् । १६

बन्धस्था०	भङ्गसं०	कस्य कति भङ्गाः		बन्धकाः
२८	८	देवप्रायोग्याः	८	तिर्यङ्नराः
२९	८	,,		नराः

। प्रमत्ते नाम्नो ब० भङ्गयन्त्रम् । १६

बन्धस्था०	भङ्गसं०	कस्य प्रा०		बन्धकाः
२८ २९	८ ८	देवप्रा०	८–८	मनुजाः

। अप्रमत्ते अपूर्वे च नाम्नो ब० भङ्गय० । ४–५

बन्धस्था०	भङ्गसं०	कस्य प्रा०		बन्धकाः
२८	१	देवप्रायोग्यः	१	मनुजाः
२९	१	,,	१	,,
३०	१	,,	१	,,
३१	१	,,	१	,,
१	१	,,	१	,,

। अनिवृत्तिक०, सूक्ष्मस० च ब० भङ्ग० ।

बन्धस्था०	भङ्गसं०	कस्य प्रा० क० भङ्गाः	बन्धकाः
१	१	०	मनुजाः

मनःपर्यवज्ञाने ओघेन पञ्चषष्टिर्बन्धे प्राप्यते । प्रमत्ते त्रिषष्टिः, अप्रमत्ते एकोनषष्टिरष्टपञ्चाशद्वा, अपूर्वकरणे प्रथमभागेऽष्टपञ्चाशत्, द्वितीयादिपञ्चभागे षट्पञ्चाशत्, सप्तमे च षड्विंशतिः । अनिवृत्तिकरणप्रथमभागे द्वाविंशतिः, द्वितीये एकविंशतिः, तृतीये विंशतिः, चतुर्थे एकोनविंशतिः, पञ्चमे चाष्टादश । सूक्ष्मसम्पराये सप्तदश । उपशान्ते क्षीणे च सातारूपैकैव बन्धप्रकृतिर्भवति । केवलज्ञाने सयोगिनि सातारूपैकैव प्रकृतिर्बध्यते, सैव च बन्धस्थानमपि भवति । मनःपर्यवज्ञाने ज्ञानावरणान्तराययोः पञ्च प्रकृतिरूपं सूक्ष्मसम्परायं यावत् बन्धस्थानं भवति ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

दर्शनावरणस्य षट् प्रकृतिरूपमपूर्वकरणप्रथमभागं यावत्, ततश्च चतुष्करूपं सूक्ष्मसम्परायं यावत् भवति । वेदनीयस्य प्रमत्ते सातारूपमसातारूपं च भवति । अप्रमत्तादौ सातारूपमेव भवति । मोहनीयस्य षड् वन्धस्थानानि भवन्ति, तद्यथा—नव, पञ्च, चतस्रः, तिस्रः, द्वे, एका चेति । तत्र नवप्रकृत्यात्मकं प्रमत्तेऽप्रमत्तेऽपूर्वकरणे च भवति । शेषाणि पञ्चानिवृत्तिकरणे भवन्ति। आयुषि देवायूरूपमेकं वन्धस्थानं प्रमत्ते भवति, अप्रमत्ते च वा भवति । नाम्नः पञ्च वन्धस्थानानि भवन्ति, तद्यथा—अष्टाविंशतिरेकोनत्रिंशत्त्रिंशदेकत्रिंशदेकप्रकृत्यात्मकं चेति । तत्र प्रमत्तेऽष्टाविंशत्येकोनत्रिंशद्रूपे द्वे भवतः, ते च देवप्रायोग्ये, भङ्गा अत्र षोडश भवन्ति । अप्रमत्ते एकं प्रकृतिरूपं वन्धस्थानं विहाय शेषाणि चत्वारि देवप्रायोग्याणि भवन्ति, भङ्गाश्च चत्वारो भवन्ति । अपूर्वकरणे पञ्चापि भवन्ति, भङ्गाश्च पञ्च । अनिवृत्तिकरणे, सूक्ष्मसम्पराये चैकप्रकृतिरूपमेकमेव, भङ्गश्च एको भवति । गोत्रस्योच्चैर्गोत्ररूपमेकमेव वन्धस्थानं भवति, तदेवं ज्ञानमार्गणोक्तेति ॥

॥ मनःपर्ययज्ञाने वन्धप्रकृतिभङ्गयन्त्रम् ॥

गुणस्था०	ज्ञानाव०	दर्शना०	वेदनीय	मोहनीय	आयुः	नाम	गोत्र	अन्तराय	सर्वाग्रम्
ओघे	५	६	२	११	१	३४	१	५	६५
प्रमत्ते	५	६	२	११	१	३२	१	५	६३
अप्रमत्ते	५	६	१	९	१—०	३१	१	५	५८-५९
अपू० प्र०	५	६	१	९	०	३१	१	५	५८
अपू, २–६ भागे	५	४	१	९	०	३१	१	५	५६
अपू० स० भागे	५	४	१	९	०	१	१	५	२६
अनि० प्र०	५	४	१	५	०	१	१	५	२२
अनि० द्वि०	५	४	१	४	०	१	१	५	२१
अनि० तृ०	५	४	१	३	०	१	१	५	२०
अनि० च०	५	४	१	२	०	१	१	५	१९
अनि० पं०	५	४	१	१	०	१	१	५	१८
सूक्ष्मसम्पराये	५	४	१	०	०	१	१	५	१७
उप०, क्षी० च	०	०	१	०	०	०	०	०	१

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

॥ मनःपर्यवज्ञाने बन्धस्थानयन्त्रम् ॥

गुणस्था०	ज्ञाना०	दर्शना०	वेदनीय	मोहनीय	आयुः	नाम	गोत्र	अन्तराय
ओघे	१	२	२	६	१	५	१	१
प्रमत्ते	१	१	२	१	१	२	१	१
अप्रमत्ते	१	१	१	१	१–०	४	१	१
अपूर्वकरणे	१	२	१	१	०	५	१	१
अनिवृत्तिकरणे	१	१	१	५	०	१	१	१
सूक्ष्मसम्प०	१	१	१	०	०	१	१	१
उप०, क्षी० च	०	०	१	०	०	०	०	०

। मनःपर्यवे प्रमत्ते ना० व० भङ्गयन्त्रम् । १६

बन्ध-स्था०	भङ्ग-सं०	कस्य प्रा० कति भङ्गाः	बन्धकाः
२८ २९	८ ८	देवप्रायोग्याः ८–८	मनुजाः

। अनिवृत्तिक० सूक्ष्म० च नाम्नो ।

बन्ध-स्था०	भङ्ग-सं०	कस्य प्रा० कति भङ्गाः	बन्धकाः
१	१	०	मनुजाः

। अप्रमत्ते, अपूर्वे च । ४–५

बन्ध-स्था०	भङ्ग-सं०	कस्य प्रा० कति भङ्गाः	बन्धकाः
२८	१	देवप्रायोग्याः १	मनुजाः
२९	१	,, १	,,
३०	१	,, १	,,
३१	१	,, १	,,
१	१	,, १	,,

॥ अथ संयममार्गणायां बन्धादिविचारः ॥

तत्र बन्धप्रकृतय उच्यन्ते—अविरतिचारित्रे सामान्येनाष्टादशाधिकशतं बध्नाति । तत्र मिथ्यादृष्टौ सप्तदशोत्तरशतं सास्वादने एकोत्तरशतं,मिश्रे चतुःसप्ततिः,अविरतसम्यग्दृष्टौ च सप्तसप्ततिः प्रकृतयो बन्धे प्राप्यन्ते । देशविरतौ सप्तषष्टिः प्राप्यते । सामायिकच्छेदोपस्थापनीययोः सामान्येन पञ्चषष्टिः—प्रमत्ते त्रिषष्टिः, अप्रमत्ते एकोनषष्टिरष्टपञ्चाशद्वा, अपूर्वकरणप्रथमभागेऽष्टपञ्चाशत्, द्वितीयादिपञ्चके षट्पञ्चाशत्, सप्तमे च षड्विंशतिः, अनिवृत्तिकरणे प्रथमभागे द्वाविंशतिः, द्वितीयभागे एकविंशतिः, तृतीयभागे विंशतिः, चतुर्थे एकोनविंशतिः, पञ्चमे चाष्टादश बन्धे प्राप्यन्ते इति । परिहारविशुद्धौ सामान्येन पञ्चषष्टिः बन्धे प्राप्यते, प्रमत्ते त्रिषष्टिरप्रमत्ते एकोनषष्टिरष्टपञ्चाशद्वेति । सूक्ष्मसम्पराये च सप्तदश बध्नन्ति । यथाख्यातचारित्रे गुणस्थानत्रयेऽपि सातारूपैकैव प्रकृतिर्बध्यत इति । यथाख्यातचारित्रे गुणस्थानत्रिकेऽपि सातारूपमेकमेव बन्धस्थानं भवति । सूक्ष्मसम्पराये ज्ञानावरणान्तराययोः पञ्चप्रकृतिरूपमेकं बन्धस्थानं, दर्शनावरणस्य चतुष्प्रकृतिरूपमेकं, वेदनीयस्य सातारूपं, गोत्रस्योच्चैर्गोत्ररूपं, नाम्नश्च यशःकीर्त्तिरूपं बन्धस्थानं भवति ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

यथाख्यातचारित्रे नाम्नो भङ्गा न सन्ति, सूक्ष्मसम्पराये चैको भङ्गो भवति । सामायिकादिद्विके ज्ञानावरणान्तराययोः पञ्चप्रकृतिरूपमेकं बन्धस्थानं गुणस्थानचतुष्के भवति, दर्शनावरणस्य षट्कमपूर्वप्रथमभागं यावत्, चतुष्कं द्वितीयभागादारभ्य बादरसम्परायं यावद्भवति, वेदनीयस्य च सातासातरूपे द्वे प्रमत्तं यावत्, अप्रमत्तादनिवृत्तिं यावच्च सातरूपं भवति । मोहनीयस्य षड् बन्धस्थानानि भवन्ति–प्रमत्तादित्रिके नवप्रकृतिरूपम्, अनिवृत्तिकरणे च पञ्चचतुस्त्रिद्व्येकरूपाणि पञ्च भवन्ति । आयुष एकं प्रमत्ते भवति, अप्रमत्ते तु भाज्यम् । नाम्नः पञ्च बन्धस्थानानि भवन्ति, तद्यथा–प्रमत्ते अष्टाविंशत्येकोनत्रिंशद्रूपे द्वे देवप्रायोग्ये भवतः, भङ्गाश्च षोडश भवन्ति । अप्रमत्ते चत्वारि देवप्रायोग्याणि–अष्टाविंशत्येकोनत्रिंशत्त्रिंशदेकत्रिंशद्रूपाणि भवन्ति, भङ्गाश्चत्वारः । अपूर्वकरणे पञ्च, तत्र चत्वारि अप्रमत्तोक्तानि, यशोरूपं चैकमेवं पञ्च भवन्ति, अत्र भङ्गा अपि पञ्च । अनिवृत्तिकरणे च यशःकीर्त्तिरूपमेकं बन्धस्थानं भवति भङ्गश्चैकः । गोत्रकर्मणि सर्वत्रोच्चैर्गोत्ररूपमेकं बन्धस्थानं भवति । परिहारविशुद्धिके बन्धस्थानानि प्रमत्ताप्रमत्तयोः सामायिकचारित्रवद्वाच्यानि, नाम्नो भङ्गा अपि तथैव वाच्याः । देशविरतौ ज्ञानावरणदर्शनावरणमोहायुर्गोत्रान्तरायाणामेकैकं बन्धस्थानं भवति । वेदनीयस्य द्वे बन्धस्थाने भवतः । नाम्नश्चाष्टाविंशत्येकोनत्रिंशद्रूपे द्वे भवतः, भङ्गाश्च देवप्रायोग्याः षोडश भवन्ति । अविरतिचारित्रेऽप्रत्याख्यानकषायवद्बन्धस्थानानि नाम्नो भङ्गाश्च वाच्या इत्युक्ता संयममार्गणा ॥

॥ अविरतमार्गणायां बन्धप्रकृतियन्त्रम् ॥

गुणस्था०	ज्ञाना०	दर्शना०	वेदनीय	मोहनीय	आयुः	नाम	गोत्र	अन्तराय	सर्वाग्रम्
ओघे	५	९	२	२६	४	६५	२	५	११८
मिथ्यात्वे	५	९	२	२६	४	६४	२	५	११७
सास्वादने	५	९	२	२४	३	५१	२	५	१०१
मिश्रे	५	६	२	१९	०	३६	१	५	७४
अविरतस०	५	६	२	१९	२	३७	१	५	७७

॥ अविरतौ बन्धस्थानयन्त्रम् ।

बन्धस्थानानि	ज्ञाना०	दर्शना०	वेदनीय	मोहनीय	आयुः	नाम	गोत्र	अन्तराय
ओघे	१	२	२	३	४	६	२	१
मिथ्यात्वे	१	१	२	१	४	६	२	१
सास्वादने	१	१	२	१	३	३	२	१
मिश्रे	१	१	२	१	०	२	१	१
अविरतस०	१	१	२	१	२	३	१	१

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

। अवि० ओ० मि० च नाम्नो भं० । ओघे स० १३९४२, मिथ्यादृष्टौ स० १३९२६

बन्ध-स्था०	भङ्ग-सं०	कस्य प्रा० कति भङ्गाः	बन्धकाः
२३	४	अप० ए० प्रा० ४	तिर्यङ्नराः
२५	२५	अप०विक०ति० म० प्रा० ५	,,
		प० ए० प्रा० सूक्ष्मसा० ४	,,
		,, सूक्ष्मप्र० ४	,,
		,, बादरसा० ४	,,
		,, ,, प्रत्येकाभ्याम् ८	नरकवर्जत्रि०
२६	१६	,, आ० उद्योतेन च १६	,,
२८	९	देवप्रा० ८	तिर्यङ्नराः
		नरकप्रा० १	,,
२९	९२४८ मिथ्या. ९२४०	प० विक० प्रा० २४	,,
		प०पं० ति० प्रा० ४६०८	चातुर्गतिकाः
		,, मनुजप्रा० ४६०८	,,
		देवप्रा० ८—मिथ्यादृष्टौ न	सम्य० नराः
३०	४६४० मिथ्या ४६३२	प० विक० प्रा० २४	तिर्यङ्नराः
		,, ति० प्रा० ४६०८	चतुर्ग०
		मनुजप्रा० ८ एते मिथ्यादृष्टौ न भवन्ति	सम्य०देवनारकाः

। सास्वादने नाम्नो बं० भं० । स० ९६०८

बन्ध-स्था०	भङ्ग-सं०	कस्य प्रा०	बन्धकाः
२८	८	देवप्रा० ८	तिर्यङ्नराः
२९	६४००	प० ति० प्रा० ३२००	चतुर्ग०
		प० मनु० प्रा० ३२००	,,
३०	३२००	प० तिर्यक्प्रा० ,,	,,

। मिश्रे नाम्नो बं० भं० । स० १६

बन्ध-स्था०	भङ्ग-सं०	कस्य प्रा०	बन्धकाः
२८	८	देवप्रा०	तिर्यङ्नराः
२९	८	प० ८ मनुजप्रा० ८	देवना०

। अविस० नाम्नो ब० भं० । स० ३२

बन्ध-स्था०	भङ्ग-सं०	कस्य प्रा०	बन्धकाः
२८	८	देवप्रा० ८	तिर्यङ्नराः
२९	१६	,, ८	मनुजा०
		म० प्रा० ८	देवना०
३०	८	,, ,,	,,

॥ देशविरते नाम्नो बं० भं० ॥ स० १६

बन्ध-स्था०	भङ्ग-सं०	कस्य प्रा०	बन्धकाः
२८	८	देवप्रा० ८	तिर्यङ्नराः
२९	८	,, ,,	मनुजाः

सामायिकादिसंयमत्रिके प्रमत्तगु० । स० १६

बन्ध-स्था०	भङ्ग-सं०	कस्य प्रा०	बन्धकाः
२८ २९	८–८	देवप्रायोग्याः ८–८	मनुजाः

सामा० संयमत्रिके अप्रमत्ते भङ्ग० । स० ४

बन्ध-स्था०	भङ्ग-सं०	कस्य प्रा०	बन्धकाः
२८ २९ ३० ३१	१ १ १ १	देवप्रा० १–१–१–१	मनुजाः

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

। सामायिकच्छेदोपस्थापनीययोरपू० । स० ५

बन्ध-स्था०	भङ्ग-सं०	० कस्य प्रा०	बन्धकाः
२८ २९ ३० ३१	१ १ १ १	देवप्रा० १-१-१-१	मनुजाः
१	१	०	"

। सामा० छेदोपस्थापनीययोरनिवृत्तिक० ।

बन्ध-स्था०	भङ्ग-सं०	कस्य प्रा०	बन्धकाः
१	१	१	मनुजाः

। सूक्ष्मसम्परायचारित्रे तदेव गुण० ।

बन्ध-स्था०	भङ्ग-सं०	कस्य प्रा०	बन्धकाः
१	१	१	मनुजाः

॥ अथ दर्शनमार्गणायां बन्धादिविचारः ॥

दर्शनमार्गणायामचक्षुश्चक्षुर्दर्शनयोर्मिथ्यात्वादीनि द्वादशगुणस्थानानि भवन्ति । तत्र बन्धप्रकृतयो बन्धस्थानानि नाम्नो बन्धस्थानभङ्गा यन्त्राणि च गुणस्थानोक्तानुसारेणात्र परिभावनीयानि । अवधिदर्शने मिथ्यात्वादीनि क्षीणमोहपर्यन्तानि द्वादश भवन्तीति प्रज्ञापनाभिप्रायः, तथा च तत्सूत्रम्–"ओहिदंसणअणागारोवओगउत्ता णं भंते ! किं नाणी अन्नाणी ?, गोयमा ! णाणी वि अण्णाणी वि । जइ नाणी ते अत्थेगइया तिण्णाणी अत्थेगइया चउण्णाणी । जे तिण्णाणी ते आभिणिबोहियणाणी, सुयणाणी, ओहिणाणी । जे चउणाणी ते आभिणिबोहियणाणी, सुयणाणी, ओहिणाणी, मणपज्जवणाणी । जे अण्णाणी ते णियमा मइअण्णाणी, सुयअण्णाणी, विभंगणाणी" इति । अत्र हि येऽज्ञानिनस्ते मिथ्यादृष्टय एव, मिथ्यादृष्टीनां च सूत्रे साक्षादेवावधिदर्शनं प्रतिपादितम्, स एव विभङ्गज्ञानी यदा सासादनभावे मिश्रभावे वा वर्त्तते तदानीं च तत्राप्यवधिदर्शनं प्राप्यत इति । षडशीतावविरतसम्यग्दृष्ट्यादीनि नवगुणस्थानान्युक्तानि तथा च तत्पाठः–"मइसुयओहिदुगे नव" इति । यत्त्ववधिदर्शनं कुतश्चिदभिप्रायाद्विशिष्टश्रुतविदो मिथ्यादृष्ट्यादीनां नेच्छन्ति तन्मतमाश्रित्याचार्येणापि तत्तेषां नेष्टमितिमलयगिरिवृत्तौ । ततः प्रज्ञापनाभिप्रायेण गुणस्थानोक्तं बन्धादिकं वाच्यम् । मतिज्ञानवद्वा मतान्तरेण वाच्यम् । केवलदर्शने केवलज्ञानवद्वाच्यमित्युक्तं दर्शनद्वारम् ॥

॥ अथ लेश्यासु बन्धप्रकृत्यादिकमुच्यते ॥

तत्र सामान्येनाद्यलेश्यात्रिके वर्तमाना जीवा आहारकद्विकोनं विंशत्युत्तरशतमेवाष्टादशाधिकशतं बध्नन्ति, आहारकद्विकस्य शुभलेश्याभिर्बध्यमानत्वात् । मिथ्यादृष्टौ तीर्थकरोनं सप्तदशाग्रशतं भवति । सास्वादने एकोत्तरशतं बध्नाति । मिश्रे चतुस्सप्ततिर्बन्धे प्राप्यते । अविरतसम्यग्दृष्टौ सप्तसप्ततिर्बध्यते ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

॥ ओघलेश्यात्रिके बन्धप्रकृतियन्त्रम् ॥

गुणस्था०	ज्ञाना०	दर्शना०	वेदनीय	मोहनीय	आयुः	नाम	गोत्र	अन्तराय	सर्वाग्रम्
ओघे	५	९	२	२६	४	६५	२	५	११८
मिथ्यात्वे	५	९	२	२६	४	६४	२	५	११७
सास्वादने	५	९	२	२४	३	५१	२	५	१०१
मिश्रे	५	६	२	१९	०	३६	१	५	७४
अविरते	५	६	२	१९	२	३७	१	५	७७

अथ कृष्णादिलेश्यात्रिके बन्धस्थानान्युच्यन्ते—तत्र ज्ञानावरणान्तराययोः पञ्चप्रकृत्यात्मकमेकमेव बन्धस्थानं भवति। दर्शनावरणीयस्य नवप्रकृत्यात्मकं षट्प्रकृत्यात्मकं च, तत्र नवप्रकृत्यात्मकमाद्यगुणस्थानद्विके भवति, षट्प्रकृत्यात्मकं च मिश्रद्विके भवति। वेदनीयस्य द्वे बन्धस्थाने भवतः, तथा च चतुर्षु गुणस्थानेषु परावर्त्तमानतया द्वे अपि भवतः। आयुषश्चत्वारि बन्धस्थानानि भवन्ति, तत्र मिथ्यादृष्टौ चत्वार्यपि भवन्ति, सास्वादनसम्यग्दृष्टौ नारकायुर्वर्जानि त्रीणि भवन्ति, मिश्रआयुषो बन्धाभावान्न भवति बन्धस्थानम्, अविरतसम्यग्दृष्टौ च देवमनुजायूरूपे द्वे बन्धस्थाने भवतः। नाम्नो बन्धस्थानानि षट् भवन्ति, तद्यथा—त्रयोविंशतिः, पञ्चविंशतिः, षड्विंशतिः, अष्टाविंशतिः, एकोनत्रिंशत्, त्रिंशदिति। तत्र मिथ्यादृष्टौ षडपि भवन्ति, सास्वादनेऽष्टाविंशत्यादीनि त्रीणि भवन्ति, मिश्रेऽष्टाविंशत्येकोनत्रिंशदिति द्वे, अविरतसम्यग्दृष्टौ चाष्टाविंशत्येकोनत्रिंशद्रूपे द्वे कृष्णलेश्यावतां भवतः, त्रिंशत्प्रकृत्यात्मकं तु बन्धस्थानं न भवति, कृष्णलेश्यावत्सु नारकदेवेषु जिननाम्नो बन्धाभावात्, कापोतनीललेश्यावत्सु नारकेषु जिननाम्नो बन्धसद्भावात् तत्र त्रिंशत्प्रकृत्यात्मकं बन्धस्थानमपि भवति। मोहनीयस्य त्रीणि बन्धस्थानानि भवन्ति, तद्यथा—द्वाविंशतिरेकविंशतिः सप्तदशेति। तत्र द्वाविंशतिर्मिथ्यादृष्टावेकविंशतिः सास्वादनसम्यग्दृष्टौ मिश्रेऽविरतसम्यग्दृष्टौ च सप्तदशप्रकृत्यात्मकं बन्धस्थानं भवति। गोत्रस्य द्वे बन्धस्थाने भवतः, तत्र मिथ्यादृष्टौ सास्वादनसम्यग्दृष्टौ च द्वे द्वे भवतः, परावर्त्तमानबन्धात्, मिश्रद्विके चोच्चैर्गोत्ररूपमेकमेव भवति।

॥ कृष्णलेश्यायां नीलकापोतयोश्च बन्धस्थानयन्त्रम् ॥

गुणस्था०	ज्ञाना०	दर्शना०	वेदनीय	मोहनीय	आयुः	नाम	गोत्र	अन्तराय
ओघे	१	२	२	३	४	६	२	१
मिथ्यात्वे	१	१	२	१	४	६	२	१

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सास्वादने	१	१	२	१	३	३	२	१
मिश्रे	१	१	२	१	०	२	१	१
अविरते	१	१	२	१	२	२–३	१	१

अथ नाम्नो बन्धस्थानभङ्गा उच्यन्ते—तत्रौघे त्रयोविंशतौ चत्वारः, पञ्चविंशतौ पञ्चविंशतिः, षड्विंशतौ षोडश, अष्टाविंशतौ नव, एकोनत्रिंशदष्टचत्वारिंशदधिकानि द्वानवतिशतानि, त्रिंशति च कृष्णलेश्यावत्सु द्वात्रिंशदधिकानि षट्चत्वारिंशच्छतानि, नीलकापोतलेश्यावत्सु तु चत्वारिंशदधिकानि षट्चत्वारिंशच्छतानि भवन्ति, तत्र जिननामसत्कबन्धसंभवात्। मिथ्यादृष्टौ पुनरेकोनत्रिंशति चत्वारिंशदधिकानि द्वानवतिशतानि भवन्ति, त्रिंशति च द्वात्रिंशदधिकानि षट्चत्वारिंशच्छतानि भवन्ति। सास्वादने अष्टाधिकषण्णवतिशतानि भवन्ति। मिश्रे षोडश भवन्ति। अविरते कृष्णलेश्यावत्सु चतुर्विंशतिः, नीलकापोतवत्सु च द्वात्रिंशद्भवतीति।

। कृष्ण० यामोघे मि० च बं० भङ्गयन्त्रम्।
सर्वाग्रम् १३९३४, मिथ्यात्वे स० १३९२६

बन्ध-स्था०	भङ्ग-सं०	कस्य प्रा० कति भङ्गाः	बन्धकाः
२३	४	अप० ए० प्रा० ४	तिर्यङ्नराः
२५	२५	,, विक० ति० म० प्रा० ५	,,
		प० ए० सूक्ष्मसा०भ्याम् ४	,,
		,, ,, प्र० भ्याम् ४	,,
		,, बादरसा० भ्याम् ४	,,
		,, ,, प्रत्येकाभ्याम् ८	नारकवर्ज०
२६	१६	,, आ० उद्योतेन च० १६	,,
२८	९	देवप्रा० ८	तिर्यङ्नराः
		नरकप्रा० १	,,
२९	९२४८ मिथ्यात्वे ९२४०	प० विक० प्रा० २४	,,
		,, पं० ति० प्रा० ४६०८	चतुर्ग०
		,, म० प्रा० ४६०८	,,
		देवप्रा० (न मिथ्यात्वे) ८	सम्य० नराः
३०	४६३२	प० विक० प्रा० २४	तिर्यङ्नराः
		प० ति० प्रां० ४६०८	चतुर्ग०

॥ सास्वादने नाम्नो बं० भङ्गयं० ॥ स० ९६०८

बन्ध स्था०	भङ्ग-सं०	कस्य प्रा०	बन्धकाः
२८	८	देवप्रा० ८	तिर्यङ्नराः
२९	६४००	प० ति० नरप्रा०श्च ६४००	चतुर्ग०
३०	३२००	,, तिर्यक्प्रा० ३२००	,,

॥ मिश्रे नाम्नो बं० भङ्गयन्त्रम् ॥ स० १६

बन्ध स्था०	भङ्ग-सं०	कस्य प्रा०	बन्धकाः
२८	८	देवप्रा० ८	तिर्यङ्नराः
२९	८	मनुजप्रा० ८	देवनारकाः

॥ अविरतौ बं० भङ्गयन्त्रम् ॥ सर्वाग्रम्। २४

बन्ध-स्था०	भङ्ग-सं०	कस्य प्रा०	बन्धकाः
२८	८	देवप्रा० ८	तिर्यङ्नराः
२९	१६	,, ८	नराः
		मनुजप्रा० ८	नारकदेवाः

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

एवं नीलकापोतलेश्ययोरपि यन्त्रकाणि कृष्णलेश्यावद्वाच्यानि, नवरमोघयन्त्रके तुर्यगुणस्थानयन्त्रके च जिननामयुतत्रिंशत्प्रकृतिबन्धसत्का अष्टौ भङ्गा अत्राधिका वाच्या इति।

तथा तेजोलेश्यावान् सामान्येनैकादशाग्रशतं बध्नाति, अशुभलेश्याप्रत्ययनरकत्रिकसूक्ष्मत्रिकविकलाक्षत्रिकबन्धाभावात्। मिथ्यादृष्टौ आहारकद्विकजिनवर्जमष्टाग्रशतं बन्धे भवति। सास्वादने एकोत्तरशतम्, मिश्रे चतुस्सप्ततिम्, अविरतसम्यग्दृष्टौ सप्तसप्ततिम्, देशविरतौ सप्तषष्टिम्, प्रमत्ते त्रिषष्टिम्, अप्रमत्ते चैकोनषष्टिमष्टपञ्चाशद्वा बध्नातीति।

॥ तेजोलेश्यायां बन्धप्रकृतियन्त्रम् ॥

गुणस्था०	ज्ञाना०	दर्शना०	वेदनीय	मोहनीय	आयुः	नाम	गोत्र	अन्त०	सर्वाग्रम्
ओघे	५	९	२	२६	३	५९	२	५	१११
मिथ्यात्वे	५	९	२	२६	३	५६	२	५	१०८
सास्वादने	५	९	२	२४	३	५१	२	५	१०१
मिश्रे	५	६	२	१९	०	३६	१	५	७४
अविरते	५	६	२	१९	२	३७	१	५	७७
देशविरतौ	५	६	२	१५	१	३२	१	५	६७
प्रमत्ते	५	६	२	११	१	३२	१	५	६३
अप्रमत्ते	५	६	१	९	१–०	३१	१	५	५९–५८

अथ तेजोलेश्यायां बन्धस्थानान्युच्यन्ते—तत्र ज्ञानावरणान्तराययोः सप्तस्वपि गुणस्थानेषु पञ्चप्रकृत्यात्मकमेकमेव बन्धस्थानं भवति। वेदनीयस्य प्रमत्तगुणस्थानं यावत् द्वे बन्धस्थाने भवतः परावर्त्तमानत्वात्, अप्रमत्ते च सातरूपमेकमेव बन्धस्थानं भवति। दर्शनावरणीयस्य सामान्येन द्वे बन्धस्थाने भवतस्तद्यथा—नवप्रकृत्यात्मकं षट्प्रकृत्यात्मकं च, तत्र नवप्रकृत्यात्मकं प्रथमगुणस्थानद्विकं यावद् भवति, मिश्रगुणस्थानादारभ्याप्रमत्तं यावच्च षट्प्रकृत्यात्मकं भवति। मोहनीयस्य पञ्च बन्धस्थानानि भवन्ति, तद्यथा—द्वाविंशतिरेकविंशतिः सप्तदश त्रयोदशैकादशेति। तत्र मिथ्यादृष्टौ द्वाविंशतिरूपं सास्वादने एकविंशतिरूपं मिश्रेऽविरतसम्यग्दृष्टौ च सप्तदशप्रकृतिरूपं देशविरतौ त्रयोदशप्रकृतिरूपं प्रमत्ताप्रमत्तयोश्चैकादशप्रकृतिरूपं बन्धस्थानं भवति। गोत्रस्य प्रथमद्वितीयगुणस्थानयोर्द्वे बन्धस्थाने भवतः, परावर्त्तमानत्वात्, मिश्रगुणस्थानादारभ्याप्रमत्तगुणस्थानं यावदुच्चगोत्ररूपमेकमेव बन्धस्थानं भवति। आयुषि बन्धस्थानानि नरकायुर्वर्जानि त्रीणि

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

भवन्ति । नाम्नः षट् बन्धस्थानानि भवन्ति, तद्यथा—पञ्चविंशतिः षड्विंशतिरष्टाविंशतिरेकोनत्रिंशत्त्रिंशदेकत्रिंशदिति । तत्र मिथ्यादृष्टौ पञ्चविंशत्यादीनि पञ्च भवन्ति, सास्वादनेऽष्टाविंशत्येकोनत्रिंशत्त्रिंशद्रूपाणि त्रीणि भवन्ति, मिश्रेऽष्टाविंशत्येकोनत्रिंशद्रूपे द्वे भवतः, अविरतसम्यग्दृष्टावष्टाविंशत्येकोनत्रिंशत्त्रिंशद्रूपाणि त्रीणि भवन्ति, देशविरतौ प्रमत्ते चाष्टाविंशत्येकोनत्रिंशद्रूपे द्वे भवतः, अप्रमत्ते चाष्टाविंशत्येकोनत्रिंशत्त्रिंशदेकत्रिंशद्रूपाणि चत्वारि भवन्ति । नाम्नो भङ्गा उच्यन्ते—तत्र पञ्चविंशतौ पर्याप्तबादरप्रत्येकप्रायोग्या अष्टौ, षड्विंशतौ षोडश, अष्टाविंशतावष्ट, एकोनत्रिंशति चतुर्विंशत्यधिकानि द्वानवतिशतानि, त्रिंशति च सप्तदशाधिकषट्चत्वारिंशच्छतानि भवन्ति । एकत्रिंशति चैको भवतीति ।

॥ तेजोलेश्यायां बन्धस्थानयन्त्रम् ॥

गुणस्था०	ज्ञाना०	दर्शना०	वेदनीय	मोहनीय	आयुः	नाम	गोत्र	अन्तराय
ओघे	१	२	२	५	३	६	२	१
मिथ्यात्वे	१	१	२	१	३	५	२	१
सास्वादने	१	१	२	१	३	३	२	१
मिश्रे	१	१	२	१	०	२	१	१
अविरते	१	१	२	१	२	३	१	१
देशविरतौ	१	१	२	१	१	२	१	१
प्रमत्ते	१	१	२	१	१	२	१	१
अप्रमत्ते	१	१	१	१	१—०	४	१	१

॥ तेजोलेश्यायामोघे भं० यं० ॥ स० १३८७४

बन्धस्था०	भङ्गसं०	कस्य प्रा०	बन्धकाः	बन्धस्था०	भङ्गसं०	कस्य प्रा०	बन्धकाः
२५	८	प० बा० प्रत्येके० प्रा० ८	नारकवर्जाः			देवप्रा० ८	सम्य० नराः
२६	१६	,, आ० उद्योतेन च १६	,,	३०	४६१७	प० ति० पं० प्रा० ४६०८	नरकवर्जास्त्रि०
						,, म० प्रा० ८	देवाः
२८	८	देवप्रा० ८	तिर्यङ्नराः			देवप्रा० १	अप्र० मुनयः
२९	९२२४	प० ति० पं० प्रा० ४६०८	नारकवर्जा०	३१	१	,, १	,,
		,, म० प्रा० ४६०८	,,				

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

॥ मिथ्यादृष्टौ तेजो० बं० भं० ॥ स० १३८५६

बन्धस्था०	भङ्गसं०	कस्य प्रा० किय०	वन्धकाः
२५	८	प० बा० प्र० ए० प्रा० ८	ना० वर्जाः
२६	१६	,, आ० उद्योतेन च १६	,,
२८	८	देवप्रा० ८	तिर्यङ्नराः
२९	९२१६	प० ति० पं० प्रा० ४६०८	नारकवर्जा०
		,, मनु० प्रा० ४६०८	,,
३०	४६०८	प० ति० पं० प्रा० ४६०८	,,

॥ सास्वादने भङ्गयन्त्रम् ॥ स० ९६०८

बन्धस्था०	भङ्गसं०	कस्य० प्रा० किय०	वन्धकाः
२८	८	देवप्रा० ८	तिर्यङ्नराः
२९	६४००	प० ति० प्रा० ३२००	नारकवर्जास्त्रि०
		मनु० प्रा० ३२००	,,
३०	३२००	पं० ति० प्रा० ३२००	,,

॥ मिश्रे भङ्गयन्त्रम् ॥ सर्वाग्रम् १६

वन्धस्था०	भङ्गसं०	कस्य० प्रा०	वन्धकाः
२८	८	देवप्रा० ८	तिर्यङ्नराः
२९	८	मनुजप्रा० ८	देवाः

॥ अविरतौ बन्धस्थानभङ्गयन्त्रम् ॥ स० ३२

बन्धस्था०	भङ्गसं०	कस्य प्रा०	वन्धकाः
२८	८	देव प्रा० ८	तिर्यङ्नराः
२९	१६	,, ८	मनुजाः
		मनुजप्रा० ८	देवाः
३०	८	,, ८	,,

॥ देशविरतौ प्रमत्ते च भङ्गयन्त्रम् ॥ स० १६

बन्धस्था०	भङ्गसं०	कस्य प्रा०	वन्धकाः
२८	८	देवप्रा०	तिर्यङ्नराः
२९	८	,,	मनुजाः

॥ अप्रमत्ते नाम्नो भङ्गयन्त्रम् ॥ सर्वाग्रम् ४

बन्धस्था०	भङ्गसं०	कस्य प्रा०	बन्धकाः
२८	१	देवप्रायोग्याः १-१-१-१	मनुजाः
२९	१		
३०	१		
३१	१		

॥ पद्मलेश्यायां बन्धप्रकृतियन्त्रम् ॥

गुणस्था०	ज्ञाना०	दर्शना०	वेदनीय	मोहनीय	आयुः	नाम	गोत्र	अन्तरा०	सर्वाग्रम्
ओघे	५	९	२	२६	३	५६	२	५	१०८
मिथ्यादृष्टौ	५	९	२	२६	३	५३	२	५	१०५
सास्वादने	५	९	२	२४	३	५१	२	५	१०१

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मिश्रे	५	६	२	१९	०	३६	१	५	७४
अविरते	५	६	२	१९	२	३७	१	५	७७
देशविरते	५	६	२	१५	१	३२	१	५	६७
प्रमत्ते	५	६	२	११	१	३२	१	५	६३
अप्रमत्ते	५	६	१	९	१–०	३१	१	५	५९–५८

तथा पद्मलेश्यावतां नरकत्रिकस्थावरचतुष्कजातिचतुष्कातपवर्जं विंशत्युत्तरशतमेवाष्टाधिकशतं सामान्येन बध्यते । मिथ्यादृष्टौ जिनाहारकद्विकवर्जं पञ्चोत्तरशतं सास्वादन एकोत्तरशतं मिश्रे चतुस्सप्ततिरविरते सप्तसप्ततिः देशविरते सप्तषष्टिः प्रमत्ते त्रिषष्टिरप्रमत्त एकोनषष्टिरष्टपञ्चाशद्वा बध्यते । यन्त्रं च यथोपरि द्रष्टव्यम् ।

बन्धस्थानानि च सप्तानां कर्मणां तेजोलेश्यावद्वाच्यानि । नाम्नश्चत्वारि बन्धस्थानानि भवन्ति, तद्यथा—अष्टाविंशतिरेकोनत्रिंशत्त्रिंशदेकत्रिंशदिति । मिथ्यादृष्टौ सास्वादने चैकत्रिंशद्वर्जानि त्रीणि भवन्ति । मिश्र अष्टाविंशत्येकोनत्रिंशद्रूपे द्वे भवतः । अविरतसम्यग्दृष्टावष्टाविंशत्येकोनत्रिंशत्त्रिंशद्रूपाणि त्रीणि भवन्ति । देशविरते प्रमत्ते चाष्टाविंशत्येकोनत्रिंशद्रूपे द्वे भवतः । अप्रमत्त अष्टाविंशत्येकोनत्रिंशत्त्रिंशदेकत्रिंशद्रूपाणि चत्वारि भवन्ति । एकेन्द्रियप्रायोग्यचतुर्विंशतिवर्जास्तेजोलेश्योक्ताः सर्वेऽपि शेषा भङ्गा वाच्या इति ।

॥ पद्मलेश्यायां बन्धस्थानयन्त्रम् ॥

गुणस्था०	ज्ञाना०	दर्शना०	वेदनीय	मोहनीय	आयुः	नाम	गोत्र	अन्तराय
ओघे	१	२	२	५	३	४	२	१
मिथ्यादृष्टौ	१	१	२	१	३	३	२	१
सास्वादने	१	१	२	१	३	३	२	१
मिश्रे	१	१	२	१	०	२	१	१
अविरते	१	१	२	१	२	३	१	१
देशविरते	१	१	२	१	१	२	१	१
प्रमत्ते	१	१	२	१	१	२	१	१
अप्रमत्ते	१	१	१	१	१–०	४	१	१

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

। पद्मलेश्यायां नाम्नो ब० भ० । स० १३८५०

बन्ध-स्था०	भङ्ग-सं०	कस्य प्रा० किय०	बन्धकाः
२८	८	देवप्रा० ८	तिर्यङ्नराः
२९	९२२४	प० पं० ति० प्रा० ४६०८	नारकवर्जा-खिग०
		,, मनुष्यप्रा० ४६०८	,,
		देवप्रायोग्याः ८	सम्य० म०
३०	४६१७	प० पं० ति० प्रा० ४६०८	नारकवर्जा-खिग०
		प० मनु० प्रा० ८	स० देवाः
		देवप्रा० १	अप्र०मुनयः
३१	१	,, १	,,

॥ पद्मलेश्यायां मिथ्यादृष्टौ ॥ १३८३२

बन्ध-	भङ्ग-	कस्य० प्रा०	बन्धकाः
२८	८	देवप्रा० ८	तिर्यङ्नराः
२९	९२१६	प० ति० प्रा० ४६०८	नारकवर्जाखि.
		प० मनु० प्रा० ४६०८	,,
३०	४६०८	प० ति० प्रा० ४६०८	,,

॥ पद्म० सास्वादनसम्यग्दृष्टौ ॥ ९६०८

बन्ध-	भङ्ग-	कस्य प्रा०	बन्धकाः
२८	८	देवप्रा० ८	तिर्यग्नराः
२९	६४००	प० पं० ति० प्रा० ३२००	नारकवर्जाखि.
		,, म० प्रा० ३२००	,,
३०	३२००	प० ति० प्रा० ३२००	,,

॥ पद्मलेश्यायां मिश्रदृष्टौ ॥ १६

बन्ध-स्था०	भङ्ग-सं०	कस्य प्रा०	बन्धकाः
२८	८	देवप्रा० ८	तिर्यग्नराः
२९	८	मनुजप्रा० ८	देवाः

॥ पद्मलेश्यायामविरतसम्यग्दृष्टौ ॥ स०३२

बन्ध-स्था०	भङ्ग-सं०	कस्य प्रा० कति भङ्गाः	बन्धकाः
२८	८	देवप्रायोग्याः ८	तिर्यङ्नराः
२९	१६	,, ८	मनुजाः
		मनुजप्रा० ८	देवाः
३०	८	,, ८	,,

॥ पद्मले० देशविरतौ प्रमत्ते च ॥

बन्ध-स्था०	भङ्ग-सं०	कस्य प्रा०	बन्धकाः
२८ २९	८-८	देव प्रा० ८-८	तिर्यङ्नराः मनुजाः

॥ पद्मलेश्यायामप्रमत्ते ॥ स० ४

बन्ध-स्था०	भङ्ग-सं०	कस्य प्रा० कति भङ्गाः	बन्धकाः
२८	१	देवप्रायोग्याः १	मनुजाः
२९	१	,, १	,,
३०	१	,, १	,,
३१	१	,, १	,,

तथा शुक्ललेश्यावद्भिः सामान्येन चतुरग्रशतं बध्यते, नरकतिर्यग्गतिप्रायोग्यबन्धाभावेन नरकत्रिकजातिचतुष्कस्थावरचतुष्कातपतिर्यक्त्रिकोद्योतरूपाणां प्रकृतीनां बन्धाभावात् । मिथ्यात्वे आहारकद्विकजिननामवर्जमेकोत्तरशतं बध्यते । सास्वादने नपुंसकमिथ्यात्वहुण्डसेवार्त्तवर्जा सप्तनवतिः बध्यते । मिश्रादौ गुणस्थानोक्तौघबन्धो वक्तव्य इति । ननु

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

देवगतौ शुक्ललेश्यावत्सु लान्तकशुक्रसहस्रारेषु देवेषु तिर्यक्त्रिकोद्योतरूपप्रकृतिचतुष्कं बन्धे उक्तमत्र तु नोक्तमिति कथं न विरोध इति चेत्?, सत्यम्, परं बन्धस्वामित्वे तथोक्तत्वे-नास्माभिरपि तथैवोक्तम् । तथा च लेश्यामार्गणायां भावलेश्या विवक्षिता, देवगतौ च या शुक्ललेश्या साऽवस्थिता द्रव्यरूपावसीयते । तत्र तिर्यग्गत्यादिचतुष्कप्रकृतिबन्धे न बाध इत्यस्माकमाभाति, तत्त्वं पुनस्तद्विदो विदन्तीति ।

॥ शुक्ललेश्यायां बन्धप्रकृतियन्त्रम् ॥

गुणस्था०	ज्ञाना०	दर्शना०	वेदनीय	मोहनीय	आयुः	नाम	गोत्र	अन्तराय	सर्वाग्रम्
ओघे	५	९	२	२६	२	५३	२	५	१०४
मिथ्यात्वे	५	९	२	२६	२	५०	२	५	१०१
सास्वादने	५	९	२	२४	२	४८	२	५	९७
मिश्रे	५	६	२	१९	०	३६	१	५	७४
अविरते	५	६	२	१९	२	३७	१	५	७७
देशविरते	५	६	२	१५	१	३२	१	५	६७
एवं शेषं क्षीणमोहगुणस्थानपर्यन्तमौघिकयन्त्रवद्द्रष्टव्यम्									

तथा शुक्ललेश्यायां बन्धस्थानान्युच्यन्ते—आयुर्नामवर्जषण्णां कर्मणां त्रसकायवद्बन्धस्थानानि वाच्यानि । आयुषि देवमनुजायूरूपे द्वे बन्धस्थाने मिश्रगुणस्थानवर्जमिथ्यात्वाद्यविरतसम्यग्दृष्टिपर्यवसानेषु भवतः, देशविरत्यादित्रिके देवायूरूपमेकमेव बन्धस्थानं भवति, शेषगुणस्थानेष्वायुषो बन्ध एव नास्ति । नाम्नः पञ्च बन्धस्थानानि भवन्ति, तद्यथा—अष्टाविंशतिरेकोनत्रिंशत्त्रिंशदेकत्रिंशदेकप्रकृत्यात्मकं चेति । मिथ्यादृष्टावष्टाविंशत्येकोनत्रिंशद्रूपे द्वे बन्धस्थाने भवतः । सास्वादने मिश्रे चाष्टाविंशत्येकोनत्रिंशद्रूपे द्वे बन्धस्थाने भवतः । अविरतसम्यग्दृष्टावष्टाविंशत्येकोनत्रिंशत्त्रिंशद्रूपाणि त्रीणि भवन्ति । देशविरत्यादिद्विकेऽष्टाविंशत्येकोनत्रिंशद्रूपे द्वे बन्धस्थाने भवतः । अप्रमत्तेऽष्टाविंशत्यादीनि चत्वारि बन्धस्थानानि भवन्ति । अपूर्वकरणेऽष्टाविंशत्यादीनि पञ्च भवन्ति । अनिवृत्तिकरणे सूक्ष्मसम्पराये चैकप्रकृत्यात्मकमेकमेव बन्धस्थानं भवति । नाम्नो भङ्गा अष्टाविंशतावष्टावेकोनत्रिंशत्यष्टाधिकषट्चत्वारिंशच्छतानि त्रिंशति चाष्टौ भवन्ति । एकत्रिंशत्येकस्मिँश्चैकैको भङ्ग इत्येवमुक्ता लेश्यामार्गणा ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

॥ शुक्ललेश्यायां बन्धस्थानानां यन्त्रम् ॥

गुणस्था०	ज्ञाना०	दर्शना०	वेदनीय	मोहनीय	आयुः	नाम	गोत्र	अन्तराय
ओघे	१	३	२	१०	२	५	२	१
मिथ्यादृष्टौ	१	१	२	१	२	२	२	१
सास्वादने	१	१	२	१	२	२	२	१
मिश्रे	१	१	२	१	०	२	१	१
अविरते	१	१	२	१	२	३	१	१
देशविरते प्रमत्ते च	१	१	२	१	१	२	१	१
अप्रमत्ते	१	१	१	१	१—०	४	१	१
अपूर्वकरणे	१	२	१	१	०	५	१	१
अनिवृत्तिकरणे	१	१	१	५	०	१	१	१
सूक्ष्मसम्पराये	१	१	१	०	०	१	१	१
उ० क्षी० च०	०	०	१	०	०	०	०	०

॥ ओघे शु०नाम्नो बं०स्था०भङ्ग०॥स०४६३५

बन्धस्था०	भङ्गसं०	कस्य प्रा०	बन्धकाः
२८	८	देवप्रा० ८	तिर्यङ्नराः
२९	४६१६	प० म० प्रा० ४६०८	नरकवर्जत्रि०
		देवप्रा० ८	सम्य० म०
३०	९	देवप्रा० १	अप्र० मुनयः
		मनुजप्रा० ८	सम्य०देवाः
३१	१	देवप्रा० १	अ० मुनयः
	१	० १	,,

॥ शुक्ललेश्यायां मिथ्यादृष्टौ ॥ सर्वा० ४६१६

बन्धस्था०	भङ्गसं०	कस्य कति भङ्गाः	बन्धकाः
२८	८	देवप्रायोग्याः ८	तिर्यङ्नराः
२९	४६०८	मनुजप्रा० ४६०८	नारकवर्जत्रि०

॥ सास्वादनसम्यग्दृष्टौ ॥ स० ३२०८

बन्धस्था०	भङ्गसं०	कस्य प्रा० कति भङ्गाः	बन्धकाः
२८	८	देवप्रायोग्याः ८	तिर्यङ्नराः
२९	३२००	मनुजप्रा० ८	नरकवर्जत्रि०

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

॥ मिश्रदृष्टौ ॥ स० १६

बन्धस्था०	भङ्गसं०	कस्य प्रा०		बन्धकाः
२८	८	देवप्रा०	८	तिर्यङ्नराः
२९	८	मनुजप्रा०	८	देवाः

॥ अविरतसम्यग्दृष्टौ ॥ स० ३२

बन्धस्था०	भङ्गसं०	कस्य प्रा०		बन्धकाः
२८	८	देवप्रा०	८	तिर्यङ्नराः
२९	१६	,,	८	मनुजाः
		मनुजप्रा०	८	देवाः
३०	८	,,	८	,,

॥ देशविरतौ ॥ १६

बन्धस्था०	भङ्गसं०	कस्य प्रा०		बन्धकाः
२८	८	देवप्रा०	८	तिर्यङ्नराः
२९	८	,,	,,	नराः

॥ प्रमत्ते ॥ स० १६

बन्धस्था०	भङ्गसं०	कस्य प्रा०		बन्धकाः
२८ २९	८–८	देवप्रा०	८–८	नराः

॥ अप्रमत्ते अपूर्वकरणे च ॥ ४–५

बन्धस्था०	भङ्गसं०	कस्य प्रा०		बन्धकाः
२८	१	देवप्रा०	१	नराः
२९	१	,,	१	,,
३०	१	,,	१	,,
३१	१	,,	१	,,
१	१	,,	१	,,

॥ अनिवृत्तिकरणे सूक्ष्मसम्पराये च ॥

बन्धस्था०	भङ्गसं०	कस्य प्रा०		बन्धकाः
१	१	०	१	नराः

॥ अथ भव्यमार्गणाया विचारः क्रियते ॥

तत्र भव्ये बन्धप्रकृतयो बन्धस्थानानि नाम्नो बन्धस्थानभङ्गाश्चेति सर्वं पञ्चेन्द्रियवद्वाच्यम्। अभव्ये तु मिथ्यात्ववद् वाच्यमित्यल्पस्वातिरिक्तविषयत्वेन संक्षेपिता भव्यमार्गणा॥

॥ अथ सम्यक्त्वमार्गणा उच्यते ॥

सम्यक्त्वमार्गणायामौपशमिकसम्यग्दृष्टौ सामान्येनाविरते चायुर्बन्धाभावात् बन्धे क्रमेण सप्तसप्ततिः पञ्चसप्ततिश्च भवति । देशविरते षट्षष्टिर्भवति । प्रमत्ते द्विषष्टिर्भवति । अप्रमत्तादिष्वोघबन्धो वक्तव्यः । तथा क्षायोपशमिकक्षायिकमार्गणयोः सामान्येनैकोनाशीतिः । अविरतसम्यग्दृष्ट्यादिषु स्वस्वौघोक्तो बन्धो वाच्यः । ननु क्षायिकसम्यग्दृष्टेः देशविरत्यादौ सुरायुषो बन्धः कथं संभवति ?, न तावदेकभविकस्य तद्बन्धसंभवः, अबद्धायुष्कत्वेन क्षपकश्रेण्यारूढस्य तस्य केवलज्ञानोत्पत्तेः, नापि द्विभविकमाश्रित्य देवायुर्बन्धसंभवः क्षायिकसम्यग्दृष्टेः भवद्वयस्यासंभवात्, तथाहि–मिथ्यात्वक्षपणार्हः प्रथमसंहननी जिनविहरणकालसंभवी वर्षाष्टकस्योपरि वर्तमानोऽबद्धायुष्को देवनारकबद्धायुष्को युगलिकबद्धायुष्को वा मनुज एव नान्यगतिकः, तदुक्तं–"दंसणखवणस्सरिहो जिणकालीओ पुमडवासुवरिं" इति पञ्चसंग्रहे, अस्या वृत्तिः–"दर्शनं मिथ्यात्वसम्यग्मिथ्यात्वसम्यक्त्वरूपं तस्य क्षपणा

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तस्या अर्हो योग्यो 'जिनकालीओ' जिनविहरणकालसंभवी प्रथमसंहननी च 'पुम 'त्ति मनुष्यगतौ वर्तमानो जीवो वर्षाष्टकस्योपरि वर्तमान" इत्युक्तशेषस्य मिथ्यात्वक्षपणानर्हत्वेन क्षायिकसम्यग्दृष्टेर्भवद्वयासंभवः। शेषभवत्रिकस्य तु सुरायुषो बन्धाभाव एव, चतुर्भविकस्य तु सुरायुषो बन्धसद्भावेऽपि युगलिकस्य देशविरत्यादिगुणस्थानाभावेन तत्र बन्धाभाव एव। पञ्चभवास्तु क्षायिकसम्यग्दृष्टेर्न संभवत्येव, उत्कृष्टतोऽपि भवचतुष्कस्य प्रतिपादनात्, तथा चोक्तं पञ्चसंग्रहे—"तइय चउत्थे तम्मि व भवंमि सिज्झंति दंसणे खीणे। जं देवनिरयसंखाउचरमदेहेसु ते होन्ति ॥ १ ॥" वृत्तिः—"तृतीये चतुर्थे तस्मिन् वा भवे क्षीणे दर्शने—दर्शनमोहनीये सिध्यन्ति जीवाः। कुत इत्याह—यद्यस्मात्कारणात्क्षीणसप्तका देवनारकाः संख्येयवर्षायुष्केषु भवन्ति—उत्पद्यन्ते। चरमदेहेषु वा भवन्ति—चरमदेहा वा भवन्ति। ततस्तृतीये चतुर्थे तस्मिन् वा भवे सिध्यन्तीत्युच्यते। इयमत्र भावना—देवगतौ बद्धायुष्कास्ते सप्तकस्य क्षयं कृत्वा देवेषु मध्ये उत्पद्यन्ते, ये तु नरकेषु बद्धायुष्कास्ते नरकेषु, ततो देवभवान्नरकभवाद्वा समागत्य मनुष्या भूत्वा मोक्षं यान्तीति तृतीयभवे सिध्यन्तीत्युच्यते। ये तु तिर्यङ्मनुष्येष्वसंख्येयवर्षायुष्केषु मध्ये बद्धायुष्कास्ते सप्तकक्षयं कृत्वा तन्मध्ये उत्पद्यन्ते। ततो देवेषु देवभवात्समागत्य मनुष्या भूत्वा मोक्षं यान्तीति चतुर्थे भवे सिध्यन्तीत्यभिधीयते। ये त्वबद्धायुष्काः सप्तकं क्षपयन्ति ते चरमदेहा उच्यन्ते। ते च सप्तकक्षयानन्तरं क्षपकश्रेणिमेव प्रतिपद्यन्ते इति तस्मिन्नेव भवे सिद्ध्यन्ति" इति चेत् ?, अत्रोच्यते, येषां पञ्च भवाः शेषा भवन्ति तेषां देशविरत्यादौ सुरायुषो बन्धसंभवो नान्येषामिति। तृतीयभवे चतुर्थभवे मोक्षगमनं तु प्रायोवृत्त्योक्तमित्यवसीयते, तेन केषाञ्चित् क्षायिकसम्यग्दृष्टीनां भवाः पञ्चेति स्वीकारे तु बन्धस्वामित्वोक्तो देशविरत्यादौ सुरायुर्बन्धोऽपि संगच्छते। भवपञ्चकास्वीकारे च क्षायिकसम्यग्दृष्टीनां दुःप्रसहकृष्णादीनां का गतिरिति वक्तव्यम्। न चैतत्स्वमनीषिकया विजृम्भितं, दुःप्रसहादीनां न्यायाचार्यैरपि पञ्च भवा उक्ताः, तदुक्तं कर्मप्रकृतिवृत्तौ—"इदं च प्रायोवृत्त्योक्तमिति संभाव्यते, यतः क्षीणसप्तकस्य कृष्णस्य पञ्चमभवेऽपि मोक्षगमनं श्रूयते, उक्तं च—"नरया तु नरभवम्मि देवो होऊण पंचमे कप्पे। तत्तो चुओ समाणो बारसमो अममतित्थयरो ॥ १ ॥" इति। इत्थमेव दुःप्रसहादीनामपि क्षायिकसम्यक्त्वमागमोक्तं युज्यत इति यथागमं विभावनीयम्" इति। मिश्रदृष्टौ चतुःसप्ततिः। सास्वादनसम्यग्दृष्टावेकोत्तरशतम्। मिथ्यादृष्टौ सप्तदशाग्रशतं बन्धे प्राप्यते। औपशमिकसम्यग्दृष्टौ मिश्रदृष्टौ चायुषो बन्धस्थानानि न सन्ति। शेषं सर्वं स्वस्वगुणस्थानोक्तमवसेयम्। नाम्नो बन्धस्थानभङ्गा उपशमसम्यग्दृष्टौ क्षायिकसम्यग्दृष्टौ च पञ्चत्रिंशत्पञ्चत्रिंशत् भवन्ति। क्षायोपशमिकसम्यग्दृष्टौ चतुस्त्रिंशद्भङ्गा भवन्ति। मिश्रदृष्टौ षोडश, सास्वादनेऽष्टाधिकषण्णवतिशतानि भवन्ति। मिथ्यादृष्टौ त्रयोदशसहस्राणि नवशतानि षड्विंशत्यधिकानि च। यन्त्राणि यथापूर्वं द्रष्टव्यानीति समाप्ता सम्यक्त्वमार्गणा ॥

॥ अथ सञ्ज्ञयाहारकमार्गणे आरभ्येते ॥

सञ्ज्ञिनि आहारके च बन्धादिकं सर्वं गुणस्थानोक्तबन्धवद्वाच्यम्। अनाहारकमार्गणायां

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

कार्मणकाययोगवत्सर्वं वक्तव्यमिति । असञ्ज्ञिनि मिथ्यादृष्टौ सप्तदशोत्तरशतं सास्वादने चैकोत्तरशतं बन्धे प्राप्यत इति । यद्यपि सास्वादनेऽसञ्ज्ञिनि देवप्रायोग्यबन्धाभावेन देवत्रिकवैक्रियद्विकरूपप्रकृतिपञ्चकस्य बन्धो न संभवति, तथापि बन्धस्वामित्वे एकोत्तरशतस्योक्तत्वेनास्माभिरपि तथैवोक्तं तत्त्वं पुनः तद्विदो विदन्तीत्येवं द्वे अपि मार्गणे संक्षेपेण विचारिते । तत्समाप्तौ च मार्गणासु प्रारब्धो बन्धादिविचारोऽपि समाप्तिं प्राप्नोतीति विज्ञेयं सुहृद्भिः स्वयम् ॥

अधुना मार्गणासु पतद्ग्रहप्रकृतय उच्यन्ते—तत्रायुषः पतद्ग्रहप्रकृतयो न वाच्याः संक्रमाभावात् । मोहनीये सम्यक्त्वमिश्रयोः बन्धाभावेऽपि तयोः सम्यग्दृष्ट्यादौ पतद्ग्रहो वक्तव्यः । उच्चगोत्रोद्वलनानन्तरं नीचगोत्रस्य बन्धसत्त्वेऽपि तस्योच्चगोत्रस्य पुनर्बन्धाभावात् प्रतिग्रहता न वाच्या, शेषं सर्वं प्रायेण बन्धसमं वक्तव्यमिति । तथा च नरकगतिसामान्ये रत्नप्रभादित्रिके चौघे प्रतिग्रहप्रकृतीनां एकाग्रशतं भवति । मिथ्यात्वेऽष्टनवतिः । सास्वादने चतुर्नवतिः । मिश्रे सप्ततिः । अविरते च त्रिसप्ततिरिति । पङ्कादित्रिके ता एव जिनविहीना बन्धप्रकृतयो वाच्या इति ।

॥ नरकगतिसामान्ये रत्नप्रभादित्रिके पङ्कादित्रिके च प्रतिग्रहप्रकृतियन्त्रम् ॥

गुणस्था०	ज्ञाना०	दर्शना०	वेदनीय	मोहनीय	नाम	गोत्र	अन्तराय	सर्वाग्रम्
ओघे	५	९	२	२८	५०–४९	२	५	१०१–१००
मिथ्यात्वे	५	९	२	२६	४९	२	५	९८
सास्वादने	५	९	२	२४	४७	२	५	९४
मिश्रे	५	६	२	१९	३२	१	५	७०
अविरते	५	६	२	२१	३३–३२	१	५	७३–७२

सप्तमावनावोघे शतं मिथ्यात्वे पञ्चनवतिः सास्वादने एकनवतिः मिश्रे सप्ततिरविरते द्वासप्ततिश्चेति ।

॥ सप्तमावनौ प्रतिग्रहप्रकृतियन्त्रम् ॥

गुणस्था०	ज्ञाना०	दर्शना०	वेदनीय	मोहनीय	नाम	गोत्र	अन्तरा०	सर्वाग्रम्
ओघे	५	९	२	२८	४९	२	५	१००
मिथ्यात्वे	५	९	२	२१	४७	१	५	९५

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सास्वादने	५	९	२	२४	४५	१	५	९१
मिश्रे	५	६	२	१९	३२	१	५	७०
अविरते	५	६	२	२१	३२	१	५	७२

प्रतिग्रहस्थानानि मोहनीयवर्जानां सप्तानां कर्मणां सर्वत्र बन्धस्थानवद्वाच्यानि । मोहनीयस्य प्रतिग्रहस्थानानि चत्वारि भवन्ति, तद्यथा—द्वाविंशतिरेकविंशतिरेकोनविंशतिः सप्तदशेति । तत्र मिथ्यादृष्टावष्टाविंशतिसत्ताकस्य सप्तविंशतिसत्ताकस्य वा द्वाविंशतिप्रकृतीनां प्रतिग्रहस्थानं, उद्वलितसम्यक्त्वमिश्रयोरनादिमिथ्यादृष्टेर्वा षड्विंशतिसत्ताकस्य मिथ्यादृष्टौ त्वेकविंशतिप्रकृतिरूपं पतद्ग्रहस्थानम्, तथा सास्वादनेऽष्टाविंशतिसत्ताकस्याप्येकविंशतिप्रकृतिरूपं प्रतिग्रहस्थानम्, मिश्रगुणस्थाने सप्तदशप्रकृतिरूपं प्रतिग्रहस्थानं भवति । यद्वा क्षायिकसम्यग्दृष्टेः सप्तदशप्रकृतिरूपं प्रतिग्रहस्थानं भवति । इदं प्रतिग्रहस्थानं रत्नप्रभां विहाय नान्यासु पृथिवीषु भवति, यतो रत्नप्रभायामेव क्षायिकसम्यग्दृष्टिरुत्पद्यते न शेषासु, तदुक्तं पञ्चसंग्रहवृत्तौ श्रीमलयगिरिपादैः—"तिर्यङ्मनुष्यो वा ससम्यक्त्वो द्वितीयादिषु नरकपृथिवीषु न गच्छति नापि तत आगच्छति" इति । मतान्तरेण क्षायिकसम्यग्दृष्टिस्तृतीयस्यामपि गच्छति, तन्मते रत्नप्रभात्रिके सप्तदशप्रकृतिरूपं प्रतिग्रहस्थानं भवति, तदुक्तं तन्मतेन—"क्षायिकसम्यग्दृष्टयस्तृतीयस्यामपि नरकपृथिव्यां गच्छन्ति" इति । विवाहप्रज्ञप्त्यभिप्रायेण यद्यपि ससम्यक्त्वः षष्ठनरकपृथिवीं यावद्गच्छति, तदुक्तं मलयगिरिपादैः पञ्चसंग्रहवृत्तौ—"नरतिरश्चामन्यतरोऽविरतसम्यग्दृष्टिः पूर्वबद्धायुः क्षायोपशमिकसम्यक्त्वेन गृहीतेन व्याख्याप्रज्ञप्त्याद्यभिप्रायतः षष्ठनरकपृथिव्यामपि नारकत्वेनोत्पद्यते । ततो वोद्धृत्य क्षायोपशमिकसम्यक्त्ववानत्र मनुष्येषु मध्ये समुत्पद्यते" इति, तथापि तत्र सम्यग्दृष्टेः सप्तदशप्रकृतिरूपं प्रतिग्रहस्थानं न भवति, यतः क्षायिकसम्यग्दृष्टिस्तत्र न गच्छति । अविरतसम्यग्दृष्टावौपशमिकसम्यग्दृष्टेः क्षायोपशमिकसम्यग्दृष्टेर्वैकोनविंशतिप्रकृतिरूपं प्रतिग्रहस्थानं भवति । नाम्नः प्रतिग्रहस्थानानि भङ्गास्तद्यन्त्राणि च बन्धस्थानभङ्गयन्त्रवद्वाच्यानि । अतः परं प्रायेण प्रतिग्रहप्रकृतीन् मोहनीयस्य प्रतिग्रहस्थानानि च वक्ष्यामो न शेषमिति ।

॥ नरकगतौ मोहस्य प्रति० स्थानयन्त्रम् ॥

प्रति० स्था०	२२	२१	१९	१७	अविरते १७ रत्नप्रभायाम्, मतान्तरेणाद्यत्रिके, न शेषासु ।
ओघे	,,	,,	,,	,,	
मिथ्यात्वे	,,	,,	०	०	
सास्वादने	०	,,	०	०	
मिश्रे	०	०	०	,,	
अविरते	०	०	,,	,,	

अथ तिर्यग्गतौ पतद्ग्रहप्रकृतय उच्यन्ते—तत्र सामान्येन तिर्यग्गतौ पञ्चदशाग्रशतं प्रतिग्रहे भवति, जिनाहारकद्विकायुश्चतुष्करूपाणां प्रतिग्रहाभावात् । मिथ्यात्वे सम्यक्त्वमिश्रवर्जाः शेषाः त्रयोदशाग्रशतं पतद्ग्रहे प्राप्यते । सास्वादनसम्यग्दृष्टौ नरकद्विकस्थावरजातिचतुष्कातपहुण्डसेवार्त्तनपुंसकमिथ्यात्ववर्जाः शेषा अष्टानवतिः प्राप्यते । मिश्रे बन्धो

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

त्वेकोनसप्ततिः प्रतिग्रहे भवति । अविरतसम्यग्दृष्टौ सैवैकोनसप्ततिः सम्यग्मिथ्यात्वयुतै-कसप्ततिर्भवति । देशविरते सैवैकसप्ततिरप्रत्याख्यानचतुष्कविहीना सप्तषष्टिः प्रतिग्रहे प्राप्यते । अपर्याप्ततिर्यग्गतौ सामान्येन मिथ्यादृष्टौ च सप्ताग्रशतं प्रतिग्रहे प्राप्यते, आयु-श्चतुष्कजिनाहारकद्विकवैक्रियद्विकसुरद्विकनरकद्विकसम्यक्त्वमिश्ररूपाणां पञ्चदशप्रकृती-नामप्राप्यमाणत्वात् ।

॥ पर्याप्ततिर्यग्गतौ प्रतिग्रहप्रकृतियन्त्रम् ॥

गुणस्था०	ज्ञानाव०	दर्शना०	वेदनीय	मोहनीय	आयुः	नाम	गोत्र	अन्तराय	सर्वाग्रम्
ओघे	५	९	२	२८	०	६४	२	५	११५
मिथ्यात्वे	५	९	२	२६	०	६४	२	५	११३
सास्वादने	५	९	२	२४	०	५१	२	५	९८
मिश्रे	५	६	२	१९	०	३१	१	५	६९
अविरते	५	६	२	२१	०	३१	१	५	७१
देशविरते	५	६	२	१७	०	३१	१	५	६७

॥ अपर्याप्ततिर्यग्गतौ प्रतिग्रहप्रकृतियन्त्रम् ॥

गुणस्था०	ज्ञाना०	दर्शना०	वेदनीय	मोहनीय	आयुः	नाम	गोत्र	अन्तराय	सर्वाग्रम्
ओघे	५	९	२	२६	०	५८	२	५	१०७
मिथ्यात्वे	५	९	२	२६	०	५८	२	५	१०७

मोहनीयस्य पञ्च प्रतिग्रहस्थानानि भवन्ति, तद्यथा—द्वाविंशतिरेकविंशतिरेकोनविंशतिः सप्तदश पञ्चदशेति । तत्र द्वाविंशतिः सम्यक्त्वमिश्रवतां मिथ्यादृशामेकविंशतिरुद्वलितस-म्यक्त्वमिश्रवतां मिथ्यादृशां भवति, अष्टाविंशतिसत्ताकानां सासादनसम्यग्दृशां वैकविं-शतिः भवति । मिश्रदृष्टीनां सप्तदशप्रकृतिरूपं प्रतिग्रहस्थानं भवति । एकोनविंशतिरूपम-विरतसम्यग्दृशामुपशमसम्यग्दृशां वेदकसम्यग्दृष्टीनां वा भवति । सप्तदशप्रकृतिरूपं तु प्रति-ग्रहस्थानं क्षायिकसम्यक्त्ववतां युगलिकतिरश्चां भवति । देशविरतौ पञ्चदशप्रकृतिरूपं प्रति-ग्रहस्थानमौपशमिकसम्यग्दृष्टीनां वेदकसम्यग्दृष्टीनां वा भवति । त्रयोदशप्रकृतिरूपं तु प्रति-ग्रहस्थानं देशविरतानां तिरश्चां न भवत्येव, क्षायिकसम्यक्त्ववतां संख्यातवर्षायुष्केषु तिर्य-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

क्ष्वनुत्पादादिति । अपर्याप्ततिरश्चां द्वाविंशतिप्रकृतिरूपमुद्वलितमिश्रसम्यक्त्वत्वतामनादि-मिथ्यादृशां वैकविंशतिप्रकृतिरूपं च प्रतिग्रहस्थानं भवतीति ।

॥ पर्याप्ततिर्यग्गतौ मोहस्य प्र० यन्त्रम् ॥

प्रति० स्था०	२२	२१	१९	१७	१५
ओघे	,,	,,	,,	,,	,,
मिथ्यादृष्टौ	,,	,,	०	०	०
सास्वादने	०	,,	०	०	०
मिश्रे	०	०	०	,,	०
अविरते	०	०	,,	,,	०
देशविरते	०	०	०	०	,,

॥ अपर्याप्ततिर्यग्गतौ प्रति० स्थानयन्त्रम् ॥

प्रतिग्रहस्थाने	२२	२१
ओघे, मि० च	,,	,,

तथा मनुजगतौ प्रतिग्रहप्रकृतय उच्यन्ते—तत्र सामान्येनायुश्चतुष्कवर्जमष्टादशाग्रशतं प्रतिग्रहे प्राप्यते, मिथ्यादृष्टिगुणस्थाने जिनाहारकद्विकमिश्रसम्यक्त्ववर्जमष्टादशाग्रशतमेव त्रयोदशाग्रशतं प्रतिग्रहे प्राप्यते । सास्वादने नरकद्विकस्थावरचतुष्कजातिचतुष्कातपहुण्डसेवार्त्तमिथ्यात्वनपुंसकवर्जं त्रयोदशाग्रशतमेवाष्टनवतिः प्रकृतयः प्रतिग्रहे भवन्ति । मिश्रे तिर्यग्द्विकदौर्भाग्यत्रिकाद्यसंहननपञ्चकमध्याकृत्युद्योताप्रशस्तखगतिमनुजद्विकौदारिकद्विकस्त्यानर्द्धित्रिकानन्तानुबन्धिचतुष्कस्त्रीवेदनीचगोत्ररूपैकोनत्रिंशद्वर्जाष्टानवतिरेवैकोनसप्ततिः प्रतिग्रहे प्राप्यते । अविरतसम्यग्दृष्टौ सैवैकोनसप्ततिः जिनसम्यक्त्वमिश्रयुता द्वासप्ततिः प्रतिग्रहे प्राप्यते । देशविरतावप्रत्याख्यानकषायचतुष्कवर्जा द्वासप्ततिरेवाष्टषष्टिः प्रतिग्रहे प्राप्यते । प्रमत्तगुणस्थाने प्रत्याख्यानकषायचतुष्कवर्जाष्टषष्टिः चतुष्षष्टिः भवति । अरतिशोकास्थिराशुभायशःकीर्त्तिवर्जाहारकद्विकयुता षष्टिरप्रमत्ते प्राप्यते । अपूर्वकरणप्रथमभागेऽपि सा एव षष्टिः भवति । अपूर्वकरणद्वितीयादिभागपञ्चके निद्राद्विकवर्जा षष्टिरष्टपञ्चाशद्भवति । सुरद्विकपञ्चाक्षवैक्रियाहारकद्विकाद्यसंस्थानाप्रशस्तखगतिपराघातोच्छ्वासजिनत्रसनवकनामध्रुवबन्धिनवकवर्जाष्टपञ्चाशदेवाष्टाविंशतिरपूर्वकरणसप्तमभागे भवति । हास्यरतिभयजुगुप्साचतुष्कवर्जाष्टाविंशतिरेव चतुर्विंशतिरनिवृत्तिप्रथमभागे भवति । अनिवृत्तिद्वितीयभागे पुंवर्जा चतुर्विंशतिरेव त्रयोविंशतिर्भवति । सैवानिवृत्तितृतीयभागे संज्वलनक्रोधवर्जा द्वाविंशतिर्भवति । चतुर्थभागे संज्वलनमानवर्जैकोनविंशतिर्भवति । पञ्चमभागे मायावर्जैकोनविंशतिरेव विंशतिर्भवति । संज्वलनलोभवर्जा विंशतिरेवैकोनविंशतिः सूक्ष्मसम्पराये भवति । उपशान्तेऽसातवेदनीयज्ञानावरणपञ्चान्तरायपञ्चदर्शनावरणचतुष्कोच्चगोत्रयशःकीर्तिरूपसप्तदशवर्जैकोनविंशतिरेव द्वे प्रकृती पतद्ग्रहे भवत इति । अपर्याप्तमनुजगतौ सामान्ये मिथ्यात्वे चायुश्चतुष्कजिनाहारकद्विकदेवद्विकवैक्रियद्विकनरकद्विकसम्यक्त्वमिश्ररूपाणामप्राप्यमाणत्वात् सप्ताग्रशतं प्रतिग्रहे प्राप्यते इति ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

॥ पर्याप्तमनुगतौ प्रतिग्रहप्रकृतियन्त्रम् ॥

गुणस्था०	ज्ञाना०	दर्शना०	वेदनीय	मोहनीय	नाम	गोत्र	अन्तराय	सर्वाग्रम्
ओघे	५	९	२	२८	६७	२	५	११८
मिथ्यात्वे	५	९	२	२६	६४	२	५	११३
सास्वादने	५	९	२	२४	५१	२	५	९८
मिश्रे	५	६	२	१९	३१	१	५	६९
अविरते	५	६	२	२१	३२	१	५	७२
देशविरते	५	६	२	१७	३२	१	५	६८
प्रमत्ते	५	६	२	१३	३२	१	५	६४
अप्र०अपू० १ च	५	६	१	११	३१	१	५	६०
अपू० २-६	५	४	१	११	३१	१	५	५८
अपू० ७ मे	५	४	१	११	१	१	५	२८
अनि० प्र०	५	४	१	७	१	१	५	२४
अनि० द्वि०	५	४	१	६	१	१	५	२३
अनि० तृ०	५	४	१	५	१	१	५	२२
अनि० च०	५	४	१	४	१	१	५	२१
अनि० पं०	५	४	१	३	१	१	५	२०
सूक्ष्म०	५	४	१	२	१	१	५	१९
उपशान्ते	०	०	०	२	०	०	०	२

॥ अपर्याप्तमनुजगतौ प्रतिग्रहप्रकृतियन्त्रम् ॥

गुणस्था०	ज्ञाना०	दर्शना०	वेदनीय	मोहनीय	नाम	गोत्र	अन्तराय	सर्वाग्रम्
ओघे०मि० च	५	९	२	२६	५८	२	५	१०७

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अथ मनुजगतौ मोहनीयस्य प्रतिग्रहस्थानान्यष्टादश भवन्ति, तद्यथा—द्वाविंशतिरेकविंशतिरेकोनविंशतिरष्टादश सप्तदश पञ्चदश चतुर्दश त्रयोदशैकादश दश नव सप्त षट् पञ्च चतुस्त्रीणि द्वे एकं चेति। तत्र मिथ्यादृष्टौ षोडशकषायहास्याद्यन्यतरयुगलभयजुगुप्सान्यतमवेदमिथ्यात्वरूपद्वाविंशतिप्रकृतिरूपं प्रतिग्रहस्थानं भवति। अनादिमिथ्यादृष्टेरुद्वलितसम्यक्त्वमिश्रस्य मिथ्यादृष्टेर्वा सास्वादनस्य च मिथ्यात्ववर्जं द्वाविंशतिप्रतिग्रहस्थानमेवैकविंशतिप्रकृतिरूपं प्रतिग्रहस्थानं भवति। अनन्तानुबन्धिचतुष्कवर्जमेकविंशतिप्रकृतिरूपमेव मिश्रे अविरतसम्यग्दृष्टौ क्षायिकसम्यग्दृष्टेश्च सप्तदशप्रकृतिरूपं प्रतिग्रहस्थानं भवति। तदेव मिश्रसम्यक्त्वयुतमेकोनविंशतिप्रकृतिरूपं प्रतिग्रहस्थानमविरतसम्यग्दृष्टावौपशमिकसम्यग्दृष्टेर्वेदकसम्यग्दृष्टेर्वा भवति। अविरतसम्यग्दृष्टावेव मिथ्यात्वे क्षीणे वेदकसम्यग्दृष्टेः मिश्रव्यतिरिक्तमेकोनविंशतिप्रकृतिरूपमेवाष्टादशप्रकृतिरूपं भवति। देशविरतावविरतसम्यग्दृष्टिसत्कानि त्रीण्यप्यप्रत्याख्यानकषायविहीनानि त्रयोदशचतुर्दशपञ्चदशप्रकृतिरूपाणि त्रीणि भवन्ति। प्रमत्तादित्रिके प्रत्याख्यानकषायविहीनानि देशविरतोक्तानि एकादशदशनवरूपाणि त्रीणि भवन्ति। अनिवृत्तिकरणे शेषाण्येकादीनि सप्तपर्यन्तानि सप्त भवन्ति। तत्र संज्वलनचतुष्कपुंवेदमिश्रसम्यक्त्वरूपं सप्तप्रकृत्यात्मकम्, संज्वलनचतुष्कमिश्रसम्यक्त्वरूपं षट्प्रकृत्यात्मकम्, संज्वलनमानमायालोभमिश्रसम्यक्त्वरूपं यद्वा संज्वलनचतुष्कपुंवेदरूपं वा पञ्चप्रकृत्यात्मकम्, संज्वलनमायालोभमिश्रसम्यक्त्वरूपं संज्वलनचतुष्करूपं वा चतुष्प्रकृत्यात्मकम्, लोभमिश्रसम्यक्त्वरूपं संज्वलनमानमायालोभरूपं वा त्रिप्रकृत्यात्मकम्, मायालोभरूपं मिश्रसम्यक्त्वरूपं वा द्विप्रकृतिरूपम्, लोभरूपं चैकप्रकृत्यात्मकं प्रतिग्रहस्थानं भवति। मिश्रसम्यक्त्वरूपं केवलं द्विप्रकृत्यात्मकं प्रतिग्रहस्थानं सूक्ष्मसम्पराये उपशान्तमोहे च भवतीति।

॥ पर्याप्तमनुजगतौ मोहनीयस्य प्रतिग्रहस्थानयन्त्रम् ॥

प्रतिग्रहस्था०	२२	२१	१९	१८	१७	१५	१४	१३	११	१०	९	७	६	५	४	३	२	१
मिथ्यात्वे	,,	,,	०	०	०	०	०	०	०	०	०	०	०	०	०	०	०	०
सास्वादने	०	,,	०	०	०	०	०	०	०	०	०	०	०	०	०	०	०	०
मिश्रे	०	०	०	०	,,	०	०	०	०	०	०	०	०	०	०	०	०	०
अविरते	०	०	,,	,,	,,	०	०	०	०	०	०	०	०	०	०	०	०	०
देशविरते	०	०	०	०	०	,,	,,	,,	०	०	०	०	०	०	०	०	०	०
प्रमत्ते	०	०	०	०	०	०	०	०	,,	,,	,,	०	०	०	०	०	०	०

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अप्रमत्ते	०	०	०	०	०	०	०	०	,,	,,	,,	०	०	०	०	०	०	०
अपूर्वकरणे	०	०	०	०	०	०	०	०	,,	,,	,,	०	०	०	०	०	०	०
अनिवृत्तिकरणे	०	०	०	०	०	०	०	०	०	०	०	,,	,,	,,	,,	,,	,,	,,
सूक्ष्म० उप० च	०	०	०	०	०	०	०	०	०	०	०	०	०	०	०	०	,,	०

तथाऽपर्याप्तमनुजगतौ द्वाविंशतिप्रकृतिरूपमुद्वलितमिश्रसम्यक्त्ववतामनादिमिथ्यादृशां वैकत्रिंशतिप्रकृतिरूपं प्रतिग्रहस्थानं भवतीति ।

॥ अपर्याप्तमनुजगतौ ॥

प्रति० स्थाने	२२	२१
ओघे मि० च	,,	,,

तथा देवगतौ सामान्येन चतुरग्रशतं पतद्ग्रहे भवति; परं तद् देवस्यौघबन्धादायुर्द्विकमपहृत्य सम्यक्त्वमिश्रयोः प्रक्षेपेण चेति विज्ञेयम् । मिथ्यादृष्टौ जिनसम्यक्त्वमिश्रवर्जमेकोत्तरशतं प्रतिग्रहे प्राप्यते । सास्वादने चतुर्नवतिरेकेन्द्रियजात्यातपस्थावरसेवार्त्तहुण्डनपुंसकमिथ्यात्वरूपसप्तकवर्जनात् । मिश्रे सप्ततिः, तिर्यग्द्विकदुर्भाग्यत्रिकमध्यमाकृतिसंहननचतुष्कोद्योताप्रशस्तखगतिस्त्यानर्द्धित्रिकानन्तानुबन्धिकषायचतुष्कनीचगोत्रस्त्रीवेदरूपचतुर्विंशतीनां वर्जनात् । अविरतसम्यग्दृष्टौ सैव सप्ततिः जिनसम्यक्त्वमिश्रयुता त्रिसप्ततिः प्रतिग्रहे प्राप्यते । भवनपतिव्यन्तरज्योतिष्केष्वोघे त्र्युत्तरशतं प्राप्यते, जिनस्य बन्धाभावेन पतद्ग्रहाभावात् । मिथ्यात्वे मिश्रसम्यक्त्ववर्जमेकोत्तरशतं भवति । सास्वादने चतुर्नवतिः । मिश्रे सप्ततिः । अविरते द्वासप्ततिः प्राप्यते, मिश्रसम्यक्त्वप्रक्षेपादिति । सौधर्मेशानयोरोघे चतुरग्रशतं मिथ्यात्वे त्र्युत्तरशतं सास्वादने चतुर्नवतिर्मिश्रे सप्ततिरविरते त्रिसप्ततिश्चेति । सनत्कुमारादिसहस्रारपर्यन्तेष्वोघे एकोत्तरशतम्, एकेन्द्रियजाति स्थावरातपनाम्नां बन्धाभावेन प्रतिग्रहाभावात्, मिथ्यात्वेऽष्टानवतिः, जिनमिश्रसम्यक्त्वानां प्रतिग्रहाभावात्, सास्वादने चतुर्नवतिः, हुण्डसेवार्त्तनपुंसकमिथ्यात्वरूपाणां प्रतिग्रहाभावात्, मिश्रे सप्ततिः, तिर्यग्द्विकदुर्भाग्यत्रिकमध्यमाकृतिसंहननचतुष्काशुभखगत्युद्योतानन्तानुबन्धिचतुष्कस्त्रीवेदनीचगोत्रस्त्यानर्द्धित्रिकरूपाणां चतुर्विंशतीनां बन्धाभावेन प्रतिग्रहाभावात्, अविरते त्रिसप्ततिः, जिनसम्यक्त्वमिश्ररूपाणां तिसृणां प्रक्षेपाच्चेति । आनतादिग्रैवेयकपर्यवसानेषु सामान्येनाष्टानवतिः, आयुर्जातिस्थावरचतुष्टयदेवनरकवैक्रियतिर्यग्द्विकातपोद्योताहारकद्विकरूपाणां चतुर्विंशतिप्रकृतीनां पतद्ग्रहाभावात्, मिथ्यात्वे पञ्चनवतिः, मिश्रसम्यक्त्वजिननाम्नां पतद्ग्रहाभावात्, सास्वादने एकनवतिः, मिथ्यात्वनपुंसकहुण्डसेवार्तरूपाणां प्रकृतीनां प्रतिग्रहाभावात्, मिश्रे सप्ततिः, स्त्यानर्द्धित्रिकदुर्भगत्रिकानन्तानुबन्धिचतुष्कस्त्रीवेदनीचगोत्रमध्यमाकृतिसंहननचतुष्काशुभखगतिरूपाणामेकविंशतिप्रकृतीनां पतद्ग्रहाभावात्, अविरतसम्यग्दृष्टौ त्रिसप्ततिः, जिनसम्यक्त्वमिश्रप्रकृतीनां प्रक्षेपाच्च । अनुत्तरपञ्चके सामान्येऽविरतसम्यग्दृष्टौ च त्रिसप्ततिरेव प्रतिग्रहे प्राप्यत इति ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

॥ देवगतिसामान्ये प्रथमकल्पद्विकपर्यन्तेषु च प्रतिग्रहप्रकृतीनां यन्त्रम् ॥

गुणस्था०	ज्ञाना०	दर्शना०	वेदनीय	मोहनीय	आयुः	नाम	गोत्र	अन्तराय	सर्वाग्रम्
ओघे	५	९	२	२८	०	५२–५३	२	५	१०३–१०४
मिथ्यात्वे	५	९	२	२६	०	५२	२	५	१०१
सास्वादने	५	९	२	२४	०	४७	२	५	९४
मिश्रे	५	६	२	१९	०	३२	१	५	७०
अविरते	५	६	२	२१	०	३३	१	५	७३

॥ सनत्कुमारादिसहस्रारान्तेषु प्रतिग्रहप्रकृतियन्त्रम् ॥

गुणस्था०	ज्ञाना०	दर्शना०	वेदनीय	मोहनीय	आयुः	नाम	गोत्र	अन्तरा०	सर्वाग्रम्
ओघे	५	९	२	२८	०	५०	२	५	१०१
मिथ्यादृष्टौ	५	९	२	२६	०	४९	२	५	९८
सास्वादने	५	९	२	२४	०	४७	२	५	९४
मिश्रे	५	६	२	१९	०	३२	१	५	७०
अविरते	५	६	२	२१	०	३३	१	५	७३

॥ आनतादिग्रैवेयकपर्यन्तेषु पञ्चानुत्तरेषु च तुर्यगुणस्थाने प्रतिग्रहप्रकृतियन्त्रम् ॥

गुणस्था०	ज्ञाना०	दर्शना०	वेदनीय	मोहनीय	आयुः	नाम	गोत्र	अन्त०	सर्वाग्रम्
ओघे	५	९	२	२८	०	४७	२	५	९८
मिथ्यात्वे	५	९	२	२६	०	४६	२	५	९५
सास्वादने	५	९	२	२४	०	४४	२	५	९१
मिश्रे	५	६	२	१९	०	३२	१	५	७०
अविरते	५	६	२	२१	०	३३	१	५	७३

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अथ देवगतौ मोहनीयस्य प्रतिग्रहस्थानान्युच्यन्ते—तत्र सामान्येन देवगतौ चत्वारि प्रतिग्रहस्थानानि भवन्ति, तद्यथा—द्वाविंशतिरेकविंशतिरेकोनविंशतिः सप्तदशेति । मिथ्यादृष्टावष्टाविंशतिसत्ताकस्य सप्तविंशतिसत्ताकस्य वा द्वाविंशतिप्रकृतीनां प्रतिग्रहस्थानं भवति । उद्वलितसम्यक्त्वमिश्रस्य मिथ्यादृष्टेरनादिमिथ्यादृष्टेर्वा सासादने चैकविंशतिप्रकृतिरूपं प्रतिग्रहस्थानं भवति । मिश्रगुणस्थाने क्षायिकसम्यग्दृष्टेरविरते च सप्तदश प्रकृतिरूपं प्रतिग्रहस्थानं प्राप्यते । अविरतसम्यग्दृष्टावौपशमिकसम्यग्दृष्टेर्वेदकसम्यग्दृष्टेर्वैकोनविंशतिप्रकृतिरूपं प्रतिग्रहस्थानं भवति । अनुत्तरवासिनो देवान् विहाय सर्वत्रैवमेव मोहनीयस्थानानि वाच्यानि । अनुत्तरेषु तुर्यगुणस्थानसत्के सप्तदशैकोनविंशतिरूपे द्वे प्रतिग्रहस्थाने भवत इति ॥

॥देवगतौ मोह०प्रति०स्थानयन्त्रम् ॥

ओघेन	२२	२१	१९	१७	अनुत्तरवर्जेषु
मिथ्यात्वे	२२	२१	०	०	
सास्वादने	०	,,	०	०	
मिश्रे	०	०	०	१७	
अविरते	०	०	१९	१७	सर्वेषु

अथ जातिमार्गणायामेकेन्द्रियादिजातिचतुष्के ओघे मिथ्यात्वे च सप्ताग्रशतं प्रतिग्रहे प्राप्यते, जिनाहारकद्विकवैक्रियद्विकनरकद्विकदेवद्विकायुश्चतुष्कसम्यक्त्वमिश्ररूपाणामप्राप्यमाणत्वात् । सासादने चतुर्नवतिः प्रतिग्रहे प्राप्यते, जातिचतुष्कस्थावरचतुष्कातपहुण्डसेवार्त्तनपुंसकमिथ्यात्वरूपाणामप्राप्यमाणत्वात् । पञ्चेन्द्रियजातावोघेऽष्टादशाग्रशतम्, मिथ्यात्वे त्रयोदशाग्रशतम्, सासादनेऽष्टानवतिः, मिश्रे चतुःसप्ततिः, अविरते सप्तसप्ततिः, देशविरतेऽष्टषष्टिः, प्रमत्ते चतुःषष्टिः, अप्रमत्ते षष्टिः, अपूर्वकरणे प्रथमभागे षष्टिरपूर्वकरणद्वितीयादिभागपञ्चकेऽष्टपञ्चाशदपूर्वकरणसप्तमभागे चाष्टाविंशतिः,अनिवृत्तिकरणप्रथमभागे चतुर्विंशतिः, द्वितीयभागे त्रयोविंशतिः, तृतीयभागे द्वाविंशतिः, चतुर्थभागे एकविंशतिः, पञ्चमभागे च विंशतिः, सूक्ष्मसम्पराये एकोनविंशतिः, उपशान्ते च द्वे प्रकृती प्रतिग्रहे भवन्तीति । जातिचतुष्के द्वाविंशत्येकविंशतिरूपे द्वे मोहनीयस्य प्रतिग्रहस्थाने भवतः । पञ्चाक्षजातौ च मोहनीयस्य पतद्ग्रहस्थानानि सर्वाणि मनुजगतिवत् बोधव्यानीति ॥

॥ जातिमार्गणायां प्रतिग्रहप्रकृतियन्त्रम् ॥

जातयः	ओ०	मि०	सा०	मि०	अवि०	दे०	प्र०	अप्र० अपू० च	अपू० २–६	अपू० ७ मे	अनि० १–५	सू० स०	उ०
ए० ४	१०७	१०७	९४	०	०	०	०	०	०	०	०	०	०
पञ्चे०	११८	११३	९८	७४	७७	६८	६४	६०	५८	२८	२४-२३-२२ २१-२०	१९	२

कायमार्गणायां पृथिवीजलवनस्पतिमार्गणासु जातिचतुष्कवद्वाच्यम् । तैजसकवायुकायिकयोरोघे मिथ्यात्वे च चतुरग्रशतं प्रतिग्रहे प्राप्यते, आयुश्चतुष्कजिनाहारकद्विकवैक्रियद्विकदेवद्विकनरकद्विकसम्यक्त्वमिश्रमनुजद्विकोच्चगोत्ररूपाणामप्राप्यमाणत्वात् । मोहनीयप्रतिग्रहस्थाने जातिचतुष्कवत् वाच्ये, सासादनाभावाच्च तत्र न किमपि वक्तव्यमिति ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

त्रसकायमार्गणायां प्रतिग्रहप्रकृतयः मोहनीयप्रतिग्रहस्थानानि च पञ्चेन्द्रियवत् वाच्यानीति ॥

योगमार्गणायां मनोवागष्टके पञ्चाक्षवद्वाच्यम् । औदारिककाययोगे मनुजगतिवद्वाच्यम् । औदारिकमिश्रकाययोगे ओघे चतुर्दशाग्रशतं प्रतिग्रहे प्राप्यते, आहारकद्विकनरकद्विकायुश्चतुष्करूपाणामप्राप्यमाणत्वात् । मिथ्यादृष्टौ जिनसुरद्विकवैक्रियद्विकसम्यक्त्वमिश्ररूपाणामप्राप्यमाणत्वेन सप्ताग्रशतं प्रतिग्रहे प्राप्यते । सासादने चतुर्नवतिः प्रतिग्रहे प्राप्यते, स्थावरचतुष्कजातिचतुष्कातपहुण्डसेवार्त्तमिथ्यात्वनपुंसकवेदरूपाणां त्रयोदशप्रकृतीनां बन्धाभावेन प्रतिग्रहाभावात् । अविरतसम्यग्दृष्टौ द्वासप्ततिः प्रतिग्रहे प्राप्यते, स्त्यानर्द्धित्रिकानन्तानुबन्धिचतुष्कस्त्रीवेदनीचगोत्रदुर्भाग्यत्रिकतिर्यग्द्विकाद्यसंहननपञ्चकौदारिकद्विकमनुजद्विकमध्यमसंस्थानचतुष्काशुभखगत्योद्योतरूपैकोनत्रिंशत्प्रकृतीनां बन्धाभावेन प्रतिग्रहाभावात् जिनसुरद्विकवैक्रियद्विकसम्यक्त्वमिश्ररूपाणां प्रक्षेपाच्च । सयोगिनि सातस्य बन्धसद्भावेऽपि साम्परायिकबन्धाभावेन संक्रमप्रायोग्यस्यासातस्य सद्भावेऽपि प्रतिग्रहाभावः । मनोवागष्टके मोहनीयस्य प्रतिग्रहस्थानानि पञ्चाक्षवद्वाच्यानि । औदारिककाययोगिनो मनुजवद्वाच्यानि । औदारिकमिश्रकाययोगे मिथ्यादृष्टौ मोहनीयस्य द्वाविंशतिरेकविंशतिश्च प्रतिग्रहस्थानं भवति । सासादने एकविंशतिरूपं भवति । अविरतसम्यग्दृष्टौ सप्तदशप्रकृतिरूपं प्रतिग्रहस्थानं क्षायिकसम्यग्दृष्टेः एकोनविंशतिरूपं वेदकसम्यग्दृष्टेश्च भवतीति । कार्मणकाययोगेऽपि औदारिकमिश्रवत् प्रतिग्रहप्रकृतयो मोहनीयप्रतिग्रहस्थानानि च वाच्यानि, नवरमविरतसम्यग्दृष्टावौदारिकद्विकमनुजद्विकप्रथमसंहननरूपाणां पञ्चानां प्रकृतीनां देवगतौ बन्धसद्भावात्प्रतिग्रहत्वमपि तथारूपेण वेत्तव्यमिति ।

वैक्रियद्विककाययोगे सामान्यदेवगतिवत् पतिग्रहप्रकृतयः मोहनीयप्रतिग्रहस्थानानि च वाच्यानि । आहारकद्विके चतुष्षष्टिः प्रतिग्रहे प्राप्यते । आहारककाययोगेऽप्रमत्तगुणस्थानविवक्षायां त्वोघे षट्षष्टिः, प्रमत्ते चतुःषष्टिः, अप्रमत्ते च षष्टिरिति । मनोवागष्टकयन्त्रे पञ्चाक्षयन्त्रवद्वाच्ये, वैक्रियद्विकयन्त्रे देवगतिवद्वाच्ये, औदारिककाययोगस्य यन्त्रं च मनुजगतिवद्वाच्यमिति ॥

॥ औदारिकमिश्रे कार्मणकाययोगे च प्रतिग्रहप्रकृतियन्त्रम् ॥

बन्धस्था०	ज्ञाना०	दर्शना०	वेदनीय	मोहनीय	आयुः	नाम	गोत्र	अन्तराय	सर्वाग्रम्
ओघे	५	९	२	२८	०	६३	२	५	११४
मिथ्यात्वे	५	९	२	२६	०	५८	२	५	१०७
सास्वादने	५	९	२	२४	०	४७	२	५	९४
अविरतौ	५	६	२	२१	०	३२-३७	१	५	७२-७७
सयोगिनि	०	०	०	०	०	०	०	०	०

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

॥ आहारकद्विके प्रतिग्रहप्रकृतियन्त्रम् ॥

बन्धस्था०	ज्ञाना०	दर्शना०	वेदनीय	मोहनीय	आयुः	नाम	गोत्र	अन्तराय	सर्वाग्रम्
ओघे-प्रम० च	५	६	२	१३	०	३२	१	५	६४

॥ आहारकेऽप्रमत्तभावविवक्षायां प्रतिग्रहप्रकृतियन्त्रम् ॥

गुणस्था०	ज्ञाना०	दर्शना०	वेदनीय	मोहनीय	आयुः	नाम	गोत्र	अन्तराय	सर्वाग्रम्
ओघे	५	६	२	१३	०	३४	१	५	६६
प्रमत्ते	५	६	२	१३	०	३२	१	५	६४
अप्रमत्ते	५	६	१	११	०	३१	१	५	६०

वेदमार्गणायां वेदत्रयेऽपि मिथ्यादृष्ट्यादौ पञ्चाक्षवत्प्रतिग्रहप्रकृतयो वाच्याः। मोहनीयस्य प्रतिग्रहस्थानानि पुंसि पञ्चदश भवन्ति, तद्यथा–द्वाविंशतिरेकविंशतिरेकोनविंशतिरष्टादश सप्तदश पञ्चदश चतुर्दश त्रयोदशैकादश दश नव सप्त षट् पञ्च चतुरिति। नपुंसकस्त्रीवेदयोस्तु त्रयोदश भवन्ति, तद्यथा–द्वाविंशतिरेकविंशतिरेकोनविंशतिरष्टादश सप्तदश पञ्चदश चतुर्दश त्रयोदशैकादश दश नव सप्त पञ्चेति। तत्र मिथ्यादृष्टौ द्वाविंशत्येकविंशतिरूपे द्वे, सासादने एकविंशतिप्रकृतिरूपम्, मिश्रे सप्तदशप्रकृत्यात्मकम्, अविरते सप्तदशाष्टादशैकोनविंशतिरूपं त्रिकम्, देशविरते त्रयोदशचतुर्दशपञ्चदशरूपं त्रिकम्, प्रमत्ताप्रमत्तयोः नवदशैकादशरूपं त्रिकम्, अपूर्वकरणे नवैकादशरूपं द्विकं, अनिवृत्तिकरणे च शेषाणि सप्तषट्पञ्चचतूरूपाणि चत्वारि पुंसि, सप्तपञ्चरूपे च द्वे स्त्रीनपुंसकयोश्च भवन्तीति। कषायमार्गणायामाद्यद्वादशकषायेषु स्वस्वगुणस्थानोक्ता याः प्रतिग्रहप्रकृतयो यानि च बन्धस्थानानि तानि स्वयं वाच्यानि। संज्वलनचतुष्केऽपि पतद्ग्रहप्रकृतयः स्वगुणस्थानोक्ता वाच्याः। पतद्ग्रहस्थानानि संज्वलनक्रोधे द्विप्रकृतिरूपमेकप्रकृतिरूपं च, संज्वलनमाने च एकप्रकृतिरूपं त्यक्त्वा शेषाणि सर्वाणि प्रतिग्रहस्थानानि भवन्ति। संज्वलनमायालोभयोस्तु सर्वाणि भवन्ति। एषां भावना गुणस्थानद्वारेण संवेधाधिकारे वक्ष्यत इति। ज्ञानमार्गणायामज्ञानत्रिके ओघे मिथ्यात्वे च त्रयोदशाग्रशतम्, सास्वादनसम्यग्दृष्टावष्टानवतिः, मिश्रे च चतुःसप्ततिः प्रतिग्रहे प्राप्यत इति। केवलज्ञानमार्गणायां न सन्ति प्रतिग्रहप्रकृतयः प्रतिग्रहस्थानानि च। मतिश्रुतावधिज्ञानमार्गणासु ओघे एकोनाशीतिरविरते सप्ततिर्देशविरतेऽष्टषष्टिः प्रमत्ते चतुःषष्टिरप्रमत्ते षष्टिरपूर्वकरणे षष्टिरनिवृत्तिकरणे चतुर्विंशतिः सूक्ष्मसम्पराये एकोनविंशतिरुपशान्ते च द्वे प्रकृती भवन्ति। मनःपर्यवज्ञानमार्गणायामोघे षट्षष्टिः प्रमत्ते चतुःषष्टिरप्रमत्ते षष्टिरपूर्वकरणे षष्टिरनिवृत्तिकरणे चतुर्विंशतिः सूक्ष्मसम्पराये एकोनविंशतिरुपशान्तमोहे च द्वे प्रकृती भवन्तीति। अज्ञानत्रिके मोहनीयस्य प्रतिग्रहस्थानानि त्रीणि भवन्ति, तद्यथा–द्वाविंशतिरेकविंशतिः सप्तदश च। तत्र मिथ्यादृष्टौ द्वाविंशतिरेकविंशतिश्च, सासादने एकविंशतिः, मिश्रे सप्तदशप्रकृत्यात्मकं च भवतीति। मतिश्रुतावधिज्ञानमार्गणासु द्वाविंशत्येकविंशतिरूपे वर्जयित्वा शेषाणि सर्वाणि भवन्ति। मनःपर्यवज्ञानिनः द्वाविंशत्येकविंशत्येकोनविंशत्यष्टादशसप्तदशपञ्चदशचतुर्दशत्रयोदशरूपाणि वर्जयित्वा शेषाणि दश भवन्तीति।

संयमे अविरतमार्गणायामोघे षोडशाग्रशतम्, मिथ्यात्वे त्रयोदशाग्रशतम्, सासादनेऽष्टानवतिः, मिश्रे चतुःसप्ततिः, अविरते च सप्तसप्ततिर्भवति। देशविरतिमार्गणायामष्ट-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

षष्टिः प्राप्यते । परिहारविशुद्धावोघे षट्षष्टिः, प्रमत्ते चतुःषष्टिः, अप्रमत्ते च षष्टिर्भवति । सामायिकच्छेदोपस्थानीययोरोघे षट्षष्टिः, प्रमत्तादिषु च तत्तद्गुणस्थानोक्ताः प्रकृतयः प्रतिग्रहे प्राप्यन्ते । सूक्ष्मसम्पराये एकोनविंशतिः प्राप्यते । यथाख्याते द्वे भवतः । मोहनीयस्याविरतमार्गणायां प्रतिग्रहस्थानानि द्वाविंशत्येकविंशत्येकोनविंशत्यष्टादशसप्तदशरूपाणि पञ्च भवन्ति । देशविरते त्रयोदशचतुर्दशपञ्चदशरूपाणि त्रीणि भवन्ति । परिहारविशुद्धावेकादशदशनवरूपाणि त्रीणि भवन्ति । सामायिकच्छेदोपस्थापनीययोरेकादशदशनवसप्तषट्पञ्चचतुस्त्रिद्व्येकरूपाणि दश भवन्ति । सूक्ष्मसम्पराये यथाख्याते च द्विप्रकृत्यात्मकमेकमिति ।

दर्शनमार्गणायां चक्षुरचक्षुषोर्गुणस्थानोक्ताः सर्वा अपि प्रतिग्रहप्रकृतयः प्रतिग्रहस्थानानि च भवन्ति । अवधिदर्शनमार्गणायां मतिज्ञानवत् सर्वं वाच्यम् । सिद्धान्तिकाभिप्रायेणाचक्षुर्दर्शनवद्वा वाच्यम् । केवलदर्शनमार्गणायां न सन्ति प्रतिग्रहप्रकृतयः प्रतिग्रहस्थानानि चेति ।

लेश्यामार्गणास्वशुभलेश्यात्रिके ओघे षोडशाग्रशतं प्रतिग्रहे प्राप्यते, आहारकद्विकवर्जनात् । मिथ्यादृष्टौ सम्यक्त्वमिश्रजिनवर्जं त्रयोदशोत्तरशतं सासादनेऽष्टनवतिः मिश्रे चतुस्सप्ततिरविरतसम्यग्दृष्टौ सप्तसप्ततिश्च प्रतिग्रहे प्राप्यते । तेजोलेश्यायामोघे दशाग्रशतम्, नरकद्विकसूक्ष्मविकलत्रिकबन्धाभावात्, मिथ्यात्वे पञ्चोत्तरशतम्, आहारकद्विकजिनमिश्रसम्यक्त्वाभावात् । सासादने अष्टनवतिः, मिश्रे चतुस्सप्ततिः, अविरतसम्यग्दृष्टौ सप्तसप्ततिः, देशविरतावष्टषष्टिः, प्रमत्ते चतुष्षष्टिः, अप्रमत्ते च षष्टिः प्राप्यते । पद्मलेश्यायामोघे सप्तोत्तरशतं प्राप्यते । मिथ्यादृष्टौ द्व्युत्तरशतं भवति । सासादने अष्टनवतिः प्राप्यते । मिश्रे चतुस्सप्ततिर्भवति । अविरतसम्यग्दृष्टौ सप्तसप्ततिः प्राप्यते । देशविरतावष्टषष्टिर्भवति । प्रमत्ते चतुष्षष्टिरप्रमत्ते च षष्टिर्भवति । शुक्ललेश्यायामोघे चतुरग्रशतम्, मिथ्यादृष्टौ नवनवतिः, सासादने पञ्चनवतिः, मिश्रे चतुःसप्ततिः, अविरतादिषु च सप्तसप्तत्यादयस्तत्तद्गुणस्थानोक्ताः प्रतिग्रहप्रकृतयो वाच्याः । अशुभलेश्यात्रिके द्वाविंशत्येकविंशत्येकोनविंशतिसप्तदशरूपाणि चत्वारि प्रतिग्रहस्थानानि भवन्ति । तेजःपद्मयोः द्वाविंशत्येकविंशत्येकोनविंशतिसप्तदशपञ्चदशत्रयोदशैकादशनवरूपाण्यष्टप्रतिग्रहस्थानानि भवन्ति । शुक्ललेश्यायां सर्वाणि प्रतिग्रहस्थानानि भवन्तीति । भव्यमार्गणायां प्रतिग्रहप्रकृतयो मोहनीयस्थानानि च पञ्चाक्षवद्वाच्यानि । अभव्यमार्गणायां त्रयोदशाग्रशतं प्रतिग्रहे प्राप्यते सम्यक्त्वमिश्राहारकद्विकजिनाभावात् । मोहनीयप्रतिग्रहस्थानं त्वेकविंशतिप्रकृतिरूपमेकमेव भवतीति ।

सम्यक्त्वमार्गणायां वेदकसम्यक्त्वे ओघे एकोनाशीतिः प्रतिग्रहे प्राप्यते । अविरतसम्यग्दृष्टौ सप्तसप्ततिः प्राप्यते । देशविरतेऽष्टषष्टिः भवति । प्रमत्ते चतुष्षष्टिरप्रमत्ते च षष्टिः प्राप्यते । औपशमिकक्षायिकसम्यक्त्ववतोऽप्येवमेवाविरत्यादिगुणस्थानचतुष्के पतद्ग्रहप्रकृतयो वाच्याः । अपूर्वकरणादिषु स्वस्वगुणस्थानोक्ताः प्रतिग्रहप्रकृतयो वाच्याः नवरं क्षायिकसम्यग्दृष्टौ सर्वेषु गुणस्थानेषु सम्यक्त्वमिश्रवर्जाः वक्तव्याः । मिथ्यात्वसासादनमिश्रेष्वपि स्वस्वगुणस्थानोक्ताः प्रतिग्रहप्रकृतयो वाच्याः । वेदकसम्यग्दृष्टौ मोहनीयस्य प्रतिग्रहस्थानान्येकोनविंशत्यष्टादशपञ्चदशचतुर्दशैकादशदशरूपाणि षट् भवन्ति । क्षायिकसम्यग्दृष्टौ प्रतिग्रहस्थानानि सप्तदशत्रयोदशनवपञ्चचतुस्त्रिद्व्येकरूपाण्यष्टौ भवन्ति । औपशमिकसम्यग्दृष्टावेकोनविंशतिपञ्चदशैकादशसप्तषट्पञ्चचतुस्त्रिद्विरूपाणि नव प्रतिग्रहस्थानानि भवन्ति । मिथ्या-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

दृष्टौ द्वाविंशत्येकविंशतिरूपे, सासादने एकविंशतिरूपम् मिश्रे च सप्तदशप्रकृतिरूपं प्रतिग्रहस्थानं भवतीति । सञ्ज्ञिमार्गणायां प्रतिग्रहप्रकृतयो मोहनीयस्य प्रतिग्रहस्थानानि च पञ्चाक्षवदसञ्ज्ञिनि च विकलाक्षवत् वाच्यानीति ।

आहारकमार्गणायां पञ्चाक्षवदनाहारकमार्गणायां च कार्मणकाययोगवत्पतद्ग्रहप्रकृतयो मोहनीयप्रतिग्रहस्थानानि च वाच्यानीत्युक्तानि मार्गणास्थानेषु प्रतिग्रहस्थानानि तत्प्रकृतयश्च ॥

॥ अथ मार्गणासु सत्ताप्रकृतय उच्यन्ते ॥

यद्यपि सत्ताप्रकृतयः सत्त्वस्थानानि तदनुसृत्य संक्रमप्रकृतयः संक्रमस्थानानि च मुद्रितयन्त्रानुसारेण लिखितानि तथापि—"एकोनत्रिंशतं तिर्यक्पञ्चेन्द्रियमनुष्यप्रायोग्यं बध्नतः सासादनस्य सप्ताप्युदयस्थानानि, तत्रैकेन्द्रियविकलेन्द्रियतिर्यक्पञ्चेन्द्रियमनुष्यदेवनैरयिकाणां सासादनानां स्वस्वोदयस्थानेषु वर्त्तमानानामेकमेव सत्तास्थानमष्टाशीतिः । नवरं मनुष्यस्य त्रिंशदुदये वर्त्तमानस्योपशमश्रेणीतः प्रतिपततः सासादनस्य द्विनवतिः एवं त्रिंशद्बन्धकस्यापि" । "तत्राष्टाविंशतिं बध्नतः सासादनस्य द्वे उदयस्थाने—त्रिंशदेकत्रिंशच्च । अष्टाविंशतिर्हि सासादनस्य बन्धयोग्या देवगतिप्रायोग्या, न च करणापर्याप्तः सासादनो देवगतिप्रायोग्यां बध्नाति, ततः शेषा उदया नोत्पद्यन्ते । तत्र मनुष्यानधिकृत्य त्रिंशदुदये द्वे अपि ९२,८८, सत्तास्थाने, तिर्यक्पञ्चेन्द्रियानधिकृत्याष्टाशीतिरेव, द्विनवतेरुपशमश्रेणीतः प्रतिपात एव लाभात्, तिरश्चां चोपशमश्रेण्यसंभवात्, एकत्रिंशदुदये त्वष्टाशीतिरेव यतोऽसौ तिर्यक्पञ्चेन्द्रियाणामेव, न च तेषां द्विनवतिर्घटते" इति मलयगिरिकृतसप्ततिकावृत्तिं न्यायाचार्यकृतकर्मप्रकृतिवृत्तिं चानुसृत्य मनुष्यगतिभिन्नगतिसंभावितमार्गणासु सासादनभावे आहारकसप्तकं सत्तायां मुद्रितयन्त्रेषु स्वीकृतमपि नात्राधिकृतमुक्तवचनविरोधात्, यत्र च लिखितं तत्र यन्त्रानुसारेण बोध्यमिति ।

नरकगतौ देवायुर्वर्जं सप्तपञ्चाशच्छतमोघे मिथ्यादृष्टौ च भिन्नभिन्नजीवमाश्रित्य सत्तायां भवति । सास्वादने आहारकसप्तकजिनवर्जमेकोनपञ्चाशच्छतं मिश्रे आहारकसप्तकयुतं षट्पञ्चाशच्छतं भवति, 'वितिगुणे विणा तित्थं' इति वचनात् । अविरतसम्यग्दृष्टौ सामान्येन देवायुर्वर्जं सप्तपञ्चाशच्छतं भवति । क्षायिकसम्यग्दृष्टिमाश्रित्य सामान्येनैकोनपञ्चाशच्छतं भवति, देवतिर्यगायुर्दर्शनसप्तकाभावात्, एकं जीवमाश्रित्य तु जिननामाभावेन अष्टचत्वारिंशच्छतं जिनसत्त्वे आहारकसप्तकाभावेन च द्विचत्वारिंशच्छतं उभयाभावे त्वेकचत्वारिंशच्छतं भवति । आद्यनरकत्रिकेऽप्येवमेव वक्तव्यम् । पङ्कादित्रिके देवायुर्जिननामवर्जं षट्पञ्चाशच्छतमोघेऽविरते च भवति । आद्यगुणस्थानत्रिके तु रत्नप्रभावद्वाच्यम् । तमस्तमायां च मनुजायुर्वर्जं शेषं पङ्कादिवद् वाच्यम् । देवगतौ ओघे आद्यगुणस्थानत्रिके नरकगतितुल्यं वाच्यम्, नवरं नरकायुःस्थाने देवायुर्वक्तव्यं जिननाम च मिथ्यादृष्टौ न वक्तव्यम् । अविरतसम्यग्दृष्टावेकस्मिन्नपि जीवे जिनाहारकसप्तकसद्भावो वाच्यः, शेषं नरकवदिति । भवनपतिव्यन्तरज्योतिष्केषु जिननामसत्ता आनतादिषु च तिर्यगायुःसत्ता न वाच्या, तेन भवनपतिव्यन्तरज्योतिष्केषु नरकायुर्जिनवर्जं षट्पञ्चाशच्छतं भवति, सौधर्मादिषु सहस्रारपर्यन्तेषु च नरकायुर्वर्जं सप्तपञ्चाशच्छतं भवति । आनतादिषु नरकतिर्यगायुर्वर्जं षट्पञ्चाशच्छतं भवति । तिर्यग्गतौ जिननामवर्जं सप्तपञ्चाशच्छतमोघे सासादनवर्जेषु चतुर्षु गुणस्थानेषु च भवति । सासादने आहारकसप्तकवर्जं सार्धशतं भवति । मनुष्यगतौ प्राक् गुणस्थानोक्ताः सर्वा अपि सप्तप्रकृतयो वाच्या इति ॥४॥

प्रथमजातिचतुष्के असंज्ञिनि च ओघे मिथ्यादृष्टौ च जिनदेवनरकायुष्कवर्जं पञ्चपञ्चाश-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

च्छतं सत्तायां भवति, आहारकसप्तकोद्वलने त्वष्टचत्वारिंशच्छतं भवति, देवद्विके उद्वलिते तु षट्चत्वारिंशच्छतं भवति, नरकद्विकवैक्रियसप्तकयोस्तूद्वलितयोः सप्तत्रिंशदधिकं शतं भवति। तेजोवायुकायिकयोः मनुजद्विकोच्चैर्गोत्रोद्वलितयोश्चतुस्त्रिंशदधिकं शतं भवति। मनुजद्विकमुच्चैर्गोत्रं चोद्वलय्य तेजोवायुभ्यो निर्गतस्य यावदुच्चैर्गोत्रं मनुजद्विकं च न बध्नाति तावदन्यत्रापि चतुस्त्रिंशदधिकं शतं भवति। सासादने जिनाहारकसप्तकतिर्यग्वर्जायुस्त्रिक-वर्जसप्तचत्वारिंशच्छतं भवति, तत्रोक्तप्रकृतीनामुद्वलनासमाप्त्यभावात्। पञ्चाक्षजातौ मनुजगतिवद्वाच्यमिति ॥ ६ ॥

प्रथमकायपञ्चके प्रथमजातिचतुष्कवत्, नवरं तेजोवायुकायिकयोः सत्तायां मनुजायुरपि न वाच्यम्। त्रसकाये पञ्चाक्षवद्वाच्यमिति ॥ ६ ॥

योगत्रिकवेदत्रिककषायचतुष्ककेवलज्ञानवर्जज्ञानचतुष्काज्ञानत्रिकाविरतदेशविरतसामायिकच्छेदोपस्थापनीयपरिहारविशुद्धिकसूक्ष्मसम्परायथाख्यातकेवलदर्शनवर्जदर्शनत्रिकलेश्याषट्कभव्यौपशमिकक्षायोपशमिकमिथ्यात्वसञ्ज्याहारकानाहारकरूपासु चत्वारिंशन्मार्गणास्वष्टपञ्चाशच्छतं सत्तायां भवति। यासु मार्गणासु यावन्ति गुणस्थानानि तासु गुणस्थानोक्ताः सत्ताप्रकृतयो वाच्याः,नवरमनाहारकमार्गणायां सासादने आहारकसप्तकव्यतिरिक्ता वाच्याः। केवलज्ञानदर्शनयोर्नरकद्विकतिर्यग्द्विकातपोद्योतजातिचतुष्कस्थावरसाधारणसूक्ष्मवर्जनामनवतिर्वेदनीयद्विकगोत्रद्विकमनुजायूरूपाः पञ्च एवं पञ्चनवतिः प्रकृतयोऽयोगिन उपान्तसमयं यावत् सत्तायां भवन्ति। चरमसमये तु सातासातयोरन्यतरा प्रकृतिरुच्चैर्गोत्रं मनुजायुः मनुजगतिपञ्चेन्द्रियजातित्रसत्रिकसौभाग्यादेययशःकीर्त्तिजिनरूपनामनवकमिति द्वादश प्रकृतयः सत्तायां मनुजानुपूर्व्या सह तु त्रयोदश भवन्ति ॥ ४० ॥ सासादनमिश्ररूपमार्गणाद्विकेऽपि जिनवर्जं सप्तपञ्चाशच्छतं सत्तायां भवति। क्षायिकसम्यक्त्वे एकपञ्चाशच्छतं सत्तायां भवति। अविरतादिषु क्षायिकसम्यक्त्वमाश्रित्य गुणस्थानोक्ता सत्ता वाच्या। अभव्यमार्गणायां च सम्यक्त्वमिश्रजिनाहारकसप्तकवर्जमष्टचत्वारिशच्छतं सत्तायां भवतीति ॥ ४ ॥

अथ मार्गणासु सत्प्रकृतियन्त्राणि। ४ गतिमार्गणासु सत्प्रकृतयः।

नरकगतौ [१-२-३ नरकेषु]	—१५७-१५६-१४९-१४८-१४२-१४१ इति। ओघे— १५७ सुरायुर्वर्जम् मिथ्या०— " " सास्वा—१४९ आहारसप्तकजिनसुरायु० मिश्रे—१५६जिनसुरायुर्वर्जम् अविरते—१५७ सुरायुर्वर्जम्। १४९ देवतिर्यगायुर्दर्शनसप्तकवर्जम्। [क्षायिकसम्यग्दृष्टीनाम्] १४८ जिनवर्जम्, १४२ आहा० वर्जम् } एकजीवमाश्रित्य। १४१ जिनाहारकसप्तकवर्जम्।	
४-५-६नरकेषु-१५६-जिनसुरायुर्वर्जम् ७ मी नरके-१५५-नरसुरायुर्जिनवर्जम्		ओघे० चतु० १-२-३ रत्नप्रभावत्

देवगतौ सौधर्मादासहस्रारम्	१५७-१५६ [इति द्वे] ओघे—१५७ नरकायुर्वर्जं. मिथ्या०—१५६ नरकायुर्जिनव० सास्वा०—१४९आहा०स०जिननरकायु० मिश्रे—१५६ जिननरकायुर्व० अविरते—१५७ नरकायुर्वर्जं	
आनतादिषु सर्वेषु—१५६ नरकायुस्तिर्यगायुर्वर्जं भवन० व्यं० ज्योतिष्केषु—१५६ जिननरकायुर्वर्जं		सौधर्मवत्
तिर्यग्गतौ	—१५७ जिनवर्जं [ओघे सास्वादनवर्जेषु च, सासादने १५०]	
मनुजगतौ	—१५८-१५७इत्यादि सर्वाणि पूर्ववत्	

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

५ असंज्ञिनि जातिमार्गणायां च प्रकृतिसत्ता ।

एक–द्वि–त्रि–चतुरिन्द्रियेषु असंज्ञिनि च	ओघे मिथ्यात्वे च } १५५–जिनसुरायुर्नरकायुर्वर्जं १४८–आहा० ७ वर्जम् १४६–सुरद्विकवर्जं १३७–नरक २–वै० ७ वर्जं १३४–मनुज२–उच्चैर्गोत्रवर्जं सास्वादने–१४७ जिनाहा० तिर्यग्वर्जायुःर्वर्जाः
पञ्चेन्द्रिये	सर्वत्र मनुजगतिवत् ।
	६ कायमार्गणायाम् ।
५ स्थावरेषु	प्रथमजातिचतुष्कवत् ।
१ त्रसकाये	पंचेन्द्रियजातिवत् ।

योगादिमार्गणासु ।

योग ३–वेद३–कषाय४–ज्ञान४–अज्ञान३–चारित्र७–दर्शन३–लेश्या६–भव्य–उपशम–क्षयोप०–मिथ्या०–संज्ञि–आहा० २–इति ४० मार्गणासु	ओघे–१५८ गुणस्थानेषु–गुणस्थानोक्त सत्तानुसारेण
केवल २ कयो–९५–१२ [१३ वर्जा]— ९५–नाम्नः९० [नरक२–ति०२–आतप–उद्योत–जाति४–स्था०–साधा०–सूक्ष्मवर्जं] वेदनीय२– गोत्र२–नरायुः १२ [१३] वेदनीय१–उच्चैः०–नरायुः–नृगति–पंचे–त्रसादि३–सौभा०–आदेय–यशः–जिन [नरानुपू०–वा]	सयोगिन आरभ्यायोग्युपान्त्यसमयं यावत् । अयोग्यन्त्यसमये ।
सास्वादने मिश्रे	–१५७ जिनवर्जम् ।
क्षायिकसम्य०	ओघे– दर्शनसप्तकवर्जम् चतुर्थात् १४ गु०षु गुणस्थानोक्तसत्तावत्
अभव्ये	ओघे, मिथ्या०च } १४८–सम्य०–मिश्र–जिन–आहा० ७ वर्जं

अथ मूलप्रकृतीराश्रित्य सत्तास्थानान्युच्यन्ते ।

मनुजगतिवर्जगतित्रिकप्रथमजातिचतुष्कत्रसकायवर्जकायपञ्चकवेदत्रिककषायचतुष्काज्ञानत्रिकाविरतदेशविरतसामायिकच्छेदोपस्थापनीयपरिहारविशुद्धिकसूक्ष्मसम्परायशुक्ललेश्यावर्जलेश्यापञ्चकाभव्योपशमक्षयोपशममिश्रसासादनमिथ्यात्वासंज्ञिष्वष्टप्रकृत्यात्मकमेकमेव सत्त्वस्थानं भवति । मनुजगतिपञ्चेन्द्रियजातित्रसकाययोगत्रिकयथाख्यातशुक्ललेश्याभव्यक्षायिकसम्यक्त्वसञ्ज्याहारकेषु सप्तप्रकृत्यात्मकमष्टप्रकृत्यात्मकं चतुष्प्रकृत्यात्मकं चेति त्रीणि भवन्ति । मत्यादिज्ञानचतुष्ककेवलदर्शनवर्जदर्शनत्रिकेष्वष्टप्रकृत्यात्मकं सप्तप्रकृत्यात्मकं चेति द्वे भवतः । केवलज्ञानदर्शनयोश्चतुष्प्रकृत्यात्मकमेकमेव भवति । अनाहारकेऽष्टप्रकृत्यात्मकं चतुष्प्रकृत्यात्मकं चेति द्वे भवत इति ।

अथ मार्गणासु मूलप्रकृतिसत्स्थानानि ।

३ अमनुजगति–४ जाति–५ स्थावरकाय–३ वेद–४ कषाय–३ अज्ञान–६ अयथा०चारित्र–५ अशुक्ललेश्या–१ अभव्य–५ अक्षायिकसम्य०– १ असंज्ञि इति ४० मार्गणासु	८ प्रकृतिरूपमेकं सत्स्थानम्
मनुज–पंचे०–त्रस–योग ३–यथा०–शुक्ल–भ०–क्षा०–संज्ञि–आहा०–इति १२ मार्गणासु	८–सर्वमूलप्रकृतिरूपम् । ७–मोहनीयवर्जं । ४–नाम–गोत्र–वेदनीय–आयुष्यरूपं च ।
४ ज्ञान–३ दर्शन–	८ सर्वप्रकृतिरूपम्, ७ मोहवर्जं
केवलयोः–	४ नाम–गोत्र–वेदनीयायुरूपम् ।
१ अनाहारके–	८ सर्वप्रकृतिरूपम्,४ केवलद्विकवच्च ।

॥ अथोत्तरप्रकृतीराश्रित्य सत्तास्थानान्युच्यन्ते ॥

ज्ञानावरणान्तराययोः केवलज्ञानदर्शनवर्जासु षष्टिमार्गणासु सर्वगुणस्थानेषु पञ्चप्रकृत्यात्मकमेकमेव सत्त्वस्थानं भवति, केवलज्ञानदर्शनमार्गणयोर्नास्ति, तयोः क्षीणत्वात् । मनुजगतिवर्जगतित्रिकैकेन्द्रियादिजातिचतुष्कभूम्यादिकायपञ्चकाज्ञानत्रिकपरिहारविशुद्धिकदेश-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

विरताविरतशुक्कलेश्यावर्जलेश्यापञ्चकाभव्यमिथ्यात्वसासादनमिश्रक्षायोपशमिकौपशमिका-सञ्ज्यनाहारकेषु दर्शनावरणस्य स्वीयस्वीयगुणस्थानं यावत् नवप्रकृत्यात्मकं सत्तास्थानं भवति तस्य च मनुजगतिपञ्चेन्द्रियजातित्रसकाययोगत्रिककेवलज्ञानवर्जज्ञानचतुष्कयथाख्यातचारित्रकेवलदर्शनवर्जदर्शनत्रिकशुक्कलेश्याभव्यक्षायिकसम्यक्त्वसञ्ज्याहारकेषूपशमश्रेण्यामुपशान्तमोहं यावत् क्षपकश्रेण्यां त्वनिवृत्तिप्रथमभागं यावन्नवप्रकृत्यात्मकं सत्तास्थानं भवति, स्त्यानर्द्धित्रिकक्षये तु क्षीणमोहद्विचरमसमयं यावत् षट्प्रकृत्यात्मकं सत्तास्थानं भवति, निद्राद्विकक्षये पुनः क्षीणमोहचरमसमये चतुष्प्रकृत्यात्मकं सत्त्वस्थानं भवति। कषायचतुष्के वेदत्रिके च स्वस्वगुणस्थानपर्यन्तमुपशमकानामनिवृत्तिप्रथमभागं यावत् क्षपकाणां च नवप्रकृत्यात्मकं, तदनन्तरं क्षपकश्रेण्यां स्त्यानर्द्धित्रिकक्षये द्वितीयभागादारभ्य क्रोधादिक्षयपर्यन्तं षट्प्रकृत्यात्मकं च सत्तास्थानं भवति। एवं सामायिकच्छेदोपस्थापनीययोरपि क्रमेण वाच्यम्। केवलज्ञानदर्शनयोः दर्शनावरणस्य क्षीणत्वेन नास्ति सत्तास्थानमिति। सूक्ष्मसंपराय उपशमकानां नवात्मकं क्षपकाणां च षडात्मकं स्थानं सूक्ष्मसंपरायरूपे गुणस्थाने वाच्यम्॥

मनुष्यगतिपञ्चेन्द्रियजातित्रसकायकेवलज्ञानदर्शनयथाख्यातचारित्रभव्यसंज्ञिक्षायिकसम्यक्त्वानाहारकेषु सातासातरूपप्रकृतिद्विकात्मकमयोग्युपान्तसमयं यावद्भवति, अयोगिचरमसमये तु सातारूपमसातारूपं वा सत्त्वस्थानं भवति। मनुष्यगतिवर्जगतित्रिकैकेन्द्रियादिचतुष्काद्यकायपञ्चकाविरतयोगत्रिकवेदत्रिककषायचतुष्ककेवलज्ञानवर्जज्ञानचतुष्काज्ञानत्रिकयथाख्यातवर्जचारित्रपञ्चककेवलदर्शनवर्जदर्शनत्रिकलेश्याषट्काभव्यमिथ्यात्वसासादनमिश्रक्षयोपशमोपशमसम्यक्त्वासञ्ज्याहारकेषु सातासातरूपद्विप्रकृत्यात्मकं भवतीति॥

॥ मार्गणासु ज्ञानदर्शनावरणान्तरायवेदनीयानामुत्तरप्रकृतिसत्स्थानयन्त्राणि ॥

६२ मार्ग०सु ज्ञाना० सत्स्थानानि।	
६० (केवलद्विकवर्जे)सु—१—५ प्रकृत्यात्मकम्	
केवलद्विकयोः—०	

मार्ग० सु दर्शना० सत्स्थानानि।	
३ अमनुजगति—४ कुजाति—५ स्था० काय—१ परिहार०—१ देशवि०—१ अवि०—५ प्रथमलेश्या—१ अभव्य—३ अज्ञान—५ अक्षायिकसम्य०—१ असंज्ञि—१ अनाहारक इति ३१ सु	१—९ प्रकृत्यात्मकम्, स्वस्वगुणस्थानं यावत्
मनुज—पंचे०—त्रस—३ योग—४ज्ञान—यथा०—३ दर्शन—शुक्क—भ०—क्षा०—संज्ञि—आहा० इति १९ सु	३—९ उपशान्तमोहं यावदुपशमकानाम्, अनि० प्र० भागं यावत्क्षपकाणां च। ६ क्षीणमोहोपान्त्यसमयं यावत्। ४ क्षीणमोहान्त्यसमये।
क्रोधादि४ वेद३ सामा० छेदोप० इति ९ सु	२—९ उपशमकानाम्, अनि० प्र० भागं यावत्क्षपकाणां च। क्षपकाणामनिवृत्तिद्वितीयभागादारभ्य क्रोधादिक्षयपर्यन्तम्।
सू० संपराये	२—९ उपशमकानाम् १० मे एव। ६ क्षपकाणां १० मे एव।
केवल २ कयोः—	०

६२ मार्ग० सु वेदनीयसत्स्थानानि।	
मनुज—पंचे०—त्रस—केवल२— यथा०—भ०—संज्ञि—क्षा०—अना० इति १० सु	२—२अयोग्युपान्त्यसमयं यावत्, १ अयोग्यन्त्यसमये च।
शेष ५२ सु १—२ प्र०आत्मकं स्वस्वगुणस्थानपर्यन्तम्	

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अथ मार्गणासु मोहनीयस्य सत्तास्थानानि उच्यन्ते—तत्र देवनारकयोः षट् सत्तास्थानानि भवन्ति, तद्यथा—अष्टाविंशतिः सप्तविंशतिः षड्विंशतिश्चतुर्विंशतिर्द्वाविंशतिरेकविंशतिरिति । तत्राष्टाविंशतिः कृतत्रिपुञ्जस्य चतुर्ष्वपि गुणस्थानेषु भवति । उद्वलितसम्यक्त्वस्य प्रथमतृतीयगुणस्थानयोः सप्तविंशतिः । उद्वलितमिश्रस्यानादिमिथ्यादृष्टेर्वा मिथ्यादृष्टौ षड्विंशतिः । विसंयोजितानन्तानुबन्धिनः तृतीयचतुर्थयोः गुणस्थानयोः चतुर्विंशतिप्रकृत्यात्मकं सत्तास्थानं भवति । तथा कश्चिन्नरः प्रथमसंहननी मिश्रमोहक्षयानन्तरं कृतकरणः कालं कृत्वा चतसृष्वपि गतिषु अन्यतमस्यां गच्छति, तत्र च यावत् सम्यक्त्वपुञ्जं क्षपयति तावत् द्वाविंशतिप्रकृतीनां सत्तास्थानं तुर्यगुणस्थाने भवति, क्षयानन्तरं चैकविंशतिरिति । तिर्यग्गतावप्येवमेव, नवरं पञ्चमगुणस्थाने त्रीणि—अष्टाविंशतिचतुर्विंशत्येकविंशतिरूपाणि भवन्ति, शेषाणि न सन्ति । मनुजगतिपञ्चाक्षजातित्रसकाययोगत्रिकशुक्लेश्यासंज्ञ्याहारकेषु स्वीये स्वीये गुणस्थाने यानि प्राग् उक्तानि सत्तास्थानानि तानि सर्वाणि वाच्यानि । प्रथमजातिचतुष्कत्रसकायवर्जकायपञ्चकासंज्ञिषु मिथ्यादृष्टौ त्रीणि सत्तास्थानानि भवन्ति, तद्यथा—अष्टाविंशतिः, सप्तविंशतिः, षड्विंशतिरिति । सासादने अष्टाविंशतिरूपमेकमेव भवतीति । पुरुषवेदे पुरुषवेदक्षयानन्तर्भावीनि पञ्चचतुस्त्रिद्व्येकप्रकृत्यात्मकानि वर्जयित्वा शेषाणि दश भवन्ति, तद्यथा—अष्टाविंशतिः, सप्तविंशतिः, षड्विंशतिः, चतुर्विंशतिः, त्रयोविंशतिः, द्वाविंशतिः, एकविंशतिः, त्रयोदश, द्वादश, एकादशेति । तत्र मिथ्यादृष्टौ त्रीणि भवन्ति, तद्यथा—अष्टाविंशतिः सप्तविंशतिः षड्विंशतिरिति । सासादने अष्टाविंशतिः । मिश्रे अष्टाविंशतिसप्तविंशतिचतुर्विंशतिरूपाणि त्रीणि भवन्ति । अविरतसम्यग्दृष्ट्यादिषु चतुर्ष्वष्टाविंशतिचतुर्विंशतित्रयोविंशतिद्वाविंशत्येकविंशतिरूपाणि पञ्च सत्तास्थानानि भवन्ति । अपूर्वकरणे अष्टाविंशतिचतुर्विंशत्येकविंशतिरूपाणि त्रीणि भवन्ति । अनिवृत्तिबादरे अष्टाविंशतिचतुर्विंशत्येकविंशतित्रयोदशद्वादशैकादशरूपाणि षट् भवन्ति । स्त्रीवेदे अष्टाविंशतिसप्तविंशतिषड्विंशतिचतुर्विंशतित्रयोविंशतिद्वाविंशत्येकविंशतित्रयोदशद्वादशरूपाणि नव सत्तास्थानानि भवन्ति । नपुंसकवेदे च अष्टाविंशतिसप्तविंशतिषड्विंशतिचतुर्विंशतित्रयोविंशतिद्वाविंशत्येकविंशतित्रयोदशरूपाण्यष्टौ सत्त्वस्थानानि भवन्ति । वेदद्विकेऽपि गुणस्थानेषु भावना पुंवेदवद्वाच्या । क्रोधे द्वादश सत्तास्थानानि भवन्ति, तद्यथा—अष्टाविंशतिः, सप्तविंशतिः, षड्विंशतिः, चतुर्विंशतिः, त्रयोविंशतिः, द्वाविंशतिः, एकविंशतिः, त्रयोदश, द्वादश, एकादश, पञ्च, चतस्रश्चेति । त्रिद्व्येकप्रकृत्यात्मकानि सत्तास्थानानि न सन्त्येव, क्रोधक्षयानन्तरभावित्वादिति । माने त्रयोदश सत्तास्थानानि भवन्ति, तद्यथा—अष्टाविंशतिः, सप्तविंशतिः, षड्विंशतिः, चतुर्विंशतिः, त्रयोविंशतिः, द्वाविंशतिः, एकविंशतिः, त्रयोदश, द्वादश, एकादश, पञ्च, चतस्रः, तिस्रश्चेति । द्विप्रकृत्यात्मकमेकप्रकृत्यात्मकं च न भवति, मानक्षयानन्तरभावित्वादिति । मायायां चतुर्दशसत्तास्थानानि भवन्ति, तद्यथा—अष्टाविंशतिः, सप्तविंशतिः, षड्विंशतिः, चतुर्विंशतिः, त्रयोविंशतिः, द्वावि-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

शतिः, एकविंशतिः, त्रयोदश, द्वादश, एकादश, पञ्च, चतस्रः, तिस्रः, द्वे इति। लोभे सर्वाणि सत्तास्थानानि भवन्ति। चतुर्ष्वपि कषायेषु गुणस्थानेषु सत्तास्थानानि पुंवेदवद्वाच्यानि, नवरं नवमगुणस्थाने सप्तविंशतिषड्विंशतित्रयोविंशतिद्वाविंशतिवर्जानि स्वीयस्वीयमार्गणोक्तानि सर्वाणि सत्तास्थानानि भवन्ति। मत्यादिज्ञानचतुष्कसामायिकच्छेदोपस्थापनीयेषु सप्तविंशतिषड्विंशतिवर्जानि शेषाणि त्रयोदश भवन्ति, तद्यथा—अष्टाविंशतिः, चतुर्विंशतिः, त्रयोविंशतिः, द्वाविंशतिः, एकविंशतिः, त्रयोदश, द्वादश, एकादश, पञ्च, चतस्रः, तिस्रः, द्वे, एका चेति। तत्र मत्यादित्रिके अविरतसम्यग्दृष्टेरारभ्य क्षीणमोहपर्यवसानानि नव गुणस्थानानि भवन्ति, मनःपर्यवज्ञाने प्रमत्तसंयतादारभ्य क्षीणमोहपर्यन्तानि सप्त गुणस्थानानि भवन्ति। सामायिकच्छेदोपस्थापनीययोः प्रमत्ताप्रमत्तापूर्वकरणानिवृत्तिबादराख्यानि चत्वारि गुणस्थानानि भवन्ति। तत्र सत्तास्थानानि गुणस्थानोक्तानि स्वयं वाच्यानि। अज्ञानत्रिके चत्वारि सत्तास्थानानि भवन्ति, तद्यथा—अष्टाविंशतिः, सप्तविंशतिः, षड्विंशतिः, चतुर्विंशतिश्चेति। तत्र प्रथमगुणस्थाने चतुर्विंशतिवर्जानि त्रीणि भवन्ति। सासादने अष्टाविंशतिरूपमेकमेव सत्तास्थानं भवति। मिश्रे च षड्विंशतिवर्जानि त्रीणि सत्तास्थानानि भवन्ति। केवलज्ञानदर्शनयोः मोहनीयस्य क्षीणत्वेन सत्तास्थानं न विद्यते। परिहारविशुद्धौ प्रमत्ताप्रमत्तयोः पञ्च सत्तास्थानानि भवन्ति, तद्यथा—अष्टाविंशतिः, चतुर्विंशतिः, त्रयोविंशतिः, द्वाविंशतिः, एकविंशतिश्चेति। देशविरतेऽपि परिहारविशुद्धिवत् पञ्च सत्तास्थानानि भवन्ति। यथाख्याते उपशान्तमोहगुणस्थाने त्रीणि सत्तास्थानानि भवन्ति, तद्यथा—अष्टाविंशतिश्चतुर्विंशतिरेकविंशतिरिति। क्षीणमोहादौ सत्तास्थानं नास्ति, मोहाभावादिति। अविरते सत्तास्थानानि सप्त भवन्ति, तद्यथा—अष्टाविंशतिः, सप्तविंशतिः, षड्विंशतिः, चतुर्विंशतिः, त्रयोविंशतिः, द्वाविंशतिः, एकविंशतिश्चेति। मिथ्यादृष्टावष्टाविंशतिसप्तविंशतिषड्विंशतिरूपाणि त्रीणि भवन्ति। सास्वादने अष्टाविंशतिर्भवति। मिश्रे अष्टाविंशतिसप्तविंशतिचतुर्विंशतिरूपाणि त्रीणि भवन्ति। अविरतसम्यग्दृष्टौ सप्तविंशतिषड्विंशतिवर्जानि पञ्च भवन्ति। सूक्ष्मसम्पराये चत्वारि सत्त्वस्थानानि भवन्ति, तद्यथा—अष्टाविंशतिश्चतुर्विंशतिरेकविंशतिरेकं चेति।

अवधिदर्शने मिथ्यादृष्ट्यादिषु द्वादशस्ववधिदर्शनविवक्षायां तु सर्वाणि मोहनीयस्य सत्तास्थानानि भवन्ति, अविरतसम्यग्दृष्ट्यादौ विवक्षणे तु सप्तविंशतिषड्विंशतिवर्जानि त्रयोदश सत्तास्थानानि भवन्ति। गुणस्थानेषु गुणस्थानोक्तानि सत्तास्थानान्यत्र भावनीयानि। एवमेव चक्षुरचक्षुर्दर्शनयोरपि सत्तास्थानानि वाच्यानि, नवरं गुणस्थानानि द्वादशापि भवन्ति। तेजःपद्मयोरष्टाविंशतिसप्तविंशतिषड्विंशतिचतुर्विंशतिद्वाविंशत्येकविंशतिरूपाणि षड् भवन्ति। तत्र मिथ्यादृष्टावष्टाविंशतिसप्तविंशतिषड्विंशतिरूपाणि त्रीणि भवन्ति। सासादने अष्टाविंशतिः भवति, मिश्रे अष्टाविंशतिसप्तविंशतिचतुर्विंशतिरूपाणि त्रीणि भवन्ति।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अविरतसम्यग्दृष्टिदेशविरतप्रमत्ताप्रमत्तेषु सप्तविंशतिषड्विंशतिवर्जानि चत्वारि सत्तास्थानानि भवन्ति । ननु द्वाविंशतिप्रकृतिरूपं सत्त्वस्थानं तेजःपद्मयोः कथं भवति ? तच्च क्षायिकसम्यक्त्वोत्पत्तेः प्राक् दर्शनमोहक्षपकस्य मिश्रमोहनीयक्षयानन्तरं सम्यक्त्वमोहनीयं यावत् क्षपयति तावद्भवति, तदा च शुक्ललेश्यायामेव भवति, नान्यासु, अन्यथा त्रयोविंशतिप्रकृत्यात्मकमपि सत्तास्थानं स्यात्, मिथ्यात्वक्षयानन्तरं यावत् मिश्रमोहनीयं न क्षपयति तावत् दर्शनमोहक्षपकस्य प्राप्यमाणत्वादिति चेत् ? न, कृतकरणस्यान्यतमस्यां लेश्यायां सद्भावात्, तदुक्तं कर्म्मप्रकृतिवृत्तौ—"चरमे च स्थितिखण्डे उत्कीर्णे सत्यसौ क्षपकः कृतकरण इति परिभाष्यते, तथा चाह—'कयकरणद्धाइ पच्छिमे होइ', पश्चिमे चरमे खण्डे उत्कीर्णे कृतकरणाद्धायां वर्तते कृतकरणो भवतीत्यर्थः । अस्यां च कृतकरणाद्धायां वर्तमानः कश्चित्कालमपि कृत्वा चतसृणां गतीनामन्यतमस्यां गतावुत्पद्यते, लेश्यायाममि पूर्वं शुक्लायामेवासीत्, सम्प्रति त्वन्यतमस्यां गच्छति" इति । यन्त्रकेषु त्रयोविंशतिरूपमपि सत्तास्थानं स्वीकृतं तदभिप्रायेण कृतकरणाद्धायाः पूर्वमपि शुभलेश्यात्रिकं स्वीकृतमिति । कृष्णनीलकापोताख्यासु षट् सत्तास्थानानि भवन्ति, तद्यथा—अष्टाविंशतिः, सप्तविंशतिः, षड्विंशतिः, चतुर्विंशतिः, द्वाविंशतिः, एकविंशतिश्चेति । तत्राद्यानि त्रीणि मिथ्यादृष्टौ भवन्ति । सासादने आद्यमेव भवति, मिश्रे अष्टाविंशतिसप्तविंशतिचतुर्विंशतिरूपाणि त्रीणि भवन्ति । अविरतसम्यग्दृष्टौ मतान्तरेण देशविरतप्रमत्तयोरपि अष्टाविंशतिचतुर्विंशत्येकविंशतिद्वाविंशतिरूपाणि चत्वारि भवन्ति ।

न च द्वाविंशतिरूपं प्रकृतिस्थानं न संभवतीति वाच्यम्, कृतकरणस्यान्यतमस्यां गतौ लेश्यायां च गमनस्योक्तत्वात्, द्वाविंशतिप्रकृतिरूपस्य सत्त्वस्थानस्यापि चतसृष्वपि गतिषूक्तत्वाच्च, तदुक्तं कर्म्मप्रकृतिवृत्तौ न्यायाचार्यैः—"द्वाविंशतिश्चतसृष्वपि गतिषु प्राप्यत" इति । ननु लेश्यायामपि पूर्वं शुक्लायामेवासीत् सम्प्रति त्वन्यतमस्यां गच्छतीत्येव कर्मप्रकृतिवृत्तावुक्तं न तु षण्णामन्यतमस्यामिति कथमवसीयते अशुभासु द्वाविंशतिप्रकृतिरूपं सत्त्वस्थानं संभवतीति चेत् ? न, कृतकरणस्य नरकगतौ गमनस्योक्तत्वेन तत्राशुभलेश्यात्रिकस्यैव सद्भावात् । ननु यल्लेश्यायां हि जन्तवो म्रियन्ते परभवेऽपि तल्लेश्यायामेवोत्पद्यन्ते, न पुनः पाश्चात्यभवान्त्यसमयेऽन्यो लेश्यापरिणामोऽन्यश्चागामिभवाद्यसमय इति, तदुक्तं—"जल्लेसाइं दव्वाइं आयइत्ता कालं करेइ तल्लेसेसु उववज्जइ" इति, ततः पूर्वभवे यैव कृतकरणस्य दर्शनक्षपकस्य लेश्या सैव नरकगतावुत्पत्तिसमयादन्तर्मुहूर्त्तं यावद्भवतु, तत ऊर्ध्वमशुभा इति चेत् ? न, नरतिरश्चामन्तर्मुहूर्त्ते शेषे आयुषि देवनरकसत्का लेश्याऽऽगच्छतीत्युक्तत्वात्, तदुक्तं लघुसंग्रहण्यां—"तिरिनर आगामिभवे लेसाए अइगए सुरा निरया । पुव्वभवलेससेसे अंतमुहुत्ते मरणमिंति ॥ १ ॥" इति ।

ननु तृतीयां भूमिं यावत् क्षायिकसम्यग्दृष्टिर्गच्छति, तत्र च नीलकापोतरूपं लेश्याद्विकमेव भवति, न कृष्णलेश्या, तदुक्तम्—"दुसु काऊ तइआए काऊ नीला य नील पंकाए" इति, धूमप्रभादिषु तिसृषु भूमिष्वेव कृष्णलेश्या, ततः कथं तत्र द्वाविंशतिप्रकृतिरूपं

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सत्त्वस्थानं संभवेदिति चेत्? सत्यम्, भवनपत्यादिषु लेश्याचतुष्कस्य विद्यमानत्वेन तत्र दर्शनक्षपकस्य गमने न कोऽपि दोष इति।

अभव्ये षड्विंशतिप्रकृत्यात्मकमेकमेव सत्तास्थानं भवति, अनादिमिथ्यादृष्टित्वादिति। भव्ये च सर्वाणि सत्त्वस्थानानि भवन्ति। सम्यक्त्वमार्गणायामौपशमिकसम्यग्दृष्टौ द्वे सत्तास्थाने भवतः, तद्यथा—अष्टाविंशतिश्चतुर्विंशतिरिति। उपशमितानन्तानुबन्धिनोऽष्टाविंशतिः, विसंयोजितानन्तानुबन्धिनश्च चतुर्विंशतिः। औपशमिकसम्यग्दृष्टौ भवन्त्यष्टौ गुणस्थानान्यविरतसम्यग्दृष्टेरारभ्योपशान्तमोहं यावदिति। अष्टस्वपि त एव द्वे सत्त्वस्थाने भवत इति। क्षायिकसम्यग्दृष्टौ नव सत्तास्थानानि भवन्ति, तद्यथा—एकविंशतिः, त्रयोदश, द्वादश, एकादश, पञ्च, चतस्रः, तिस्रः, द्वे, एका चेति। क्षायिकसम्यग्दृशामविरतसम्यग्दृष्टेरारभ्यायोगिकेवलिपर्यवसानान्येकादशगुणस्थानानि भवन्ति। तत्र अविरतेरारभ्यापूर्वकरणं यावदेकविंशतिप्रकृत्यात्मकं सत्त्वस्थानं भवति। नवमगुणस्थाने नवापि सत्त्वस्थानानि भवन्ति। सूक्ष्मसम्पराये एकमेकविंशतिश्च। उपशान्तमोहे चैकविंशतिप्रकृत्यात्मकमेव सत्त्वस्थानं भवति। क्षीणमोहादौ नास्त्येव सत्त्वस्थानं, क्षीणमोहत्वादेवेति। क्षायोपशमिकसम्यग्दृष्टौ चत्वारि सत्त्वस्थानान्यविरतसम्यग्दृष्टेरारभ्याऽप्रमत्तान्तं यावत् चतुर्ष्वपि भवन्ति, तद्यथा—अष्टाविंशतिः, चतुर्विंशतिः, त्रयोविंशतिः, द्वाविंशतिरिति। मिश्रसम्यक्त्वे त्रीणि सत्तास्थानानि भवन्ति, तद्यथा—अष्टाविंशतिः, सप्तविंशतिः, चतुर्विंशतिरिति। सासादनसम्यग्दृष्टावष्टाविंशतिप्रकृत्यात्मकमेकमेव सत्त्वस्थानं भवति। मिथ्यादृष्टावष्टाविंशतिसप्तविंशतिषड्विंशतिरूपाणि त्रीणि भवन्ति। अनाहारकमार्गणायां षट् सत्त्वस्थानानि भवन्ति, तद्यथा—अष्टाविंशतिः सप्तविंशतिः षड्विंशतिश्चतुर्विंशतिर्द्वाविंशतिरेकाविंशतिरिति। तत्र मिथ्यादृष्टावाद्यानि त्रीणि भवन्ति। सासादने आद्यमेव भवति। अनाहारके मिश्रगुणस्थानमेव न भवति। अविरतसम्यग्दृष्टौ सप्तविंशतिषड्विंशतिवर्जानि चत्वारि भवन्ति। देशविरतेरारभ्य क्षीणमोहपर्यन्तानि गुणस्थानान्येवानाहारके न भवन्ति। अन्तिमद्विके क्षीणमोहत्वात् सत्तास्थानानि न भवन्तीत्युक्तानि मार्गणायां मोहनीयस्य सत्तास्थानानि।

॥ अथ ६२ मार्ग० मोहनीयसत्स्थानयन्त्राणि ॥

नरकगति-देवगत्योः तिर्यग्गतौ च	—२८ कृतत्रिपुंजस्य	१·२·३-४गुणेषु
	—२७ उद्व० सम्यक्त्वस्य	१—३
	—२६ उद्व० मिश्रस्यानादि मिथ्यादृष्टेर्वा.	१—मे
	—२४ विसंयोजितानाम्	३—४
	—२२ कृतकरणचतुर्गतिकानाम्	४ थें
	—२१ क्षा० सम्यग्दृशाम्	४ थें
तिर्यग्गतौ	२१—२८—२४ पंचमगुणे.	

मनुज-पंचे०—त्रस—योग ३ शुक्ल—भव्य—संज्ञि—चक्षुरचक्षु—आहा० इति १२ षु	स्वस्वगुणस्थानोक्तवत्
४ कुजाति-५ काय—मिथ्या०—असंज्ञि इति ११ षु	२८—२७—२६ प्रथमगुणे २८ द्वितीयगुणे.

पुंवेदे	१०—२८—२७—२६—२४—२३—२२—२१—१३—१२—११.
	मिथ्यात्वे ३—२८—२७—२६.
	सास्वादने १—२८.

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

पुंवेदे	मिश्रे ३—२८–२७–२४.
	अविरतादाप्रमत्तम्५—२८–२४–२३
	–२२–२१.
	अपूर्वे ३—२८–२४–२१.
	अनिवृत्तौ ६—२८–२४–२१–१३–
	१२–११.
स्त्रीवेदे	९—२८–२७–२६–२४–२३–२२– २१–१३–१२.
	गुणस्थानेषु—पुंवेदवत्.
नपुंसके	८—२८–२७–२६–२४–२३–२२–२१–१३ गुणस्थानेषु—पुंवेदवत्.

क्रोधे १२—{ २८–२७–२६–२४–२३–२२–२१–
१३–१२–११–५–४.

माने १३—{ २८–२७–२६–२४–२३–२२–२१–
१३–१२–११–५–४–३.

मायायां १४—{ २८–२७–२६–२४–२३–२२–२१–
१३–१२–११–५–४–३–२.

लोभे १५—{ २८–२७–२६–२४–२३–२२–२१–
१३–१२–११–५–४–३–२–१.

अत्र कषायेषु गुणस्थानवक्तव्यता पुंवेदवत्, नवरं नवमे २७–२६–२३–२२ वर्जयित्वा स्वस्वमार्गणोक्तवत् ।

४ ज्ञान–सामा०–
छेदोप० इतिकेषु १३ }—२८–२४–२३–२२–२१–१३–१२–११–५–४–३–२–१.

३ अज्ञानेषु ४—२८–२७–२६–२४.

२ केवलयोः—०

१ परिहारे ५–प्रमत्ते
अप्रमत्ते च }—२८–२४–२३–२२–२१.

१ देशविरते ५—२८–२४–२३–२२–२१.

१ यथाख्याते ३—{ उपशान्तमोहे—२८–२४–२१
क्षीणमोहादौ—०

अविरते	७—२८–२७–२६–२४–२३–२२–२१.
	मिथ्यात्वे ३—२८–२७–२६.
	सास्वादने १—२८.
	मिश्रे ३—२८–२७–२४.
	अविरते ५—२८–२४–२३–२२–२१

सूक्ष्मसंपराये ४—२८–२४–२१–१.

अवधिदर्शने १५–
[विभंगेन सह] }२८–२७–२६–२४–२३–२२–२१–१३–१२–११–५–४–३–२–१.

[विभंगरहिते]—२७–२६– वर्जानि.

अत्रापि गुण० वक्तव्यता यथासंभवम् ।

तेजोलेश्यादि पञ्चके ६	—२८–२७–२६–२४–२२–२१.
	मिथ्यात्वे ३—२८–२७–२६.
	सास्वादने १—२८.
	मिश्रे ३—२८–२७–२४.
	अविरतादाऽ- प्रमत्तं यावत् ४ }—२८–२४–२२–२१

अशुभासु | अविरते [मतान्तरे ४–५–६ सु] ४ }—२८–२४–२२–२१.

अभव्ये १—२६ प्रकृतिरूपम् ।

उपशमे २—२८–२४.

क्षायिके	९—२१–१३–१२–११–५–४–३–२–१.
	४ तः ८ सु १—२१.
	९ मे ९—२१–१३–१२–११–५–४–
	३–२–१.
	१० मे २—१–२१.
	११ मे १—२१.
	१२–१३–१४ सु—०

क्षयोपशमे ४—२८–२४–२३–२२ [४ तः ७ गुणेषु]

मिश्रे ३—२८–२७–२४ [तृतीयगुणे.]

सास्वादने १—२८ [द्वितीयगुणे.]

अनाहारे	६—२८–२७–२६–२४–२२–२१.
	मिथ्यात्वे ३—२८–२७–२६.
	सास्वादने १—२८.
	मिश्रे—० [अनाहारकत्वाभावात्.]
	अविरते ४—२८–२४–२२–२१.
	१३- १४ सु—० [क्षीणमोहत्वात्]

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अथ मार्गणास्वायुष्कर्मणः सत्त्वस्थानान्युच्यन्ते—मनुष्यतिर्यग्गत्योः आयुषः चत्वार्यपि सत्त्वस्थानानि भवन्ति । नरकगतेः देवायुर्वर्जानि त्रीणि भवन्ति । देवगतेः नरकायुर्वर्जानि त्रीणि भवन्ति । एकद्वित्रिचतुरिन्द्रियेषु तिर्यङ्मनुजायूरूपे द्वे एव सत्त्वस्थाने भवतः, देवनारकयोः गमनाभावात् तत्सत्के न भवत इति । पञ्चेन्द्रियेषु चत्वार्यपि सत्त्वस्थानानि भवन्ति । पृथ्वीजलवनस्पतिकायेषु तिर्यङ्मनुजायूरूपे द्वे भवतः । तेजोवायुकायिकयोः तिर्यगायूरूपमेकमेव सत्त्वस्थानं भवति, शेषगतित्रिके गमनाभावादिति । त्रसकायिके चत्वार्यपि सत्त्वस्थानानि भवन्ति । योगत्रिकवेदत्रिककषायचतुष्काज्ञानत्रिककेवलज्ञानवर्जज्ञानचतुष्काविरतदेशविरतसामयिकच्छेदोपस्थापनीयपरिहारविशुद्धिककेवलदर्शनवर्जदर्शनत्रिकलेश्याषट्कभव्याभव्यमिथ्यात्वसासादनमिश्रौपशमिकक्षायोपशमिकक्षायिकसञ्ज्यसञ्ज्याहारकानाहारकेषु चत्वारि सत्त्वस्थानानि भवन्ति । संभवसत्तापेक्षया सूक्ष्मसम्परायययथाख्यातयोरपि चत्वारि भवन्ति, अन्यथा मनुजदेवायूरूपे द्वे भवतः । केवलज्ञानदर्शनयोः मनुजायूरूपमेकमेव सत्तास्थानं भवतीत्युक्तानि मार्गणास्वायुष्कर्मणः सत्तास्थानानि ।

॥ ६२ मार्गणास्वायुःसत्स्थानानि ॥

२ मनुजतिर्यग्गत्योः ४—सर्वाणि. नरके ३—देवायुर्वर्जितानि.
देवगतौ ३—नरकायुर्वर्जितानि.
४ कुजातिषु २—तिर्यगायुर्नरायुश्च
पंचेन्द्रिये ४—सर्वाणि.
३ पृथ्व्यब्वनेषु २—ति० नरायुश्च
२ तेजोवाय्वोः १—तिर्यगायुः
त्रसकाये ४—सर्वाणि.
सूक्ष्मसंपराये } ४—[संभवसत्तापेक्षया] यथाख्याते } २—दे०-नरायुः [संभवसत्तारहितम्]
२ केवलयोः १—नरायुः
४३ शेषमार्गणासु ४—सर्वाणि.

अथ मार्गणास्थानेषु नामकर्मणः सत्तास्थानान्युच्यन्ते—

नरकगतौ नाम्नः सामान्येन द्व्युत्तरशतषण्णवतिपञ्चनवतिरूपाणि त्रीणि सत्तास्थानानि भवन्ति । मिथ्यादृष्टावपि त्रीणि भवन्ति । सासादने पञ्चनवतिः मिश्रे द्व्युत्तरशतपञ्चनवतिरूपे द्वे भवतः । अविरतसम्यग्दृष्टौ च त्रीण्यपि भवन्ति । भावनात्वेवं आहारकसप्तकजिननाम्नोरुभयोः मिथ्यात्वे युगपत् सत्ताभावात् त्र्युत्तरशतं न भवति, जिननामासत्त्वे द्व्युत्तरशतमाहारकसप्तकासत्त्वे षण्णवतिरुभयासत्त्वे पञ्चनवतिश्च भवतीति । देवगतौ नाम्नः चत्वारि सत्तास्थानानि भवन्ति, तद्यथा—त्र्युत्तरशतं, द्व्युत्तरशतं, षण्णवतिः, पञ्चनवतिरिति । मिथ्यादृष्टौ त्र्युत्तरशतषण्णवतिवर्जे द्वे भवतः । सासादने पञ्चनवतिः, मिश्रे द्व्युत्तरशतपञ्चनवतिरूपे द्वे भवतः । तुर्यगुणस्थाने चत्वार्यपि सत्तास्थानानि भवन्ति । तिर्यग्गतौ पञ्च सत्तास्थानानि भवन्ति, तद्यथा—द्व्युत्तरशतं, पञ्चनवतिः, त्रिनवतिः, चतुरशीतिः, द्व्यशीतिरिति । तत्र तिर्यक्षु जिननामासत्त्वेन त्र्युत्तरशतं षण्णवतिरूपं च न भवति, जिननामविरहे द्व्युत्तरशतमाहारकसप्तकाभावे च पञ्चनवतिः, देवद्विकोद्वलने तु त्रिनवतिः, नरकद्विकवैक्रियसप्तकोद्वलने तु चतुरशीतिः, मनुष्यद्विकोद्वलने तु द्व्यशीतिरिति । तत्र मिथ्यादृष्टौ पञ्चापि सत्त्वस्थानानि

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

भवन्ति । सासादने पञ्चनवतिः, मिश्राविरतदेशविरतानां द्व्युत्तरशतं पञ्चनवतिश्च भवतीति । मनुजगतावुद्वलनायोग्यद्व्यशीतिवर्जानि द्वादशसत्तास्थानानि भवन्ति, तद्यथा—त्र्युत्तरशतम्, द्व्युत्तरशतम्, षण्णवतिः, पञ्चनवतिः, त्रिनवतिः, नवतिः, एकोननवतिः, चतुरशीतिः, त्र्यशीतिः, द्व्यशीतिः, नव, अष्टाविति । तत्र सर्वप्रकृतिसमुदायरूपं त्र्युत्तरशतं, जिनहीनं द्व्युत्तरशतं, जिनयुतमाहारकसप्तकविहीनं षण्णवतिः, उभयविहीनं पञ्चनवतिः, क्षपकश्रेण्यां नामत्रयोदशकक्षये त्वाद्यचतुष्कमेव यथाक्रमं नवतिरेकोननवतिस्त्र्यशीतिर्द्व्यशीतिश्च भवति । कश्चिदेकेन्द्रियो देवद्विकमुद्वल्य मनुजेषु समुत्पन्नः तत्र च यावद्देवद्विकं न बध्नाति तावत् त्रिनवतिः, स एव सनरकद्विकं वैक्रियसप्तकमुद्वल्य मनुष्येषु समागतः सन् देवद्विकसहितं नरकद्विकसहितं वा वैक्रियसप्तकं यावन्न बध्नाति तावत् चतुरशीतिः । तीर्थंकरस्यायोगिकेवलिनो नव, सामान्यकेवलिनोऽष्टाविति । तत्र मिथ्यादृष्टौ पञ्च भवन्ति, तद्यथा—द्व्युत्तरशतं, षण्णवतिः, पञ्चनवतिः, त्रिनवतिः, चतुरशीतिश्चेति । सास्वादने मिश्रे च द्वे भवतः, तद्यथा—द्व्युत्तरशतम्, पञ्चनवतिरिति । अविरतसम्यग्दृष्टेरारभ्यापूर्वकरणान्तेषु चत्वारि सत्त्वस्थानानि भवन्ति, तद्यथा—त्र्युत्तरशतम्, द्व्युत्तरशतम्, षण्णवतिः, पञ्चनवतिरिति । अनिवृत्तिबादरे सूक्ष्मसम्पराये चाष्टौ सत्त्वस्थानानि भवन्ति, तद्यथा—त्र्युत्तरशतम्, द्व्युत्तरशतम्, षण्णवतिः, पञ्चनवतिः, नवतिः, एकोननवतिः, त्र्यशीतिः, द्व्यशीतिरिति । उपशान्तमोहे चत्वारि भवन्ति, तद्यथा—त्र्युत्तरशतम्, द्व्युत्तरशतम्, षण्णवतिः, पञ्चनवतिरिति । क्षीणमोहे सयोगिकेवलिनि च नवत्येकोननवतित्र्यशीतिद्व्यशीतिरूपाणि चत्वारि भवन्ति । अयोगिकेवलिनि उपान्त्यसमयं यावत् क्षीणमोहोक्तानि चत्वारि, चरमसमये तु नवाष्टाविति ॥ ४ ॥

एकद्वित्रिचतुरिन्द्रियेषु तिर्यग्गतिवत् पञ्च सत्तास्थानानि भवन्ति । नवरं मिथ्यात्वसास्वादनरूपं गुणस्थानद्विकं वाच्यम् । पञ्चाक्षेषु सर्वाणि सत्तास्थानानि मनुजगतिवद्वक्तव्यानि, नवरं कश्चित्तैजसकायिको वायुकायिको वा मनुजद्विकमुद्वल्य पञ्चेन्द्रियेषु समागतोऽपर्याप्तावस्थायां यावत् मनुजद्विकं न बध्नाति तावत द्व्यशीतिप्रकृत्यात्मकं सत्त्वस्थानं भवति । यद्वा क्षपकश्रेण्यां पञ्चनवतिसत्ताकस्य त्रयोदशक्षये द्व्यशीतिर्भवति ॥ ५ ॥

भूजलाग्निवायुवनस्पतिष्वेकेन्द्रियवद्वाच्यम् । नवरं तेजोवायुषु मिथ्यादृष्टिगुणस्थानमेव भवति । त्रसकायिकेषु पञ्चेन्द्रियवदिति ॥ ६ ॥

मनोवाग्योगिषु दश सत्तास्थानानि भवन्ति, तद्यथा—त्र्युत्तरशतम्, द्व्युत्तरशतम्, षण्णवतिः, पञ्चनवतिः, त्रिनवतिः, नवतिः, एकोननवतिः, चतुरशीतिः, त्र्यशीतिः, उद्वलनायोग्यवर्जद्व्यशीतिरिति । मनुजद्विकविहीनं द्व्यशीतिप्रकृतिरूपं न भवति, अपर्याप्तावस्थाभावित्वात्, लब्ध्यपेक्षया तु भवत्यपि । नवाष्टरूपे तु न भवतः, अयोग्यवस्थाभावित्वात्तयोः । शेषाणि सत्तास्थानानि मनुजगतिवत् परिभावनीयानि । काययोगिषु मनोयोगिवत्, नवरं मनुजद्विकविहीनमपि द्व्यशीतिरूपं सत्तास्थानं भवति ॥ ७ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

वेदत्रिके कषायचतुष्के च काययोगिवद्वाच्यम् ॥ ७ ॥

मत्यादिज्ञानचतुष्के त्र्युत्तरशतद्व्युत्तरशतषण्णवतिपञ्चनवतिनवत्येकोननवतित्र्यशीतिद्व्यशीतिरूपाण्यष्टौ भवन्ति । तत्राविरतसम्यग्दृष्टेरारभ्योपशान्तमोहगुणस्थानं यावदुपशमश्रेण्यां क्षपकश्रेण्यामनिवृत्तिबादरप्रथमभागं यावदाद्यानि चत्वारि सत्तास्थानानि भवन्ति । ततः क्षीणमोहं यावत् त्रयोदशप्रकृतिक्षये नवत्येकोननवतित्र्यशीतिद्व्यशीतिरूपाणि चत्वारि भवन्ति । मनःपर्यवज्ञाने प्रमत्तादारभ्य क्षीणमोहपर्यवसानानि गुणस्थानानि भवन्ति । मत्यादिज्ञानत्रिके अविरतसम्यग्दृष्टेरारभ्य क्षीणमोहपर्यन्तानि भवन्ति । केवलज्ञाने षड् सत्तास्थानानि भवन्ति, तद्यथा—नवतिः, एकोननवतिः, त्र्यशीतिः, द्व्यशीतिः, नव, अष्टौ चेति । तत्र सयोगिकेवलिनि अयोगिन्युपान्तसमयं च यावदाद्यानि चत्वारि, अन्तसमये च नवाष्टाविति । विभङ्गज्ञाने त्रीणि सत्तास्थानानि भवन्ति, तद्यथा—द्व्युत्तरशतम्, षण्णवतिः, पञ्चनवतिरिति । तत्र मिथ्यादृष्टौ त्रीणि भवन्ति । सासादनमिश्रयोः षण्णवतिवर्जे द्वे भवतः । मतिश्रुताज्ञानद्विके षड् भवन्ति, तद्यथा—द्व्युत्तरशतम्, षण्णवतिः, पञ्चनवतिः, त्रिनवतिः, चतुरशीतिः, द्व्यशीतिरिति । मिथ्यादृष्टौ षडपि भवन्ति । सासादनमिश्रयोः द्व्युत्तरशतपञ्चनवतिरूपे द्वे भवत इति ॥ ८ ॥

अविरते त्र्युत्तरशतद्व्युत्तरशतषण्णवतिपञ्चनवतित्रिनवतिचतुरशीतिद्व्यशीतिरूपाणि सप्त भवन्ति । तत्र मिथ्यादृष्टावाद्यविहीनानि षड् भवन्ति । सासादनमिश्रयोः द्व्युत्तरशतपञ्चनवतिरूपे द्वे भवतः । अविरतसम्यग्दृष्टौ त्र्युत्तरशतद्व्युत्तरशतषण्णवतिपञ्चनवतिरूपाणि चत्वारि भवन्ति । देशविरतपरिहारविशुद्धयोः त्र्युत्तरशतद्व्युत्तरशतषण्णवतिपञ्चनवतिरूपाणि चत्वारि भवन्ति । परिहारविशुद्धौ प्रमत्ताप्रमत्तरूपे द्वे गुणस्थाने भवतः । सामायिकच्छेदोपस्थापनीययोरष्टौ सत्तास्थानानि भवन्ति, तद्यथा—त्र्युत्तरशतम्, द्व्युत्तरशतम्, षण्णवतिः, पञ्चनवतिः, नवतिः, एकोननवतिः, त्र्यशीतिः, द्व्यशीतिरिति । तत्र प्रमत्ताप्रमत्तापूर्वकरणेष्वाद्यानि चत्वारि भवन्ति । अनिवृत्तिबादरेऽष्टावपीति । सूक्ष्मसम्पराये चानिवृत्तिबादरवदष्टौ भवन्ति । यथाख्यातचारित्रिण उपशान्तमोहे त्र्युत्तरशतद्व्युत्तरशतषण्णवतिपञ्चनवतिरूपाणि चत्वारि भवन्ति । क्षीणमोहे सयोगिकेवलिनश्च नवतिः, एकोननवतिः, त्र्यशीतिः, द्व्यशीतिरिति चत्वारि भवन्ति । अयोगिकेवलिनश्चत्वारि तान्येव नवाष्टौ चेति ॥ ७ ॥

चक्षुरचक्षुर्दर्शनयोः नवाष्टौ वर्जयित्वा शेषाणि दश भवन्ति, केवलं चक्षुर्दर्शने मनुजद्विकविहीनं द्व्यशीतिप्रकृत्यात्मकं न भवति । तत्र मिथ्यादृष्टौ द्व्युत्तरशतषण्णवतिपञ्चनवतित्रिनवतिचतुरशीतिरूपाणि पञ्च, अचक्षुर्दर्शने द्व्यशीतियुतानि षड् भवन्ति । सास्वादनादिषु मनुजगतिवद्वाच्यम् । अवधिदर्शनेऽष्टौ सत्तास्थानानि भवन्ति, तद्यथा—त्र्युत्तरशतं, द्व्युत्तरशतं, षण्णवतिः, पञ्चनवतिः, नवतिः, एकोननवतिः, त्र्यशीतिः, मनुजद्विकयुता द्व्यशीतिरिति । गुणस्थानेष्ववधिज्ञानवद्वाच्यम् । केवलदर्शने केवलज्ञानवद्वाच्यम् ॥ ४ ॥

आद्यलेश्यात्रिके सप्त सत्तास्थानानि भवन्ति, तद्यथा—त्र्युत्तरशतम्, द्व्युत्तरशतम्,

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

षण्णवतिः, पञ्चनवतिः, त्रिनवतिः, चतुरशीतिः, द्व्यशीतिरिति । तत्र मिथ्यादृष्टौ नीलकापोतयोः आद्यवर्जानि षट् भवन्ति । कृष्णलेश्यायां मिथ्यात्वे त्र्युत्तरशतषण्णवतिवर्जानि पञ्च भवन्ति सास्वादनमिश्रयोः द्व्युत्तरशतपञ्चनवतिरूपे द्वे भवतः । अविरतसम्यग्दृष्टिदेशविरतप्रमत्तेषु त्र्युत्तरशतद्व्युत्तरशतषण्णवतिपञ्चनवतिरूपाणि चत्वारि भवन्ति । तेजःपद्मयोः चत्वारि सत्तास्थानानि भवन्ति, तद्यथा—त्र्युत्तरशतम्, द्व्युत्तरशतम्, षण्णवतिः, पञ्चनवतिरिति । मिथ्यादृष्ट्यादित्रिके द्व्युत्तरशतपञ्चनवतिरूपे द्वे भवतः । अविरतसम्यग्दृष्टिदेशविरतप्रमत्ताप्रमत्ताख्येषु चतुर्षु गुणस्थानेषु चत्वार्यपि सत्तास्थानानि भवन्ति । शुक्ललेश्यायां त्र्युत्तरशतद्व्युत्तरशतषण्णवतिपञ्चनवतिनवत्येकोननवतित्र्यशीतिद्व्यशीतिरूपाण्यष्टौ भवन्ति । मिथ्यादृष्ट्यादित्रिके द्व्युत्तरशतपञ्चनवतिरूपे द्वे भवतः । अविरतसम्यग्दृष्टेरारभ्योपशान्तमोहं यावत् त्र्युत्तरशतद्व्युत्तरशतषण्णवतिपञ्चनवतिरूपाणि चत्वारि भवन्ति । अनिवृत्तिबादरे त्रयोदशक्षयानन्तरं नवत्येकोननवतित्र्यशीतिद्व्यशीतिरूपाणि चत्वारि सयोगिकेवलिनं यावत् भवन्ति ॥ ६ ॥

भव्ये द्वादशापि सत्तास्थानानि भवन्ति । अभव्ये चत्वारि भवन्ति, तद्यथा—पञ्चनवतिः, त्रिनवतिः, चतुरशीतिः, द्व्यशीतिरिति ॥ २ ॥

मिथ्यात्वे षट् भवन्ति, तद्यथा—द्व्युत्तरशतं, षण्णवतिः, पञ्चनवतिः, त्रिनवतिः, चतुरशीतिः, द्व्यशीतिरिति । सास्वादनसम्यग्दृष्टौ, द्व्युत्तरशतम्, पञ्चनवतिश्चेति । मिश्रदृष्टावप्येवमेव द्वे भवतः । क्षायोपशमिकसम्यग्दृष्टावविरतादिचतुर्षु गुणस्थानेषु चत्वारि सत्तास्थानानि भवन्ति, तद्यथा—त्र्युत्तरशतम्, द्व्युत्तरशतम्, षण्णवतिः, पञ्चनवतिरिति । औपशमिकसम्यग्दृष्टावविरतसम्यग्दृष्टेरारभ्योपशान्तमोहं यावत् क्षायोपशमिकवच्चत्वारि भवन्ति । क्षायिकसम्यग्दृष्टौ त्र्युत्तरशतद्व्युत्तरशतषण्णवतिपञ्चनवतिनवत्येकोननवतित्र्यशीतिद्व्यशीतिनवाष्टरूपाणि दश भवन्ति । तत्राविरतसम्यग्दृष्टेरारभ्यानिवृत्तिबादरसम्परायं यावदाद्यानि चत्वारि भवन्ति । अनिवृत्तिबादरे नामत्रयोदशक्षये तु नवत्यादीनि चत्वारि सयोगिकेवलिनं यावत् भवन्ति । अयोगिकेवलिनि नवत्यादीनि षट् भवन्तीति ॥ ६ ॥

सञ्ज्ञिनि मनोयोगवत् नाम्नः सत्तास्थानानि वाच्यानि, अयोग्यवस्थायामपि संज्ञित्वविवक्षणे नवाष्टरूपेऽपि भवतः । असंज्ञिनि मिथ्यादृष्टौ पञ्च सत्तास्थानानि भवन्ति, तद्यथा—द्व्युत्तरशतम्, पञ्चनवतिः, त्रिनवतिः, चतुरशीतिः, द्व्यशीतिरिति । सास्वादने पञ्चनवतिरूपमेकमेव भवति ॥ २ ॥

आहारके नवाष्टौ वर्जयित्वा सर्वाणि सत्तास्थानानि भवन्ति । गुणस्थानेषु काययोगिवत् सर्वं वाच्यम् । अनाहारके द्वादशापि सत्तास्थानानि भवन्ति । मिथ्यादृष्टौ द्व्युत्तरशतषण्णवतिपञ्चनवतित्रिनवतिचतुरशीतिद्व्यशीतिरूपाणि षट् भवन्ति । सास्वादने पञ्चनवतिरूपमेकमेव भवति । अविरतसम्यग्दृष्टौ त्र्युत्तरशतद्व्युत्तरशतषण्णवतिपञ्चनवतिरूपाणि चत्वारि भवन्ति । सयोगिकेवलिनि नवत्येकोननवतित्र्यशीतिद्व्यशीतिरूपाणि चत्वारि

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

भवन्ति । अयोगिकेवलिनि पूर्वोक्तानि चत्वारि नवाष्टसहितानि भवन्ति ॥ २ ॥ इत्युक्तानि मार्गणास्थानेषु नामकर्मणः सत्तास्थानानि ॥

॥ अथ मार्गणासु नाम्नः सत्स्थानानि ॥

मार्गणा	कतिपयानि	सत्स्थानानि [नाम्नः] कस्मिन् गुणे
नरकगतौ	३	—१०२–९६–९५ [ओघेन]
		मिथ्यात्वे ३—१०२–९६–९५
		सास्वादने १—९५
		मिश्रे २—१०२–९५
		अविरते ३—१०२–९६–९५
देवगतौ	४	—१०३–१०२–९६–९५
		मिथ्यादृष्टौ २—१०२–९५
		सास्वादने १– ,,
		मिश्रे २– १०२ ,,
		अविरते ४—१०३–१०२–९६–९५
तिर्यग्गतौ	५	—१०२–९५–९३–८४–८२
		मिथ्यात्वे–१०२–९५–९३–८४–८२ सा० १–९५
		३–४–५ गुणेषु २—१०२–९५
मनुजगतौ	१२	–१०३–१०२–९६–९५–९३–९०–८९–८४–८३–८२–९–८
		मिथ्यात्वे ५—१०२–९६–९५–९३–८४
		२–३ योः २—१०२–९५
		४तः ८षु४—१०३–१०२–९६–९५
		९–१० योः८—१०३–१०२–९६–९५–९०–८९–८३–८२
		११ मे ४—१०३—१०२–९६–९५
		१२–१३ योः ४—९०–८९–८३–८२
		१४ स्योपान्त्यसमयं यावत्
		१४ स्यान्त्यसमये—९–८
४कुजातिषु	५	ओघे ५—१०२–९५–९३–८४–८२ १ मे २ ये च तिर्यग्गतिवत्
पञ्चेन्द्रिये	१२	मनुजगतिवत्
पृथ्वी-अप् वनस्पतिषु	५ ४	—१०२–९५–९३–८४–८२ [ओघे १–२ योश्च] तिर्यग्गतिवत्
तेजोवाय्वोः	५	—१०२–९५–९३–८४–८२ [ओघे –१ मे च]
त्रसकाये	१२	—मनुजगतिवत्
मनोयोगे वचनयोगे	९ [१०]	–१०३–१०२–९६–९५–९३–९०–८९–८४–८३ ८२ वा लब्ध्यपेक्षया
काययोगे	१०	–मनोयोगवत् परं ८२ सहितं
३ वेदेषु	१०	९–८ वर्जं सर्वाणि
४कषायेषु	१०	९–८ वर्जं शेषाणि
३ मत्यादिषु	८	–१०३–१०२–९६–९५–९०–८९–८३–८२
		४ तः ११ सु ४–१०३–१०२–९६–९५ उपशमकेषु
		४तः ९मस्य प्रथमभागं | ४–१०३–१०२–९६–९५ क्षपकापेक्षया
		९ मस्य द्वितीयभागात् क्षीणमोहं यावत | ४–९०–८९–८३–८२
मनःपर्यये	८	–मत्यादिवत्, परं गुणस्थानानि ६तः१२
केवलज्ञाने	६	–९०–८९–८३–८२–९–८
		१३ शे–१४ शे उपान्त्यसमयं यावत् ४–९०–८९–८३–८२
		१४ शस्य चरमसमये २–९–८
विभंगे	३	–१०२–९६–९५ मिथ्यात्वे ओघे च. १०२–९५ सास्वादने.
मत्यज्ञाने श्रुताज्ञाने	६	१०२–९६–९५–९३–८४–८२ओघे. मिथ्यात्वे ६ ओघवत्
		सास्वादने मिश्रे च | २–१०२–९५

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अविरते	७	·१०३–१०२–९६–९५–९३–८४-८२
		मिथ्यात्वे ६–१०३ वर्जानि शेपाणि.
		सास्वा०मिश्रयोः द्वे–१०२–९५
		सम्यक्त्वे चत्वारि-१०३–१०२·९६-९५
देशाविरते	४	१०३–१०२–९६–९५ पंचमगुणस्थाने एव.
परिहारे	४	१०३–१०२–९६–९५[६–७गुणयोः]
सामायिके छेदोप०	८	ओघेन.–१०३–१०२-९६–९५-९०–८९–८३–८२ ६–७–८–गुणेषु४–१०३ –१०२–९६–९५.९ मे ८–ओघवत्
सू.संपराये	८	–सामायिकवत्, परं १० मे गुणे.
यथाख्याते	८	– ,,
		११ मे ४ –देशविरतिवत्.
		१२–१३ योः ४–९०–८९–८३–८२
		१४ शे ६–९०–८९–८३–८२–९–८
चक्षुषि अचक्षुषि	९ १०	–८२–९–८ वर्जशेषाणि ९.
		–९–८ वर्जशेषाणि १०
		मिथ्यात्वे ५–१०२–९६–९५–९३–८४– चक्षुषि.
		,, ६–१०२–९६–९५–९३–८४ –८२ अ०चक्षुषि.
		२ यादिषु–मनुजगतिवत्. द्वयोः
अवधिद०	८	–१०३–१०२–९६–९५–९०–८९ –८३–८२
		४ तः १२ गुणेषु–अवधिज्ञानवत्
केवलद०	६	–केवलज्ञानवत्. गुण० १३–१४
३कृष्णादि-लेश्यासु	७	-१०३–१०२–९६–९५–९३–८४·८२
	नी.का.	मिथ्यात्वे ६–१०३ वर्जानि. शेषाणि
	कृ०	मिथ्या०५–१०३,९६ वर्जानि.
		२–३ योः २–१०२–९५
		४–५–६ षु ४–१०३–१०२–९६–९५
२ तेजः–पद्मयोः	४	–१०३–१०२–९६–९५
		मिथ्यात्वे २–१०२–९५
		२–३ योः २–१०२–९५
		४-५-६–७षु ४–१०३–१०२–९६-९५

शुक्ले	८	-१०३-१०२-९६-९५-९०-८९-८३-८२
		मिथ्यात्वे–१०२–९५
		२–३ योः–१०२–९५
		४ तः ११ षु–१०३–१०२–९६–९५ उपशमकानाम्.
		९ तः १३ षु–९०–८३–८२ क्षपकाणाम्
भव्ये	१२	–सर्वाणि. मनुजगतिवत्.
अभव्ये	४	–९५–९३–८४–८२
मिथ्यात्वे	६	–१०२–९६–९५–९३–८४–८२
सास्वादने	२	१०२–९५
मिश्रे	२	–,, ,,
क्षयोप०	४	१०३-१०२-९६–९५ [४-५-६-७गुणेषु]
उपशमे	४	१०३-१०२-९६-९५[४तः११शं यावत्]
क्षायिके	१०	१०३–१०२–९६–९५–९०–८९ ८३–८२–९–८
		४ तः८ मं यावत् ४–१०३–१०२–९६–९५–
		९–१० मे ८–१०३–१०२–९६–९५ –९०–८९–८३–८२
		११मे४–१०३–१०२–९६–९५
		१२–१३–मे४–९०–८९–८३–८२
		१४ शे ६–९०–८९–८३–८२–९–८
सञ्ज्ञिनि	९ [११]	–मनोयोगवत् अयोगित्वविवक्षयां
असंज्ञि०	५	–१०२–९५–९३–८४–८२. मिथ्यात्वेऽपि पंञ्च
		सास्वादने १–९५
आहारके	१०	–९–८ वर्जशेषाणि. [गुणेषु काययोगवत्]
अनाहारे	१२	–सर्वाणि.
		मिथ्यात्वे६-१०२-९६-९५-९३-८४-८२
		सास्वादने १–९५
		अविरते ४–१०३–१०२–९६–९५
		सयोगिनि ४–९०–८९–८३–८२
		अयोगिनि६:९०–८९–८३–८२–९–८

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अथ गोत्रस्य सत्स्थानान्युच्यन्ते—देवनरकगत्योः चतुर्ष्वपि गुणस्थानेषु गोत्रस्य द्विप्रकृत्यात्मकमेकमेव सत्तास्थानं भवति । तिर्यग्गतौ मिथ्यादृष्टिगुणस्थाने द्विप्रकृतिरूपं नीचगोत्ररूपमेकप्रकृत्यात्मकं च भवति । सास्वादनादिषु चतुर्षु द्विप्रकृत्यात्मकमेकमेव भवति । मनुजगतौ द्विप्रकृत्यात्मकमयोगिद्विचरमसमयं यावद्भवति, चरमसमये उच्चैर्गोत्ररूपमेकमेव भवति ॥ ४ ॥ जातिपञ्चककायषट्ककाययोगवेदत्रिककषायचतुष्कमतिश्रुताज्ञानाविरताचक्षुर्दर्शनाशुभलेश्यात्रिकभव्याभव्यमिथ्यात्वासंज्ञिसंज्ञ्याहारकानाहारकरूपासु त्रयस्त्रिंशन्मार्गणासु तेजोवायुकायिकयोरुच्चैर्गोत्रोद्वलनानन्तरं ततो निर्गत्य चान्यासूक्तरूपासु मार्गणास्वागतस्य मिथ्यादृष्टेः नीचगोत्ररूपमेकमेव सत्त्वस्थानं भवति । अन्येषां तु द्विप्रकृत्यात्मकं मिथ्यादृष्ट्यादिषु सर्वेषु गुणस्थानेष्वेकमेव भवति । मार्गणासु गुणस्थानानि स्वयं वाच्यानि ॥३३॥ वाड्मनोयोगमत्यादिज्ञानचतुष्कविभङ्गज्ञानयथाख्याताविरतवर्जचारित्रपञ्चकचक्षुरादिदर्शनद्विकशुभलेश्यात्रिकोपशमक्षयोपशमक्षायिकमिश्रसासादनरूपासु द्वाविंशतिषु मार्गणासु मिथ्यादृष्टिषु गुणस्थानेषु सर्वत्र द्विप्रकृत्यात्मकमेकमेव सत्त्वस्थानं भवति ॥ २२ ॥ केवलज्ञानकेवलदर्शनयथाख्यातचारित्रेषु गुणस्थानद्वयेऽपि द्विप्रकृतिरूपम्, अयोगिचरमसमये उच्चैर्गोत्ररूपं च भवति ॥ ३ ॥ इत्युक्तानि मार्गणास्थानेषु गोत्रकर्मणः सत्तास्थानानि ॥

॥ मार्गणासु गोत्रसत्स्थानानि ॥

देव—नरकयोः	२—उ०—नी०	[१—२—३—४ गुणेषु.]
तिर्यग्गतौ	२—उ०—नी०	मिथ्यात्वे
	१—नी०	
	२—उ०—नी० [२-३-४-५ गुणेषु]	
मनुजगतौ	२—उ०—नी० अयोग्युपान्त्यसमयं यावत्	
	१—उ० अयोगिचरिमसमये.	
३३ मार्गणासु	२—उ०—नी०	मिथ्यात्वे.
	१—नी०	
	२—उ०—नी० मिथ्यादृष्टिभिन्नानाम्	
मन—वचन—४ मत्यादि—विभंग—५ यथाख्याताविं० वर्जचा०—२ चक्षुरादि—३ सुलेश्या—५मिथ्यात्ववर्जस- म्यक्त्व [इति २२] षु	२—उ०नी० मिथ्यात्वादिषु.	
केवलज्ञान—यथा० केवलदर्शन	२—उ०नी० १३—१४ गुणयोः १—उ० १४ शे चरमसमये.	

॥ मार्गणासु संक्रमप्रकृतय उच्यन्ते ॥

देवनरकगत्योः सामान्येन संक्रमे आयुश्चतुष्कवर्जं चतुष्पञ्चाशच्छतं भवति । तत्र मिथ्यादृष्टौ मिथ्यात्ववर्जं त्रिपञ्चाशच्छतं भवति । सास्वादने तदेवाहारकसप्तक जिनसम्यक्त्वमिश्रवर्जं त्रिचत्वारिंशच्छतं भवति । मिश्रे तदेवाहारकसप्तकयुतमुच्चैर्गोत्रवर्जमेकोनपञ्चाशच्छतं भवति । अविरतसम्यग्दृष्टौ जिनमिश्रमिथ्यात्वयुतं तदेव द्विपञ्चाशच्छतं भवति । अयं च प्रकारः सौधर्म्मादिषु रत्नप्रभादित्रिके च विद्यते । भवनपतिव्यन्तरज्योतिष्केषु पङ्कादिषु चौघे जिनवर्जं त्रिपञ्चाशच्छतं, मिथ्यात्वे मिथ्यात्ववर्जं द्विपञ्चाशच्छतं, सास्वादने त्रिचत्वारिंशच्छतं मिश्रे एकोनपञ्चाशच्छतमविरते चैकपञ्चाशच्छतं भवति । तमस्तमायां सामान्येन त्रिपञ्चाशच्छतं भवति, मिथ्यादृष्टौ मिथ्यात्वनीचगोत्रवर्जं तदेवैकपञ्चाशच्छतं संक्रमे प्राप्यते । सास्वादने आहारकसप्तकसम्यक्त्वमिश्रवर्जद्विचत्वारिंशच्छतं, मिश्रे चाहारकसप्तकनीचयुतमुच्चैर्गोत्रवर्जं तदेवैकोनपञ्चाशच्छतं

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

भवति । अविरते मिश्रमिथ्यात्वयुतमेकपञ्चाशच्छतं भवतीति ॥ २ ॥ तिर्यग्गतौ पङ्कादिवत् सर्वं वाच्यम्, नवरं पञ्चमगुणस्थानेऽविरतिगुणस्थानकवदिति ॥ १ ॥ मनुजगतौ गुणस्थानोक्ताः संक्रमप्रकृतयो वाच्याः ॥ १ ॥

प्रथमजातिचतुष्के, असंज्ञिनि, भूजलतरुषु च सामान्येन जिनायुश्चतुष्टयवर्जं त्रिपञ्चाशच्छतं भवति । मिथ्यादृष्टौ मिथ्यात्ववर्जं द्विपञ्चाशच्छतं भवति । आहारकसप्तकोद्वलिते तु पञ्चचत्वारिंशच्छतं भवति । देवद्विकोद्वलनायां तु त्रिचत्वारिंशच्छतं भवति । युगपत् नरकद्विके वैक्रियसप्तके चोद्वलिते चतुस्त्रिंशच्छतं भवति, उद्वलितनरद्विकोच्चगोत्राणां तेजोवायुकायिकेभ्य आगतानां नरद्विकोच्चगोत्राणां यावत् बन्धावलिका न पूर्णा भवति तावत् गोत्रद्विकमनुजद्विकयोः यतः संक्रमो न भवति ततस्त्रिंशदधिकं शतं भवति । सास्वादने जिननामदर्शनत्रिकायुश्चतुष्टयाहारकसप्तकवर्जं त्रिचत्वारिंशदधिकं शतं संक्रमे प्राप्यते ॥ ८ ॥ तेजोवायुकायिकयोः सामान्ये मिथ्यादृष्टौ च मिथ्यात्वजिननामनीचगोत्रायुश्चतुष्टयवर्जमेकपञ्चाशच्छतं भवति, शेषं भूकायिकवदिति ॥२॥ पञ्चाक्षत्रसकायिकयोः मनुजगतिवदिति ॥२॥

योगत्रिकवेदत्रिककषायचतुष्कज्ञानचतुष्काज्ञानत्रिकाविरतदेशविरतसामायिकच्छेदोपस्थापनीयपरिहारविशुद्धिसूक्ष्मसम्परायथाख्यातचारित्रदर्शनत्रिकलेश्याषट्कभव्यौपशमिकक्षायोपशमिकमिथ्यात्वसास्वादनमिश्रसंज्ञ्याहारकानाहारकरूपासु द्विचत्वारिंशत् मार्गणासु स्वस्वगुणस्थानानुसारेण संक्रमप्रकृतयो वाच्याः । यासु मार्गणासु यावन्ति गुणस्थानानि तासु तत्रोक्ताः संक्रमप्रकृतयो वक्तव्याः ॥ ४२ ॥ केवलज्ञानदर्शनयोः नास्ति संक्रमः, प्रतिग्रहाभावादिति ॥ २ ॥

क्षायिकसम्यग्दृष्टौ सामान्येनोच्चैर्गोत्रदर्शनसप्तकायुश्चतुष्कवर्जं षट्चत्वारिंशच्छतं भवति । अविरतादारभ्य प्रमत्तं यावदेवमेव भवति । अप्रमत्तादौ सातस्य संक्रमो न भवति, प्रतिग्रहाभावात्, तत अप्रमत्तापूर्वकरणयोः पञ्चचत्वारिंशच्छतं भवति । अनिवृत्तिकरणे यशःकीर्त्तेः संक्रमो न भवति पतद्ग्रहाभावात्ततश्चतुश्चत्वारिंशच्छतं भवति । सूक्ष्मसम्पराये मोहनीयसंक्रमाभावेन त्रयोविंशत्यधिकं शतं भवति । उपशान्तादौ संक्रमाभाव इति ॥ १ ॥

अभव्ये जिनाहारकसप्तकदर्शनत्रिकायुश्चतुष्टयवर्जं त्रिचत्वारिंशच्छतं भवतीति ॥ १ ॥

उक्ता मार्गणासु संक्रमप्रकृतयः ॥

॥ मार्गणासु संक्रमप्रकृतियन्त्रम् ॥

देव–नरकयोः १५४–आयुः ४ वर्जं ओघेन	
वैमानिक–नारकेषु	मिथ्यात्वे १५३–मिथ्या० वर्जं च
	सास्वा० १४३ –जिन–आ०–सम्य०–मिश्रवर्जं च.
	मिश्रे १४९– आ० युतम्, उच्चैर्वर्जं च.
	अविरते १५२–जिन–मिथ्या०-मिश्रसहितं. १४९.

भव.व्य.ज्यो.४-५-६पृथ्वीषु	ओघे १५३–जिनवर्जं, [४ आयुर्वर्जं च]
	मिथ्यात्वे १५२–मिथ्या० वर्जं च.
	सास्वा० १४३–जिन–आ०–सम्य०–मिश्रवर्जं च.
	मिश्रे १४९–आ० युतम्, उच्चैर्वर्जं च.
	अविरते १५१–मिथ्या० मिश्रसहितं १४९.

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

वमक्खमार्गा	ओघे १५२–जिनवर्जं, [४ आयुर्वर्जं च]	
	मिथ्यात्वे १५१–मिथ्या० नीचैर्वर्जं च.	
	सास्वादने १४२–आ०७ –सम्य०–मि० च.	
	मिश्रे १४९–उच्चैर्वर्जं आहा० ७ नीचैर्युतं.	
	अविरते १५१–मिश्र–मिथ्यात्वसहितं	
तिर्यग्गतौ	ओघे १५३	भवनपत्यादिवत् प्रकृतिवर्जनं युक्तीकरणं च.
	मिथ्या० १५२	
	सास्वा० १४३	
	मिश्रे १४९	
	अविरते १५१	
	देशविरते १५१–अविरतवत्	
मनुजे	गुणस्थानोक्ताः संक्रमप्रकृतयः	
४कुजाति	ओघे	१५३ जिन–४ आयुर्वर्जं
१असंज्ञि	मिथ्यात्वे	१५२. मिथ्यात्ववर्जं.
भू–जल तरु	,,	१४५, आहा० सप्तकोद्वलिते.
		१४३, देवद्विकोद्वलिते.
		१३४, नरक २ वै० ७ कोद्वलिते.
		१३०, नर २–गोत्र २ वर्जं.
	सास्वा० १४३ जिनाहा० दर्शन ३ आयुः४वर्जं.	

तेजो–वायोः	ओघे, मिथ्यात्वे	१५१, मिथ्या०–जिन–नीच–आयुः ४ वर्जं १४५–१४३–१३४–१३० भूकायिकवत्
पंचे० त्रसयोः	मनुजगतिवत्	
४२ मार्गणासु	स्वस्वगुणस्थानोक्तसंक्रमानुसारेण.	
केवल२के	० संक्रमाभावः	
क्षायिके	ओघे,१४६ उच्चैर्गो०–दर्श०७–आयुः ४वर्जं.	
	४ तः ६, १४६ ओघवत्	
	७–८ मे, १४५ सातवर्जं.	
	९ मे, १४४ यशोवर्जं.	
	१० मे, १२३–२१ मोहनीयवर्जं.	
	११, १२, १३, १४, शे च संक्रमाभावः	
अभव्ये	१४३,जिन०- आ०७-दर्श०३-आयुः ४ वर्जं.	

अथ मार्गणासु संक्रमस्थानान्युच्यन्ते–तत्र ज्ञानावरणान्तराययोः केवलज्ञानदर्शनयथाख्यातचारित्रवर्जेष्वेकोनषष्टिमार्गणासु पञ्चपञ्चप्रकृत्यात्मकमेकैकमेव संक्रमस्थानं यावत्सु स्वीयेषु स्वीयेषु गुणस्थानेषु भवति ॥ ५९ ॥ केवलज्ञानदर्शनयथाख्यातचारित्रेषु नास्ति संक्रमस्थानमिति ॥ ३ ॥

मनुजगतिवर्जगतित्रिकाद्यजातिचतुष्काद्यकायपञ्चकाज्ञानत्रिकाविरतदेशविरतपरिहारविशुद्धिकशुक्ललेश्यावर्जलेश्यापञ्चकाभव्यमिथ्यात्वसास्वादनमिश्रक्षायोपशमिकौपशमिकासंज्ञ्यनाहारकरूपासु मार्गणासु स्वीयेषु२ सर्वेषु गुणस्थानेषु नवप्रकृत्यात्मकं दर्शनावरणस्य संक्रमस्थानं प्राप्यते ॥ ३१ ॥ मनुजगतिपञ्चाक्षजातित्रसकाययोगत्रिकवेदत्रिककषायचतुष्ककेवलज्ञानवर्जज्ञानचतुष्कसामायिकच्छेदोपस्थापनीयसूक्ष्मसम्परायकेवलदर्शनवर्जदर्शनत्रिकशुक्ललेश्याभव्यक्षायिकसम्यक्त्वसंज्ञ्याहारकरूपासु मार्गणासु दर्शनावरणस्य नवप्रकृत्यात्मकं षट्प्रकृत्यात्मकं च संक्रमस्थानं भवति । गुणस्थानेषु स्वयं प्रागुक्तानुसारेण संक्रमस्थानं परिभावनीयमिति । षट्प्रकृत्यात्मकं च क्षपकश्रेण्यामनिवृत्तिकरणे स्त्यानर्द्धित्रिकक्षयानन्तरं वक्तव्यमिति ॥ २८ ॥

केवलज्ञानदर्शनयथाख्यातचारित्रेषु नास्ति संक्रमस्थानम्, प्रतिग्रहाभावादिति ॥ ३ ॥
वेदनीयस्य केवलज्ञानदर्शनयथाख्यातचारित्रेषु संक्रमस्थानं न भवति, साम्परायिक-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

बन्धाभावेन प्रतिग्रहाभावादिति ॥३॥ सूक्ष्मसम्पराये असातवेदनीयरूपमेकमेव संक्रमस्थानं भवति, सातवेदनीयस्य तु बध्यमानत्वेन तस्य प्रतिग्रहत्वादिति ॥ १ ॥ मनुजगतिपञ्चाक्षजातित्रसकाययोगत्रिकवेदत्रिककषायचतुष्ककेवलवर्जज्ञानचतुष्कसामायिकच्छेदोपस्थापनीयपरिहारविशुद्धिककेवलवर्जदर्शनत्रिकशुभलेश्यात्रिकभव्यक्षायोपशमिकौपशमिकक्षायिकसंज्ञ्याहारकरूपासु मार्गणासु प्रमत्तं यावत् सातासातरूपे द्वे संक्रमस्थाने भवतः । अप्रमत्तादावसातरूपमेकमेव संक्रमस्थानं भवति, सातस्य तु बध्यमानत्वेन तस्य प्रतिग्रहभावात् सातरूपं संक्रमस्थानं न भवतीति ॥ ३२ ॥ मनुजगतिवर्जगतित्रिकाद्यजातिचतुष्काद्यकायपञ्चकाज्ञानत्रिकाविरतदेशविरताशुभलेश्यात्रिकाभव्यमिथ्यात्वसासादनमिश्रासंज्ञ्यनाहारकरूपासु मार्गणासु सातासातरूपे द्वे संक्रमस्थाने भवतः ॥ २६ ॥

॥ मार्गणासु संक्रमस्थानयन्त्राणि ॥

ज्ञानावरणीये अन्तराये च		
२केवल १यथा०षु	०संक्रमाभावः (पतद्ग्रहाभावेन)	
शेष ५९ षु	१—५ प्रकृत्यात्मकम्	
दर्शनावरणीये		
३ नरगतिवर्जगति—४ कुजाति—५ स्थावरकाय-३अज्ञान-अविरत—देशवि०—परिहार—५आद्यलेश्या—अभव्य—५क्षायिकवर्जसम्य०—असंज्ञि—अनाहारे [३१] षु	१—नवप्रकृत्यात्मकं स्वस्वसर्वगुणेषु.	
केवलद्विके यथाख्याते च	०संक्रमाभावः पतद्ग्रहाभावेन	
शेष२८षु२	९ सर्वप्रकृत्यात्मकं, १तः १० गुणेषु शमकानां.	
	६स्त्यान०३रहितं क्षपकाणां नवमगुणतः स्त्या०	
	३ क्षयानन्तरम्	
वेदनीये		
केवल—१यथा०षु	प्रतिग्रहाभावेन संक्रमाभावः	
३ मनुजवर्जगति, ४कुजाति, ५ स्था० काय,३अज्ञान,अविरत,देशवि०,३कुलेश्या,अभ०,मिथ्या०,सास्वा०,मिश्र, असं०, अनाहार इति २६ षु	२ सातमसातं च	
सू० संपराये	१ असातरूपम्	
शेष ३२ षु [२—१ इति]	२ सातमसातं वा.	१ तः ६ गुणेषु
	१ असातमेव	७ तः १० गुणेषु

मोहनीयस्य संक्रमस्थानानि त्रयोविंशतिः भवति, तद्यथा—सप्तविंशतिः, षड्विंशतिः, पञ्चविंशतिः, त्रयोविंशतिर्द्वाविंशतिरेकविंशतिर्विंशतिरेकोनविंशतिरष्टादश, चतुर्दश, त्रयोदश, द्वादशैकादश, दश, नवाष्टौ, सप्त, षट्, पञ्च, चतस्रः, तिस्रः, द्वे, एकप्रकृत्यात्मकं चेति ।

देवनारकतिर्यक्षु सामान्येन पञ्च संक्रमस्थानानि भवन्ति, तद्यथा—सप्तविंशतिः, षड्विंशतिः, पञ्चविंशतिः, त्रयोविंशतिः, एकविंशतिरिति । मिथ्यादृष्टावाद्यानि चत्वारि संक्रमस्थानानि भवन्ति । तत्र मिथ्यात्वस्य प्रतिग्रहत्वेन तद्व्यतिरिक्ताः सप्तविंशतिः, सम्यक्त्वे उद्वलिते षड्विंशतिः, मिश्रे तूद्वलिते अनादिमिथ्यादृष्टेर्वा पञ्चविंशतिः, विसंयोजितानन्तानुबन्धिनः प्राप्तमिथ्यात्वस्यानन्तानुबन्धिमिथ्यात्वव्यतिरिक्ताः त्रयोविंशतिरिति । सास्वादनमिश्रयोः पञ्चविंशतिः, दर्शनत्रिकस्य संक्रमाभावात् । मिश्रे विसंयोजितानन्तानुबन्धिनश्चैकविंशतिरिति । अविरतसम्यग्दृष्टौ सप्तविंशतिषड्विंशतित्रयोविंशत्येकविंशतिरूपाणि चत्वारि संक्रमस्थानानि भवन्ति । क्षायोपशमिकसम्यग्दृष्टेः सम्यक्त्वस्य प्रतिग्रहत्वेन तद्व्यतिरिक्ता सप्तविंशतिः, औपशमिकसम्यग्दृष्टेरावलिकाया अभ्यन्तरे वर्तमानस्य मिश्रसम्यक्त्ववर्जा

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

षड्विंशतिः, विसंयोजितानन्तानुबन्धिनः त्रयोविंशतिः। क्षायिकसम्यग्दृष्टेः नरकेषु वालुकाप्रभां यावत्, देवेषु चतुर्विधेष्वपि, तिर्यक्षु युगलिकेषु न शेषेष्वेकविंशतिप्रकृत्यात्मकं संक्रमस्थानं भवति। देशविरतौ तिरश्चां सप्तविंशतिषड्विंशतित्रयोविंशतिरूपाणि त्रीणि संक्रमस्थानानि पूर्ववत् परिभावनीयानि। युगलिकतिर्यक्षु देशविरतेरभावाद्देशविरतावेकविंशतिप्रकृत्यात्मकं संक्रमस्थानं न भवतीति ॥ ३ ॥ मनुष्यगतिपञ्चाक्षजातित्रसकाययोगत्रिकचक्षुरचक्षुर्दर्शनशुक्ललेश्याभव्यसंज्ञ्याहारकरूपासु मार्गणासु सर्वाणि संक्रमस्थानानि भवन्ति। भावना तु प्रागुक्तगुणस्थानानुसारेण कर्तव्येति ॥ १२ ॥ जातिचतुष्ककायपञ्चकासंज्ञ्यज्ञानत्रिकरूपासु मार्गणासु मिथ्यादृष्टौ सप्तविंशतिषड्विंशतिपञ्चविंशतिरूपाणि त्रीणि भवन्ति। यासां सास्वादनगुणस्थानं स्यात् तासां तत्र पञ्चविंशतिप्रकृतिरूपं संक्रमस्थानं भवन्ति। अज्ञानत्रिके मिथ्यादृष्टौ त्रयोविंशतिप्रकृतिरूपमपि संक्रमस्थानं स्यात्। मिश्रगुणस्थाने पञ्चविंशत्येकविंशतिरूपे द्वे संक्रमस्थाने भवत इति ॥ १३ ॥

मत्यादिज्ञानचतुष्कसामायिकच्छेदोपस्थापनीयावधिदर्शनरूपासु मार्गणासु पञ्चविंशतिरूपं संक्रमस्थानं न भवति। शेषाणि संक्रमस्थानानि स्वस्वगुणस्थानानुसारेण स्वयं परिभावनीयानि। अवधिदर्शने आद्यगुणस्थानत्रिकविवक्षणे तु पञ्चविंशतिरूपं संक्रमस्थानं भवत्यपि। मनःपर्यवज्ञाने षड्विंशतिरूपमपि न भवति, प्राथमिकौपशमिकसम्यक्त्वोद्भवत्वात्तस्येति ॥ ७ ॥ सूक्ष्मसम्परायथाख्यातयोरुपशमश्रेण्यां द्विप्रकृतिरूपमेकमेव संक्रमस्थानं भवति, शेषाणि तु न भवन्तीति ॥ २ ॥ केवलज्ञानदर्शनयोः मोहनीयस्य संक्रम एव न भवति, क्षीणत्वात्, कुतः स्थानचिन्तेति ॥ २ ॥ देशविरतपरिहारविशुद्धिकयोः स्वस्वगुणस्थाने सप्तविंशतिषड्विंशतित्रयोविंशतिद्वाविंशत्येकविंशतिरूपाणि पञ्च संक्रमस्थानानि प्रागिव परिभावनीयानि। नवरं परिहारविशुद्धौ षड्विंशतिरूपं संक्रमस्थानं न भवति, प्राथमिकौपशमिकसम्यक्त्वोद्भवत्वात्तस्येति ॥ २ ॥

अविरते षट् संक्रमस्थानानि भवन्ति, तद्यथा—सप्तविंशतिः, षड्विंशतिः, पञ्चविंशतिः, त्रयोविंशतिः, द्वाविंशतिः, एकविंशतिरिति। तत्र मिथ्यादृष्टावाद्यानि चत्वारि, सास्वादने पञ्चविंशतिः, मिश्रे पञ्चविंशतिरेकविंशतिश्च, अविरतसम्यग्दृष्टौ सप्तविंशतिषड्विंशतित्रयोविंशतिद्वाविंशत्येकविंशतिरूपाणि पञ्च भवन्ति। सर्वत्रापि भावना प्रागिव कर्तव्येति ॥ १ ॥

शुक्लवर्जलेश्यापञ्चके सप्तविंशतिषड्विंशतिपञ्चविंशतित्रयोविंशत्येकविंशतिरूपाणि पञ्च संक्रमस्थानानि भवन्ति। तत्र मिथ्यादृष्टौ सप्तविंशतिषड्विंशतिपञ्चविंशतित्रयोविंशतिरूपाणि चत्वारि भवन्ति। सास्वादने पञ्चविंशतिरूपं संक्रमस्थानं भवति। मिश्रे पञ्चविंशत्येकविंशतिरूपे द्वे भवतः। अविरतादिष्वशुभलेश्यात्रिके क्षायोपशमिकसम्यग्दृष्टेरौपशमिकसम्यग्दृष्टेर्वावलिकाया ऊर्ध्वं सप्तविंशतिः संक्रामति, षड्विंशतिसंक्रमस्थानं तु न संभवति औपशमिकसम्यग्दृष्टेरावलिकाया अभ्यन्तरवर्त्तित्वात्, तत्र च शुभलेश्यात्रिकमेव संभवतीति संभावयामः, यतो यद्यपि औपशमिकसम्यक्त्वे षडशीतौ षडपि लेश्या उक्ताः तथापि कर्मप्रकृत्यादौ

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

प्रथमसमयादारभ्यौपशमिकसम्यग्दृष्टिः गुणसंक्रममन्तर्मुहूर्त्तं यावत् करोति ततश्च विध्यातसंक्रम इत्युक्तं, गुणसंक्रमश्च प्रायेण प्रशस्ताध्यवसाये भवतीति । तेजःपद्मलेश्ययोः षड्विंशतिसंक्रमस्थानमौपशमिकसम्यग्दृष्टेर्भवति । एकविंशतिसंक्रमस्थानं क्षायिकसम्यग्दृष्टेः कृतकरणस्य वा भवति । त्रयोविंशतिसंक्रमस्थानं विसंयोजितानन्तानुबन्धिनः उपशमितानन्तानुबन्धिनश्च भवति । मिथ्यात्वक्षये द्वाविंशतिसंक्रमस्थानं शुक्ललेश्यां विहाय नान्यासु भवतीति तन्नोक्तम् ॥ ५ ॥ अभव्ये पञ्चविंशतिरूपमेकमेव संक्रमस्थानं भवति ॥ १ ॥

मिथ्यात्वादित्रिके स्वस्वगुणस्थानोक्तानि संक्रमस्थानानि भवन्ति ॥ ३ ॥

क्षायोपशमिकसम्यक्त्वे चतुर्ष्वपि गुणस्थानेषु सप्तविंशतित्रयोविंशतिद्वाविंशत्येकविंशतिरूपाणि चत्वारि भवन्ति । तत्राष्टाविंशतिसत्ताकस्य सप्तविंशतिः, विसंयोजितानन्तानुबन्धिन उपशमितानन्तानुबन्धिनो वा त्रयोविंशतिः, दर्शनक्षपकस्य मिथ्यात्वे क्षपिते द्वाविंशतिः, कृतकरणस्यैकविंशतिरिति ॥ १ ॥ औपशमिकसम्यग्दृष्टौ सप्तविंशतिषड्विंशतित्रयोविंशतिद्वाविंशत्येकविंशतिविंशतिचतुर्दशत्रयोदशैकादशदशाष्टसप्तपञ्चचतुर्द्विरूपाणि पञ्चदश भवन्ति । तत्राविरतादिषु चतुर्षु सप्तविंशतिषड्विंशतित्रयोविंशतिरूपाणि त्रीणि भवन्ति । अपूर्वकरणे त्रयोविंशतिरूपमेकमेव भवति । शेषाणि सर्वाण्यनिवृत्तिबादरे भवन्ति, भावना तूपशमसम्यग्दृष्टिमाश्रित्योपशमश्रेणिवत् कर्त्तव्या, सूक्ष्मसम्परायोपशान्तमोहयोः द्विप्रकृत्यात्मकमेकमेव भवतीति ॥१॥ क्षायिकसम्यग्दृष्टौ षोडश संक्रमस्थानानि भवन्ति, तद्यथा—एकविंशतिर्विंशतिरेकोनविंशतिरष्टादश त्रयोदश द्वादशैकादश दश नवाष्टौ षट् पञ्च चतस्रः तिस्रो द्वे एका चेति । भावना त्वनिवृत्तिबादरगुणस्थाने क्षायिकसम्यग्दृष्टिमाश्रित्योभयश्रेण्यां कृतैवेति ॥ १ ॥

अनाहारकमार्गणायां सप्तविंशतिषड्विंशतिपञ्चविंशतित्रयोविंशत्येकविंशतिरूपाणि पञ्च संक्रमस्थानानि भवन्ति । तत्र मिथ्यादृष्टौ सप्तविंशतिषड्विंशतिपञ्चविंशतिरूपाणि त्रीणि भवन्ति । सास्वादने पञ्चविंशतिरूपम्, अविरते सप्तविंशतित्रयोविंशत्येकविंशतिरूपाणि त्रीणि भवन्ति ॥ १ ॥

नपुंसकवेदे सप्तविंशतिषड्विंशतिपञ्चविंशतित्रयोविंशतिद्वाविंशत्येकविंशतिविंशतित्रयोदशद्वादशरूपाणि नव संक्रमस्थानानि भवन्ति । तत्र मिथ्यादृष्टौ सप्तविंशतिषड्विंशतिपञ्चविंशतित्रयोविंशतिरूपाणि चत्वारि संक्रमस्थानानि भवन्ति । सास्वादने पञ्चविंशतिरूपं संक्रमस्थानं भवति । मिश्रे पञ्चविंशत्येकविंशतिरूपे द्वे भवतः । अविरतादिषु चतुर्षु सप्तविंशतिषड्विंशतित्रयोविंशतिद्वाविंशत्येकविंशतिरूपाणि पञ्च भवन्ति । अपूर्वकरणे त्रयोविंशत्येकविंशतिरूपे द्वे भवतः । अनिवृत्तिकरणे त्रयोविंशतिद्वाविंशत्येकविंशतिविंशतित्रयोदशद्वादशरूपाणि षट् भवन्ति । भावना तु गुणस्थानोक्तानुसारेण सर्वत्र कर्तव्यैवमग्रेऽपीति ॥ १ ॥ स्त्रीवेदे सप्तविंशतिषड्विंशतिपञ्चविंशतित्रयोविंशतिद्वाविंशत्येकविंशतिविंशत्येकोनविंशतित्रयोदशद्वादशैकादशरूपाण्येकादशसंक्रमस्थानानि भवन्ति । मिथ्यादृष्टेरारभ्यापूर्वक-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

रणं यावत् नपुंसकवत् , एवं पुंवेदेऽपि । अनिवृत्तिबादरगुणस्थाने त्रयोविंशत्येकविंशतिविंशत्येकोनविंशतित्रयोदशद्वादशैकादशरूपाणि सप्त भवन्ति ॥ १ ॥ पुरुषवेदे सप्तविंशतिषड्विंशतिपञ्चविंशतित्रयोविंशतिद्वाविंशत्येकविंशतिविंशत्येकोनविंशत्यष्टादशत्रयोदशद्वादशैकादशदशरूपाणि त्रयोदशसंक्रमस्थानानि भवन्ति । गुणस्थानभावना प्रागिव कर्त्तव्येति ॥ १ ॥

क्रोधे सप्तविंशतिषड्विंशतिपञ्चविंशतित्रयोविंशतिद्वाविंशत्येकविंशतिविंशत्येकोनविंशत्यष्टादशचतुर्दशत्रयोदशद्वादशैकादशदशचतुस्त्रिरूपाणि षोडशसंक्रमस्थानानि भवन्ति ॥ १ ॥ माने सप्तविंशतिषड्विंशतिपञ्चविंशतित्रयोविंशतिद्वाविंशत्येकविंशतिविंशत्येकोनविंशत्यष्टादशचतुर्दशत्रयोदशद्वादशैकादशदशनवाष्टचतुस्त्रिद्विरूपाणि एकोनविंशतिः संक्रमस्थानानि भवन्ति ॥ १ ॥ मायालोभयोः सर्वाणि संक्रमस्थानानि भवन्ति । कषायचतुष्केऽपि गुणस्थाने संक्रमस्थानभावना तु स्वस्वोदयपर्यन्तगुणस्थानोक्ता कर्त्तव्या ॥ २ ॥

आयुषः संक्रमाभावात् न संक्रमस्थानचिन्तेति ।

मार्गणासु मोहनीयसंक्रमस्थानानि ॥

२३ संं० स्थानानि –२७–२६–२५–२३–२२–२१–२०–१९–१८–१४–१३–१२–११–१०–९–८–७–६–५–४–३–२–१ इति.		
नरक-देव-तिर्यग्-गतिषु	ओघेन ५–२७–२६–२५–२३–२१	
	मिथ्यात्वे४	२७ मिथ्या० वर्जिताः
		२६ सम्यक्त्वोद्वलिते,
		२५अनादिमिथ्यादृशां,मिश्रोद्वलिते वा
		२३ विसंयोजितानां संयोजना४वर्जितं
	सास्वा०१	२५ दर्शनत्रिकरहितम्
	मिश्रे २	२५ दर्शनत्रिकरहितम्
		२१ दर्शनसप्तकरहितम्
	अविरते ४	२७ मिथ्या० रहितं क्षयोपशमानाम्
		२६ मिश्र–सम्य० वर्जं,उप० सम्यग्दृशां आवलिकान्तर्गतानाम्
		२३ विसंयोजितां, ४संयोजनारहितम्
		२१ क्षायिकाणां, १–२–३नरकेषु चतुर्विधदेवेषु युगलिकतिर्यक्षु च.
	तिरश्चां देशविरते	३–२७–२६–२३ उक्तवत्.

मनुज०,त्रस,३ योग, चक्षु,अचक्षु, पंचेन्द्रिय,शुक्ल, भव्य, संज्ञी, आहा० इति १२ मार्गणासु	२३ [सर्वाणि स्थानानि]	
कुजाति ४, काय ५, असंज्ञिषु [१०षु]	ओघे ३–२७, २६, २५	
	मिथ्यात्वे३–२७, २६, २५	
	सास्वादने १–२५	
३ अज्ञानेषु	ओघे मिथ्यात्वे च ४,२७–२६–२५–२३	
	सास्वादने १–२५	
	मिश्रे २–२५, २१	
३ ज्ञान,सामा०, छेदोप० अवधिदर्शनेषु [६]	ओघे२२–२५ वर्जंसर्वाणि. मिथ्यात्वादिषु गुणस्थानोक्तं यथायोगम् [अवधिदर्शनं तु मिथ्यात्वादावपि विवक्षणे तत्र २५ रूपं स्थानमपि]	
मनःपर्यवे ओघे २१–२५, २६ वर्जानि [गुणविवक्षा गुणोक्तवत्]		
सू० संप०-यथा० योः [उप० श्रेणौ]	१–२ प्रकृतिरूपम्.	
केवलद्विके	० मोहनीयाभावः	
देशविरते	५–२७, २६, २३, २२, २१	
परिहारे	४–२७, २३, २२, २१	

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अविरते	ओघे ६–२७, २६, २५, २३, २२, २१
	मिथ्यात्वे ४–२७, २६, २५, २३
	सास्वादने १–२५
	मिश्रे २–२५, २१
	अविरते ५–२७, २६, २३, २२, २१
५ आद्य-लेश्यासु	ओघे ५–२७, २६, २५, २३, २१
	मिथ्यात्वे ४–२७, २६, २५, २३
	सास्वादने १–२५
	मिश्रे २–२५, २१
	अविरतादिषु ४–२७–अशुभ ३ लेश्यासु, २७,२६–तेजःपद्मयोः,२१क्षायिकस्य कृतकरणस्य वा, २३–शान्तविसंयोजितसंयोजनानाम्
अभव्ये १–२५	
मिथ्यात्व, सास्वा०, मिश्रे स्वस्वगुणस्थानोक्तानि.	
क्षायोप०	ओघे ४–२७, २३, २२, २१
	४ तः ७ पु ४–२७, २३, २२, २१
उपशमे	ओघे १५–२७, २६, २३, २२, २१, २०, १४, १३, ११, १०, ८, ७,५,४, २
	४ तः ७ पु ३–२७, २६, २३
	८ मे १–२३
	९ मे १३–२३, २२, २१, २०, १४, १३, ११, १०, ८, ७, ५, ४, २
	१०–११ शे १–२
क्षायिके	ओघे १६–२१, २०, १९, १८, १३, १२, ११, १०, ९,८, ६, ५,४, ३,२, १
	गुणेषु–भावना गुणस्थनोक्तवत्.

अनाहारे	ओघे ५–२७, २६, २५, २३, २१
	मिथ्यात्वे ३–२७, २६, २५
	सास्वादने १–२५
	अविरते ३–२७, २३, २१
नपुंसके	ओघे९-२७,२६,२५,२३,२२,२१,२०,१३,१२
	मिथ्यात्वे ४–२७, २६, २५, २३
	सास्वादने १–२५
	मिश्रे २–२५, २१
	४ तः ४ पु ५–२७, २६, २३, २२, २१
	अपूर्वे २–२३, २१
	अनिवृत्तौ ६–२३, २१, २२, २०, १३, १२
स्त्रीवेदे	ओघे १–२७, २६, २५, २३, २२, २१, २०, १९, १३, १२, ११
	१ तः ८ पु–नपुंसकवत्
	९ मे ७–२३, २१, २०, १९, १३, १२, ११
पुंवेदे	ओघे १३–२७, २६, २५, २३, २२, २१, २०, १९, १८,१३,१२, ११,१०
	१ तः ८ गुणेषु–गुणस्थानोक्तवत्
	९ मे–१०–२३,२२, २१,२०,१९,१८,१३, १२, ११, १०
क्रोधे	१६–२७, २६, २५,२३,२२,२१,२०, १९, १८, १४, १३, १२, ११, १०, ४, ३
माने	१९–२७, २६, २५,२३,२२, २१, २०,१९, १८,१४,१३,१२,११,१०,९,८,४,३, २
मायायां	२३–सर्वाणि.
लोभे	२३–सर्वाणि. [सर्वेषु गुणभावना यथोक्ता]
आयुषि	संक्रमाभावान्न संक्रमयन्त्रम् ।

अथ मार्गणासु नामकर्मणः संक्रमस्थानान्युच्यन्ते—

देवगतौ त्र्युत्तरशतद्व्युत्तरशतषण्णवतिपञ्चनवतिरूपाणि चत्वारि संक्रमस्थानानि भवन्ति। मिथ्यादृष्टिमिश्रयोः द्व्युत्तरशतपञ्चनवतिरूपे द्वे भवतः सास्वादने पञ्चनवतिः। अविरतगुणस्थाने तान्येव चत्वारि भवन्ति। नरकगतौ त्रीणि संक्रमस्थानानि भवन्ति, तद्यथा–द्व्युत्तरशतं, षण्णवतिः, पञ्चनवतिरिति। सास्वादने पञ्चनवतिः। मिश्रे षण्णवतिवर्जे द्वे भवतः। मिथ्यात्वाविरतयोः त्रीण्यपि भवन्ति॥ १॥ तिर्यग्गतौ पञ्च संक्रमस्थानानि

संक० द्वि० १४

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

भवन्ति, तद्यथा—द्व्युत्तरशतं, पञ्चनवतिः, त्रिनवतिः, चतुरशीतिः, द्व्यशीतिरिति । तत्र मिथ्यादृष्टौ पञ्चापि भवन्ति, सास्वादने पञ्चनवतिः, मिश्रादित्रिके द्व्युत्तरशतपञ्चनवतिरूपे द्वे भवतः ॥ १ ॥ मनुजगतौ मनुजद्विकयुतद्व्यशीतिप्रकृत्यात्मकं संक्रमस्थानं मुक्त्वा सर्वाणि संक्रमस्थानानि भवन्ति । गुणस्थानेषु प्रागिव वक्तव्यम् ॥ १ ॥

जातिचतुष्ककायपञ्चकरूपासु नवसु मार्गणासु तिर्यग्गतिवत् मिथ्यादृष्टौ पञ्च संक्रमस्थानानि भवन्ति । सास्वादने पञ्चनवतिरूपमेकमेव भवति ॥ ९ ॥ पञ्चेन्द्रियजातित्रसकायकाययोगवेदत्रिककषायचतुष्काचक्षुर्दर्शनभव्यसंज्ञ्याहारकरूपासु चतुर्दशसु मार्गणासु सर्वाणि संक्रमस्थानानि भवन्ति । गुणस्थानेषु प्राग्गुणस्थानोक्तानि संक्रमस्थानानि स्वयं परिभाव्यानि ॥ १४ ॥ मनोवाग्योगयोरपि द्व्यशीतिवर्जानि सर्वाणि संक्रमस्थानानि काययोगवत्परिभावनीयानि ॥ २ ॥

मतिश्रुताज्ञानयोः षट् संक्रमस्थानानि मिथ्यादृष्टौ भवन्ति, तद्यथा—द्व्युत्तरशतं, षण्णवतिः, त्रिनवतिः, पञ्चनवतिः, चतुरशीतिः, द्व्यशीतिरिति । सास्वादनमिश्रयोः द्व्युत्तरशतपञ्चनवतिरूपे द्वे भवतः ॥ २ ॥

विभङ्गज्ञाने मिथ्यादृष्टौ त्रीणि संक्रमस्थानानि भवन्ति, तद्यथा—द्व्युत्तरशतं, षण्णवतिः, पञ्चनवतिरिति । सास्वादनमिश्रयोः षण्णवतिवर्जे द्वे भवतः ॥ १ ॥ मत्यादिज्ञानत्रिकेऽविरतसम्यग्दृष्टौ देशविरतौ च चत्वारि संक्रमस्थानानि भवन्ति, तद्यथा—त्र्युत्तरशतं, द्व्युत्तरशतं, षण्णवतिः, पञ्चनवतिरिति । मत्यादिज्ञानचतुष्के प्रमत्तादारभ्यापूर्वकरणषष्ठभागं यावत् त्र्युत्तरशतद्व्युत्तरशतषण्णवतिपञ्चनवतिरूपाणि चत्वारि भवन्ति । अपूर्वकरणसप्तमभागादारभ्य यावन्नामत्रयोदशकं न क्षीयते तावत् द्व्युत्तरशतैकोत्तरशतपञ्चनवतिचतुर्नवतिरूपाणि चत्वारि भवन्ति । नामत्रयोदशकक्षयानन्तरमनिवृत्तिबादरे सूक्ष्मसम्पराये च एकोननवत्यष्टाशीतिद्व्यशीत्येकाशीतिरूपाणि चत्वारि संक्रमस्थानानि भवन्ति । क्षीणमोहे प्रतिग्रहाभावात् संक्रमस्थानमेव नास्ति ॥ ४ ॥ केवलज्ञानेऽपि प्रतिग्रहाभावादेव संक्रमस्थानं नास्ति ॥ १ ॥

अविरतमार्गणायां सप्त संक्रमस्थानानि भवन्ति, तद्यथा—त्र्युत्तरशतं, द्व्युत्तरशतं, षण्णवतिः, पञ्चनवतिः, त्रिनवतिः, चतुरशीतिः, द्व्यशीतिरिति । तत्र मिथ्यादृष्टावाद्यवर्जानि षट् संक्रमस्थानानि भवन्ति । सास्वादनमिश्रयोः द्व्युत्तरशतपञ्चनवतिरूपे द्वे भवतः । अविरतसम्यग्दृष्टौ त्र्युत्तरशतद्व्युत्तरशतषण्णवतिपञ्चनवतिरूपाणि चत्वारि भवन्ति ॥ १ ॥ देशविरते चत्वारि संक्रमस्थानानि भवन्ति, तद्यथा—त्र्युत्तरशतद्व्युत्तरशतषण्णवतिपञ्चनवतिरूपाणि ॥ १ ॥ परिहारविशुद्धौ प्रमत्ताप्रमत्तयोरपि त्र्युत्तरशतद्व्युत्तरशतषण्णवतिपञ्चनवतिरूपाणि चत्वारि भवन्ति ॥ ॥ १ ॥ सामायिकच्छेदोपस्थापनीययोः त्र्युत्तरशतद्व्युत्तरशतैकोत्तरशतषण्णवतिपञ्चनवतिचतुर्नवत्येकोननवत्यष्टाशीतिद्व्यशीत्येकाशीतिरूपाणि दश भवन्ति । तत्र प्रमत्तादपूर्वकरणषष्ठभागं यावत् त्र्युत्तरशतद्व्युत्तरशतषण्णवतिपञ्चनवति-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

रूपाणि चत्वारि भवन्ति । अपूर्वकरणसप्तमभागादारभ्योपशमश्रेण्यां सूक्ष्मसम्परायं यावत् क्षपकश्रेण्यामनिवृत्तिप्रथमभागं यावत् द्व्युत्तरशतैकोत्तरशतपञ्चनवतिचतुर्नवतिरूपाणि चत्वारि भवन्ति । नामत्रयोदशक्षये त्वेकोननवत्यष्टाशीतिद्व्यशीत्येकाशीतिरूपाणि चत्वारि सूक्ष्मसम्परायं यावत् भवन्ति ॥ २ ॥ सूक्ष्मसम्परायचारित्रे द्व्युत्तरशतैकोत्तरशतपञ्चनवतिचतुर्नवत्येकोननवत्यष्टाशीतिद्व्यशीत्येकाशीतिरूपाण्यष्टौ भवन्ति ॥ १ ॥ यथाख्यातचारित्रे न संक्रमस्थानं, नाम्नो बन्धाभावेन पतद्ग्रहाभावादिति ॥ १ ॥

चक्षुर्दर्शने मनुजद्विकविहीनद्व्यशीतिवर्जानि सर्वाणि संक्रमस्थानानि भवन्ति । द्व्यशीतिवर्जनं तु शरीरपर्याप्तेरूर्ध्वमवश्यं मनुजद्विकबन्धसंभवेनावलिकोर्ध्वसंक्रमस्य सद्भावादिति, तदुक्तं श्रीमलयगिरिपादैः सप्ततिकावृत्तौ–"तेजोवायुवर्जा हि शरीरपर्याप्त्या पर्याप्ता नियमतो मनुष्यगतिमनुष्यानुपूर्व्यौ बध्नन्ति" इति । मनोवाग्योगयोरपि द्व्यशीतिवर्जने कारणमेतदेवेति । गुणस्थाने तु सर्वत्र मनुजगतिवदिति ॥ १ ॥ अवधिदर्शने मतिज्ञानवदिति ॥ १ ॥ केवलदर्शने नास्ति संक्रमस्थानमिति ॥ १ ॥

अशुभलेश्यात्रिके सप्त संक्रमस्थानानि भवन्ति, तद्यथा–त्र्युत्तरशतं, द्व्युत्तरशतं, षण्णवतिः, पञ्चनवतिः, त्रिनवतिः, चतुरशीतिः, द्व्यशीतिरिति । मिथ्यादृष्टौ त्र्युत्तरशतवर्जानि षट् संक्रमस्थानानि भवन्ति । सास्वादनमिश्रयोः द्व्युत्तरशतपञ्चनवतिरूपे द्वे भवतः । अविरतादित्रिके आद्यानि चत्वारि भवन्ति ॥ ३ ॥ तेजःपद्मयोः षट् संक्रमस्थानानि भवन्ति, तद्यथा–त्र्युत्तरशतं, द्व्युत्तरशतं, षण्णवतिः, पञ्चनवतिः, त्रिनवतिः, चतुरशीतिरिति । मिथ्यादृष्टौ त्र्युत्तरशतषण्णवतिवर्जानि चत्वारि भवन्ति । सास्वादनमिश्रयोः द्व्युत्तरशतपञ्चनवतिरूपे द्वे भवतः । अविरतादिचतुष्के त्र्युत्तरशतद्व्युत्तरशतषण्णवतिपञ्चनवतिरूपाणि चत्वारि भवन्ति ॥ २ ॥ शुक्ललेश्यायां मनुजद्विकविहीनद्व्यशीतिवर्जानि सर्वाणि संक्रमस्थानानि भवन्ति, गुणस्थाने मतिज्ञानवदिति ॥ १ ॥

अभव्ये पञ्चनवतित्रिनवतिचतुरशीतिद्व्यशीतिरूपाणि चत्वारि भवन्ति ॥ १ ॥

मिथ्यात्वसास्वादनमिश्ररूपासु तिसृषु मार्गणासु स्वस्वगुणस्थानकवद्वाच्यम् ॥ ३ ॥ क्षायोपशमिकसम्यग्दृष्टावविरतादिचतुष्केऽपि त्र्युत्तरशतद्व्युत्तरशतषण्णवतिपञ्चनवतिरूपाणि चत्वारि भवन्ति ॥ १ ॥ औपशमिकसम्यग्दृष्टौ षट् संक्रमस्थानानि भवन्ति, तद्यथा–त्र्युत्तरशतं, द्व्युत्तरशतं, एकोत्तरशतं, षण्णवतिः, पञ्चनवतिः, चतुर्नवतिरिति । अविरतसम्यग्दृष्टेरारभ्यापूर्वकरणषष्ठभागं यावत् त्र्युत्तरशतद्व्युत्तरशतषण्णवतिपञ्चनवतिरूपाणि चत्वारि संक्रमस्थानानि भवन्ति । अपूर्वकरणसप्तमभागादारभ्य सूक्ष्मसम्परायं यावत् द्व्युत्तरशतैकोत्तरशतपञ्चनवतिचतुर्नवतिरूपाणि चत्वारि संक्रमस्थानानि भवन्ति । उपशान्तमोहे संक्रमस्थानं न भवति, बन्धाभावेन प्रतिग्रहाभावादिति ॥ १ ॥ क्षायिकसम्यग्दृष्टौ दश संक्रमस्थानानि भवन्ति, तद्यथा–त्र्युत्तरशतं, द्व्युत्तरशतं, एकोत्तरशतं, षण्णवतिः, पञ्चनवतिः, चतुर्नवतिः, एकोननवतिः, अष्टाशीतिः, द्व्यशीतिः, एकाशीतिरिति । गुणस्थानेषु

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मतिज्ञानवत् संक्रमस्थानानि वाच्यानि । उपशान्तादिषु संक्रमस्थानं नास्तीति ॥ १ ॥
असंज्ञिनि द्व्युत्तरशतपञ्चनवतित्रिनवतिचतुरशीतिद्व्यशीतिरूपाणि पञ्च संक्रमस्थानानि मिथ्यादृष्टौ भवन्ति । सास्वादने पञ्चनवतिरूपं भवतीति ॥ १ ॥ अनाहारमार्गणायां द्व्युत्तरशतषण्णवतिपञ्चनवतित्रिनवतिचतुरशीतिद्व्यशीतिरूपाणि षड् मिथ्यादृष्टौ भवन्ति । सास्वादने पञ्चनवतिरूपं भवतीति । अविरतसम्यग्दृष्टौ त्र्युत्तरशतद्व्युत्तरशतषण्णवतिपञ्चनवतिरूपाणि चत्वारि भवन्ति ॥ १ ॥ इत्युक्तानि नामकर्मणः संक्रमस्थानानि ।

॥ मार्गणासु नामकर्मसंक्रमस्थानयन्त्राणि ॥

नरकगतौ	३–१०२, ९६, ९५ ओघे
	मिथ्यात्वे १०२, ९६, ९५
	सास्वा० ९५ मिश्रे १०२, ९५
	अविरते १०२, ९६, ९५
देवगतौ	ओघे ४–१०३, १०२, ९६, ९५
	१–३ गुणयोः २–१०२, ९५ सा० ९५
	४ थें ४–१०३, १०२, ९६, ९५
तिर्यग्गतौ	ओघे ५–१०२, ९५, ९३, ८४, ८२
	मिथ्यात्वे ५–१०२, ९५, ९३, ८४, ८२
	३ तः ५ सु २–१०२, ९५ सा० ९५
मनुजगतौ	ओघे ११–८२ वर्जसर्वाणि. मि० ५–१०२, ९६, ९५, ९३, ८४; शेषगुणस्थानेषु गुणस्थानोक्तवत् ।
४कुजाति-५कायेषु	ओघे मिथ्या० च ५–१०२,९५,९३,८४,८२ सास्वा० १–९५
पंचे०,त्र०,काययोग,३ वेद, ४ कषाय, अचक्षु, भव्य, संज्ञि, आ० [१४] सु	१२–सर्वाणि [गुणस्थानभावना तु गुणस्थानोक्तवत्
मनोवचनयोः	११–८२ वर्जसर्वाणि. शेषं गुणस्थानोक्तवत्.
मति–श्रुताज्ञानयोः	ओघे ६–१०२,९६,९५, ९३,८४,८२
	मिथ्यात्वे ६–ओघवत्
	सा०–मिश्रयोः २–१०२, ९५
विभंगे	ओघे, मिथ्यात्वे च ३–१०२, ९६, ९५
	सा०–मिश्रयोः २–१०२, ९५

मति-श्रुताऽवधिषु	ओघे १०–१०३, १०२,९६, ९५, १०१, ९४, ८९, ८८, ८२, ८१
	४–५ मयोः ४–१०३, १०२,९६, ९५
	६ तः १२ षु–मनःपर्यववत्
मनःपर्यवे	ओघे १०–१०३, १०२, ९६, ९५, १०१, ९४, ८९, ८८, ८२, ८१
	६ तः ८मस्य षष्ठभागं ४–१०३,१०२,९६,९५
	८/७ तः ९ मे त्रयोदशक्षयात् प्राग् ४–१०२, १०१, ९५, ९४
	९ मे, १० मे च त्रयोदशक्षयानन्तरम्. ४–८९, ८८, ८२, ८१
केवलज्ञाने केवलदर्शने	संक्रमाभावात्
अविरते	ओघे ७–१०३, १०२,९६,९५,९३,८४, ८२
	मिथ्यात्वे ६–१०३ वर्जानि
	सा०–मिश्रयोः २–१०२, ९५
	सम्यक्त्वे ४–१०३, १०२, ९६, ९५
देशविरते	४–१०३, १०२, ९६, ९५
परिहारे	६–७ मे ४–१०३, १०२, ९६, ९५
सामा० छेदोप० योः	ओघे १०–१०३, १०२,१०१, ९६, ९५, ९४, ८९, ८८, ८२, ८१
	६ तः ६/९ मे ४–१०३, १०२, ९६, ९५
	८/७ तः१०मे४–१०२, १०१,९५,९४उपशमके
	८/७ तः ९/१ मे ४– ,, ,, ,, ,, क्षपके
	९/२ तः १० मे ४–८९, ८८, ८२, ८१ क्षपके
सू० संपराये	[१०मे] ८·१०२, १०१, ९५, ९४, ८९, ८८, ८२, ८१

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

यथाख्याते	०नाम्नो बन्धाभावेनापतद्ग्रहत्वात् न संक्रमः
चक्षुर्दर्शने	ओघे ११–८२ वर्जसर्वाणि
	गुणेषु-मनुजगतिवत्
अवधिदर्शने	१०–मतिज्ञानवत्
कृष्ण-नील कापोतेषु	ओघे ७–१०३,१०२,९६,९५,९३,८४,८२
	मिथ्यात्वे ६–१०३ वर्जाण्योघवत्
	सास्वा० मिश्रयोः २–१०२, ९५
	४–५–६ छे १०३, १०२, ९६, ९५
तेजः–पद्मयोः	ओघे ४–१०३, १०२, ९६, ९५,
	मिथ्यात्वे २–१०२, ९५
	सा०–मिश्रयोः २–१०२, ९५
	४–५–६–७ मे ४–१०३, १०२, ९६, ९५
शुक्ले	११–८२ वर्जसर्वाणि. गुणेषु मतिज्ञानवत्
अभव्ये	४–१५, ९३, ८४, ८२
मिथ्या०–सा०–मिश्रेषु	स्वस्वगुणस्थानवत्

क्षयोपशमे	४ तः ७ गुणेषु ४–१०३, १०२, ९६, ९५
उपशमे	ओघे ६–१०३, १०२, १०१, ९६, ९५, ९४
	४ तः ७ मे ४–१०३, १०२, ९६, ९५
	८ तः १० मे ४–१०२, १०१, ९५, ९४
	११ मे-० न संक्रमः बन्धाभावेनापतद्ग्रहत्वात्
क्षायिके	ओघे १०–१०३, १०२, १०१, ९६, ९५, ९४, ८९, ८८, ८२, ८१.
	गुणेषु–मतिज्ञानवत्
असंज्ञिनि	ओघे ५–१०२, ९५, ९३, ८४, ८२
	मिथ्यात्वे ५–,, ,, ,, ,, ,,
	सास्वादने १–९५
अनाहारे	ओघे ७–१०३,१०२,९६,९५,९३,८४,८२
	मिथ्यात्वे ६–त्र्युत्तरशतवर्जाण्योघवत्
	सास्वादने २–१०२, ९५
	४ र्थे ४–१०३, १०२, ९६, ९५

गोत्रस्य यथाख्यातकेवलद्विकरूपासु तिसृषु मार्गणासु संक्रम एव न भवति, बन्धाभावेन प्रतिग्रहाभावादिति ॥ ३ ॥ केवलज्ञानवर्जज्ञानचतुष्कावधिदर्शनदेशविरतसामायिकच्छेदोपस्थापनीयपरिहारविशुद्धिकसूक्ष्मसम्परायौपशमिकक्षायोपशमिकक्षायिकमिश्रसम्यक्त्वरूपासु मार्गणासु निजनिजगुणस्थानेषु नीचगोत्ररूपमेकमेव संक्रमस्थानं बध्यमाने उच्चैर्गोत्रे संक्रामति । एतासु मार्गणासूच्चैर्गोत्रस्य संक्रमो न भवति, नीचगोत्रस्य बन्धाभावेन प्रतिग्रहाभावादिति ॥१४॥ तेजोवायुकायिकयोस्तूच्चैर्गोत्रं संक्रामति, न नीचगोत्रम्, उच्चैर्गोत्रस्य बन्धाभावेन प्रतिग्रहाभावात् । तदपि तावत्संक्रामति यावदुच्चैर्गोत्रं नोद्वलयति, उद्वलिते तु संक्रमाभावः ॥ २ ॥ गतिचतुष्केन्द्रियपञ्चकगतित्रसवर्जकायचतुष्कयोगत्रिकवेदत्रिककषायचतुष्काज्ञानत्रिकाविरतचक्षुरचक्षुर्दर्शनलेश्याषट्कभव्याभव्यमिथ्यात्वसास्वादनसंज्ञ्यसंज्ञ्याहारकानाहारकरूपासु मार्गणासु निजनिजगुणस्थानेषूच्चैर्गोत्रं नीचैर्गोत्रं वा उभयमपि संक्रामति, तत्र मिथ्यात्वसास्वादनयोः परावर्तमानेन गोत्रद्विकं संक्रामति, मिश्रादौ नीचगोत्रमेव संक्रामति नोच्चैर्गोत्रं, नीचगोत्रस्य बन्धाभावेन प्रतिग्रहाभावादिति ॥ ४३ ॥

॥ मार्गणासु गोत्रस्य संक्रमस्थानम् ॥

१ यथा०–केवल २ केषु	०संक्रमाभावः
४ ज्ञान, अवधिद०, देशवि०, सामा०, छेदोप०, परिहार, सू० संप०, उप०, क्षयोप०, क्षा०, मिश्रेषु [१४षु]	१–नीचैर्गोत्रम्. [गुणस्थानेष्वत्रान्यत्र च स्वयं परिभावनीयम्]
तेजो–वाय्वोः	१ उच्चैर्गोत्रम्.
शेष ४३ षु	१ नीचैरुच्चैर्गोत्रं वा द्विविकल्पम्.

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अथ मार्गणासु संक्रमस्थानप्रतिग्रहस्थानानां संवेध उच्यते—तत्र केवलज्ञानदर्शनयथाख्यातचारित्रेषु ज्ञानावरणान्तराययोः संक्रमस्थानं नास्ति, बन्धाभावेन प्रतिग्रहाभावात् । शेषास्वेकोनषष्टिमार्गणासु ज्ञानावरणान्तराययोः पञ्चप्रकृत्यात्मके पतद्ग्रहे पञ्चप्रकृत्यात्मकं संक्रमस्थानं संक्रामति ॥ ६२ ॥

वेदनीयस्य केवलज्ञानदर्शनयथाख्यातचारित्रेषु संक्रमस्थानं नास्ति साम्परायिकबन्धाभावेन प्रतिग्रहाभावात् ॥ ३ ॥ सूक्ष्मसम्पराये सातवेदनीयरूपे प्रतिग्रहेऽसातरूपमेकमेव संक्रमस्थानं संक्रामति, न सातरूपम्, असातस्य बन्धाभावेन प्रतिग्रहाभावादिति ॥ १ ॥ मनुजगतिपञ्चाक्षजातित्रसकाययोगत्रिकवेदत्रिककषायचतुष्ककेवलज्ञानवर्जज्ञानचतुष्कसामायिकच्छेदोपस्थापनीयपरिहारविशुद्धिककेवलदर्शनवर्जदर्शनत्रिकशुभलेश्यात्रिकभव्यक्षयोपशमोपशमक्षायिकसंज्ञ्याहारकरूपासु मार्गणासु प्रमत्तं यावत् सातासातरूपे द्वे अपि संक्रमस्थाने संक्रामतः, द्वयोरपि परावर्तमानत्वेन पतद्ग्रहस्य लभ्यमानत्वात् । अप्रमत्तादारभ्य सूक्ष्मसम्परायं यावत् सातस्यैव बध्यमानत्वेन तत्रासातरूपमेकमेव संक्रमस्थानं भवति ॥३२॥ मनुजगतिवर्जगतित्रिकाद्यजातिचतुष्काद्यकायपञ्चकाज्ञानत्रिकाविरतदेशविरताशुभलेश्यात्रिकाभव्यमिथ्यात्वसास्वादनमिश्रासंज्ञ्यनाहारकरूपासु स्वकीयेषु सर्वेषु गुणस्थानेषु सातासातरूपे द्वे संक्रमस्थाने परावर्तमानत्वेन बध्यमाने प्रतिग्रहे परावर्तमानत्वेन संक्रामतः ॥ २६ ॥ केवलज्ञानवर्जज्ञानचतुष्कावधिदर्शनदेशविरतसामायिकच्छेदोपस्थापनीयपरिहारविशुद्धिकसूक्ष्मसम्परायौपशमिकक्षायोपशमिकक्षायिकमिश्ररूपासु मार्गणासु निजनिजगुणस्थानेषु नीचगोत्ररूपमेकमेव बध्यमाने उच्चैर्गोत्रे संक्रामति, नोच्चैर्गोत्रं, नीचगोत्रस्य बन्धाभावेन प्रतिग्रहाभावादिति ॥ १४ ॥ केवलद्विकयथाख्यातयोर्नास्ति संक्रमसंवेधः, बन्धाभावेन पतद्ग्रहाभावात् ॥ ३ ॥

तेजोवायुकायिकयोस्तूच्चैर्गोत्रमेव बध्यमाने नीचगोत्रे संक्रामति न नीचगोत्रम्, उच्चैर्गोत्रस्य बन्धाभावेन प्रतिग्रहाभावात् । तदपि यावदुच्चैर्गोत्रं नोद्वलयति तावत् संक्रामति, परतः सत्ताभावात् न संक्रमः ॥२॥ गतिचतुष्केन्द्रियपञ्चकगतित्रसवर्जकायचतुष्कयोगत्रिकवेदत्रिककषायचतुष्काज्ञानत्रिकाविरतचक्षुरचक्षुर्दर्शनलेश्याषट्कभव्याभव्यमिथ्यात्वसास्वादनसंज्ञ्यसंज्ञ्याहारकानाहारकरूपासु मार्गणासूच्चैर्गोत्रं नीचैर्गोत्रं वा बन्धस्य यावत् परावर्तमानत्वेन बध्यमाने निचैर्गोत्रे उच्चैर्गोत्रे वा नीचैर्गोत्रमुच्चैर्गोत्रं वा संक्रामति । मिश्रादौ नीचगोत्रमेव बध्यमाने उच्चैर्गोत्रे संक्रामति, नोच्चैर्गोत्रं, नीचगोत्रस्य बन्धाभावेन प्रतिग्रहाभावादिति ॥४३॥

मनुजगतिवर्जगतित्रिकाद्यजातिचतुष्काद्यकायपञ्चकाज्ञानत्रिकाविरतदेशविरतपरिहारविशुद्धिकशुक्लवर्जलेश्यापञ्चकाभव्यमिथ्यात्वसास्वादनमिश्रक्षायोपशमिकौपशमिकासंज्ञ्याहारकरूपासु मार्गणासु नवप्रकृत्यात्मके षट्प्रकृत्यात्मके चतुष्प्रकृत्यात्मके च प्रतिग्रहे नवप्रकृत्यात्मकं संक्रमस्थानं संक्रामति । एतदुक्तं भवति—यासु मार्गणासु मिथ्यादृष्टित्वं सास्वादनसम्यग्दृष्टित्वं च विद्यते तासु नवप्रकृत्यात्मके, यासु मिश्रादारभ्यापूर्वकरणप्रथमभागा-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

न्तानि गुणस्थानानि सन्ति तासु षट्प्रकृत्यात्मके, यास्वपूर्वकरणद्वितीयभागादारभ्य सूक्ष्मसम्परायपर्यन्तानि गुणस्थानानि सन्ति तासु चतुष्प्रकृत्यात्मके नवकं संक्रामति ॥२१॥ मनुजगतिपञ्चाक्षजातित्रसकाययोगत्रिकवेदत्रिककषायचतुष्ककेवलज्ञानवर्जज्ञानचतुष्कसामायिकच्छेदोपस्थापनीयसूक्ष्मसम्परायकेवलदर्शनवर्जदर्शनत्रिकशुक्ललेश्याभव्यक्षायिकसम्यक्त्वसंज्ञ्याहारकरूपासु मार्गणासु द्वे संक्रमस्थाने संक्रामतः, तद्यथा–नवप्रकृत्यात्मकं षट्प्रकृत्यात्मकं चेति। तत्र नवप्रकृत्यात्मकं पूर्ववत् परिभावनीयम्। अनिवृत्तिबादरे स्त्यानर्द्धित्रिकक्षयानन्तरं सूक्ष्मसम्पराये च षट्प्रकृत्यात्मकं चतुष्कप्रतिग्रहे संक्रामति, परतः दर्शनावरणस्य न संक्रमः, बन्धाभावेन प्रतिग्रहाभावादिति ॥ २८ ॥ केवलज्ञानदर्शनयथाख्यातचारित्रेषु न संक्रमप्रतिग्रहाविति ॥ ३ ॥ उक्तो मार्गणासु दर्शनावरणस्य संक्रमप्रतिग्रहस्थानसंवेधः ॥

॥ मार्गणासु संक्रमसंवेधयन्त्राणि ॥

॥ ज्ञाना० विघ्नयोः ॥

केवल२–यथा०पु	०बन्धाभावेनापतद्ग्रहत्वात् न संक्रमः
शेष ५९ पु १	५ कस्य ५ सु.

॥ वेदनीयस्य संक्रमसंवेधः ॥

केवल २–यथा०पु	०बन्धाभावेनापतद्ग्रहत्वात् न संक्रमः
सू० संपराये १	असातस्य साते.
३ अमनुज–४ कुजाति–५ काय–३ अज्ञान–अविरत–देशवि०–३ कुलेश्या-अभव्य–मि०-सास्वा०–मिश्र–असंज्ञि–अनाहारेषु [२६ पु]	२–असातस्य साते सातस्य असाते च
शेष ३२ पु	२ परावर्त्तमानेन. प्रमत्तं यावत्.
	१ असातस्य साते ७ तः १० मं यावत्.

॥ गोत्रस्य संक्रमसंवेधः ॥

४ज्ञान,अवधिद०,देशवि०,सामा०, छेदो०, परिहार,सू० संप०,उप०, क्षयोप०, क्षा०, मिश्रेषु [१४पु]	१ नीचस्य उच्चैर्गोत्रे.	
तेजो–वाय्वोः	१ उच्चस्य नीचगोत्रे	
केवल २, यथा०योः	०	
शेष ४३ पु	२–नीचमुच्चे उच्चं नीचे च	सास्वादनं यावत्
. . . . .	१—नीचमुच्चे मिश्रादिषु [–३ तः १०]	

॥ दर्शनावरणस्य संक्रमसंवेधः ॥

		सं० पत०	गुण०
३ अमनुज, ४ कुजाति,५काय, ३ अज्ञान, अवि०, देशवि०, परिहार, ५प्रथमलेश्या,अभव्य, ५ क्षायिकवर्जस०, १ असंज्ञि, अनाहारेषु [३१ पु]	३	९—९	१–२
		९—६	३ तः ६/९
		९—४	६/९ तः १०
		यथासंभवम्	
केवल २—यथा० पु	०		
शेष २८ पु २		९–९	१–२ गुण०
		६–४	९–१० [क्षपकाणाम्]
		शेषाणां शेषं तु पूर्ववत्	

अथ मोहनीयस्य मार्गणासु संक्रमप्रतिग्रहस्थानसंवेध उच्यते–तत्र नरकदेवगत्योः पञ्च संक्रमस्थानानि भवन्ति, तद्यथा–सप्तविंशतिः, षड्विंशतिः,पञ्चविंशतिः, त्रयोविंशतिः,एकविंशतिरिति। प्रतिग्रहस्थानानि चत्वारि भवन्ति, तद्यथा–द्वाविंशतिः,एकविंशतिः, सप्तदश,एकोनविंशतिरिति। तत्र मिथ्यादृष्टौ अष्टाविंशतिसत्ताकस्य द्वाविंशतिप्रतिग्रहे मिथ्यात्ववर्जाः सप्तविंशतिः प्रकृतयः संक्रामन्ति। सम्यक्त्वे उद्वलिते तस्मिन्नेव षड्विंशतिः प्रकृतयः

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

संक्रामन्ति, यद्वा विसंयोजितानन्तानुबन्धिनः तस्मिन्नेव प्रतिग्रहे त्रयोविंशतिः प्रकृतयः संक्रामन्ति। मिश्रे उद्वलिते अनादिमिथ्यादृष्टेर्वा पञ्चविंशतिः प्रकृतयः एकविंशतौ संक्रामन्ति। सास्वादने चैकविंशतिप्रतिग्रहे पञ्चविंशतिप्रकृतयः संक्रामन्ति। मिश्रे सप्तदशप्रकृत्यात्मके पञ्चविंशतिः प्रकृतयः संक्रामन्ति। यद्वोद्वलितानन्तानुबन्धिनस्तस्मिन्नेव प्रतिग्रहे एकविंशतिः प्रकृतयः संक्रामन्ति। अविरतसम्यग्दृष्टौ एकोनविंशतिप्रतिग्रहे सप्तविंशतिः प्रकृतयः संक्रामन्ति। औपशमिकसम्यग्दृष्टेरावलिकाया अभ्यन्तरे वर्तमानस्य मिश्रस्य संक्रमावलिकाभ्यन्तरवर्त्तित्वेन सम्यक्त्वस्य च प्रतिग्रहत्वेन तद्व्यतिरिक्ताः षड्विंशतिः प्रकृतय एकोनविंशतिप्रतिग्रहे संक्रामन्ति। क्षायिकसम्यग्दृष्टेः सप्तदशप्रतिग्रहे एकविंशतिः प्रकृतयः संक्रामन्ति। विसंयोजितानन्तानुबन्धिनस्तु एकोनविंशतिप्रतिग्रहे त्रयोविंशतिः प्रकृतयः संक्रामन्तीति ॥ २ ॥ तिर्यग्गतावपि चतुर्षु गुणस्थानेष्वेवमेव वाच्यम्। देशविरतेऽप्यविरतसम्यग्दृष्टिवत् सर्वं वाच्यम्, नवरमेकविंशतिसंक्रमस्थानं नास्ति, क्षायिकसम्यग्दृष्टित्वाभावात्। प्रतिग्रहस्थानं तु पञ्चदशप्रकृत्यात्मकमेकमेव ॥ १ ॥ मनुजगतिपञ्चाक्षजातित्रसकाययोगत्रिकचक्षुरचक्षुर्दर्शनशुक्ललेश्याभव्यसंज्ञ्याहारकरूपासु मार्गणासु सर्वाणि संक्रमस्थानानि प्रतिग्रहस्थानानि भवन्ति, प्रागुक्तगुणस्थानानुसारेण भावनीयानि च ॥ १२ ॥ जातिचतुष्ककायपञ्चकासंज्ञिषु त्रीणि संक्रमस्थानानि भवन्ति। तत्र मिथ्यादृष्टौ द्वाविंशतिप्रतिग्रहे सप्तविंशतिः, सम्यक्त्वे उद्वलिते च तत्रैव षड्विंशतिप्रकृतिस्थानं संक्रामति। मिश्रे उद्वलिते अनादिमिथ्यादृष्टेर्वा सास्वादनसम्यग्दृष्टौ च तेजोवायुवर्जशेषस्य चैकविंशतिप्रतिग्रहे पञ्चविंशतिः प्रकृतयः संक्रामन्ति ॥ १० ॥ अज्ञानत्रिके मिथ्यादृष्टौ द्वाविंशतिप्रतिग्रहे सप्तविंशतिः, सम्यक्त्वे उद्वलिते षड्विंशतिः, उद्वलितानन्तानुबन्धिनश्च त्रयोविंशतिः प्रकृतयः संक्रामन्ति। मिश्रे उद्वलिते अनादिमिथ्यादृष्टेर्वा, सास्वादनसम्यग्दृष्टेश्चैकविंशतिप्रतिग्रहे, मिश्रदृष्टौ सप्तदशप्रतिग्रहे पञ्चविंशतिः प्रकृतयः संक्रामन्ति। उद्वलितानन्तानुबन्धिनश्च मिश्रदृष्टावेकविंशतिः प्रकृतयः संक्रामन्ति ॥ ३ ॥ मतिज्ञानादित्रिके पञ्चविंशतिप्रकृत्यात्मकं संक्रमस्थानं द्वाविंशत्येकविंशतिप्रकृतिरूपे च द्वे प्रतिग्रहस्थाने न भवन्ति। संवेधस्त्वविरतसम्यग्दृष्ट्यादिगुणस्थानानुसारेण वाच्यः ॥ ३ ॥ अवधिदर्शनेऽप्येवं मिथ्यात्वादिगुणस्थानत्रिकविवक्षणे तु सर्वाणि संक्रमस्थानानि सर्वाणि प्रतिग्रहस्थानानि च भवन्ति ॥ १ ॥

सामायिकचारित्रे पञ्चविंशतिप्रकृतिरूपं संक्रमस्थानं वर्जयित्वा शेषाणि संक्रमस्थानानि, नवसप्तषट्पञ्चचतुस्त्रिद्व्येकप्रकृत्यात्मकानि अष्टौ प्रतिग्रहस्थानानि च भवन्ति। संवेधभावना गुणस्थानानुसारेण कर्त्तव्येति ॥ १ ॥ छेदोपस्थापनीयचारित्रे मनःपर्यवज्ञाने च पञ्चविंशतिषड्विंशतिरूपे द्वे संक्रमस्थाने न स्तः, यतः पञ्चविंशतिसंक्रमस्थानमाद्यगुणस्थानत्रिके एव संक्रामति, नान्यत्र। षड्विंशतिप्रकृतिरूपं संक्रमस्थानं तु यद्यपि प्रमत्ताप्रमत्तयोर्विद्यते तथाप्यत्र न संभवति, श्रेणिगतौपशमिकसम्यक्त्वसंभवेऽपि प्राथमिकौपशमिकसम्यक्त्वस्याभावेना-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

वलिकाभ्यन्तरे वर्त्तमानस्यापि मिश्रस्य संक्रमसंभवेन सप्तविंशतिसंक्रमस्थानस्यैव प्राप्यमाणत्वात् । शेषा संक्रमप्रतिग्रहस्थानविषया भावना संवेधश्च सर्वं पूर्ववत् ज्ञेयम् ॥ २ ॥ केवलज्ञानदर्शनयोर्नास्ति संक्रमप्रतिग्रहयोः संवेधः, क्षीणमोहत्वादिति ॥ २ ॥ सूक्ष्मसम्परायथाख्यातयोः सम्यक्त्वमिश्ररूपे द्विकप्रतिग्रहे मिथ्यात्वमिश्ररूपं प्रकृतिद्विकं संक्रामति ॥ २ ॥ देशविरते त्रयोदशचतुर्दशपञ्चदशरूपप्रतिग्रहत्रिके सप्तविंशतिषड्विंशतित्रयोविंशतिद्वाविंशत्येकविंशतिरूपाणि पञ्च संक्रमस्थानानि यथायोगं संक्रामन्ति ॥ १ ॥ परिहारविशुद्धौ सप्तविंशतित्रयोविंशतिद्वाविंशत्येकविंशतिरूपाणि चत्वारि संक्रमस्थानानि एकादशदशनवकरूपे प्रतिग्रहे यथायोगं प्रमत्ताप्रमत्तयोः संक्रामन्ति ॥ १ ॥ अविरतमार्गणायां मिथ्यादृष्टौ द्वाविंशतिप्रतिग्रहे सप्तविंशतिः, षड्विंशतिश्च संक्रामति। एकविंशतौ पञ्चविंशतिप्रकृतिस्थानं संक्रामति । द्वाविंशतौ च त्रयोविंशतिः संक्रामति । सास्वादने एकविंशतौ पञ्चविंशतिप्रकृतिस्थानं संक्रामति । मिश्रगुणस्थाने सप्तदशप्रकृत्यात्मके प्रतिग्रहे पञ्चविंशतिरेकविंशतिश्च संक्रामति । अविरतसम्यग्दृष्टावेकोनविंशतौ सप्तविंशतिषड्विंशतित्रयोविंशतिरूपाणि त्रीणि संक्रमस्थानानि संक्रामन्ति । मिथ्यात्वे क्षीणेऽष्टादशप्रकृतिरूपे प्रतिग्रहे द्वाविंशतिप्रकृतिस्थानं संक्रामति । मिश्रे क्षीणे क्षायिकसम्यग्दृष्टेश्च सप्तदशप्रकृत्यात्मके प्रतिग्रहे एकविंशतिप्रकृतिस्थानं संक्रामति ॥ १ ॥ शुक्लवर्जलेश्यापञ्चके द्वाविंशत्येकविंशत्येकोनविंशतिसप्तदशपञ्चदशत्रयोदशैकादशनवकरूपेषु प्रतिग्रहेषु मिथ्यात्वादिगुणस्थानेषु यथासंभवं सप्तविंशतिषड्विंशतिपञ्चविंशतित्रयोविंशत्येकविंशतिरूपाणि पञ्च संक्रमस्थानानि संक्रामन्ति ॥ ५ ॥ अभव्ये एकविंशतिप्रकृत्यात्मके प्रतिग्रहे पञ्चविंशतिप्रकृतिस्थानं संक्रामति ॥ १ ॥ मिथ्यात्वसास्वादनमिश्राख्यासु मार्गणासु स्वस्वगुणस्थानवत् संक्रमप्रतिग्रहस्थानानां संवेधो वाच्यः ॥ ३ ॥ क्षायोपशमिकसम्यक्त्वे अविरतसम्यग्दृष्ट्यादिषु चतुर्षु गुणस्थानेष्वेकोनविंशत्यष्टादशसप्तदशपञ्चदशचतुर्दशत्रयोदशैकादशदशनवकरूपेषु प्रतिग्रहेषु यथासंभवं सप्तविंशतित्रयोविंशतिद्वाविंशत्येकविंशतिरूपाणि चत्वारि संक्रमस्थानानि संक्रामन्ति ॥ १ ॥ औपशमिकसम्यग्दृष्टावेकोनविंशतिपञ्चदशैकादशसप्तषट्पञ्चचतुस्त्रिद्विरूपेषु नवसु प्रतिग्रहेषु अविरतगुणस्थानादारभ्योपशान्तमोहं यावत् यथासंभवं सप्तविंशतिषड्विंशतित्रयोविंशतिद्वाविंशत्येकविंशतिविंशतिचतुर्दशत्रयोदशैकादशदशाष्टसप्तपञ्चचतुर्द्विरूपाणि पञ्चदश संक्रमस्थानानि संक्रामन्ति ॥ १ ॥ क्षायिकसम्यग्दृष्टावविरतादारभ्यैकादशगुणस्थानानि भवन्ति । तत्र प्रतिग्रहस्थानानि सप्तदशत्रयोदशनवपञ्चचतुस्त्रिद्व्येकप्रकृत्यात्मकान्यष्टौ भवन्ति । संक्रमस्थानानि च षोडश भवन्ति, तानि चामूनि एकविंशतिविंशत्येकोनविंशत्यष्टादशत्रयोदशद्वादशैकादशदशनवाष्टषट्पञ्चचतुस्त्रिद्व्येकप्रकृत्यात्मकानीति । तत्राविरतसम्यग्दृष्टौ सप्तदशप्रकृतिरूपे प्रतिग्रहे, देशविरते त्रयोदशप्रकृतिरूपे, प्रमत्ताप्रमत्तापूर्वकरणेषु नवप्रकृतिरूपे प्रतिग्रहे एकविंशतिप्रकृतिस्थानं संक्रामति । शेषाणि पञ्चदश संक्रमस्थानान्यनिवृत्तिकरणे पञ्चचतुस्त्रिद्व्येकप्रकृत्यात्मकेषु पञ्चप्रतिग्रहेषु

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

यथासंभवं संक्रामन्ति ॥१॥ अनाहारकमार्गणायां मिथ्यादृष्टौ द्वाविंशतिप्रकृतिरूपे प्रतिग्रहे सप्तविंशतिषड्विंशतित्रयोविंशतिरूपाणि त्रीणि संक्रमस्थानानि संक्रामन्ति। सास्वादने एकविंशतिप्रकृतिरूपे प्रतिग्रहे पञ्चविंशतिः संक्रामति । अविरतसम्यग्दृष्टौ एकोनविंशतिप्रकृतिरूपे प्रतिग्रहे सप्तविंशतित्रयोविंशतिरूपे द्वे संक्रमस्थाने संक्रामतः । क्षायिकसम्यग्दृष्टेः सप्तदशप्रकृत्यात्मके एकविंशतिप्रकृतिस्थानं संक्रामति । त्रयोदशचतुर्दशगुणस्थानयोर्मोहनीयस्य सत्ताबन्धयोरभावन्नास्ति संवेधः ॥ १ ॥ नपुंसकवेदे द्वाविंशत्येकविंशत्येकोनविंशत्यष्टादशसप्तदशपञ्चदशचतुर्दशत्रयोदशैकादशदशनवसप्तपञ्चप्रकृत्यात्मकेषु त्रयोदशसु प्रतिग्रहेषु यथासंभवं सप्तविंशतिषड्विंशतिपञ्चविंशतित्रयोविंशतिद्वाविंशत्येकविंशतिविंशतित्रयोदशद्वादशरूपाणि नव संक्रमस्थानानि संक्रामन्ति । तत्र मिथ्यादृष्टौ द्वाविंशतिप्रतिग्रहे सप्तविंशतिषड्विंशतित्रयोविंशतिरूपाणि त्रीणि संक्रमस्थानानि संक्रामन्ति । मिथ्यादृष्टौ सास्वादने च एकविंशतिप्रतिग्रहे पञ्चविंशतिप्रकृतिस्थानं संक्रामति । मिश्रगुणस्थाने सप्तदशप्रकृतिरूपे प्रतिग्रहे पञ्चविंशत्येकविंशतिरूपे द्वे संक्रमस्थाने संक्रामतः । अविरतसम्यग्दृष्टावेकोनविंशतिप्रकृतिरूपे प्रतिग्रहे सप्तविंशतिषड्विंशतित्रयोविंशतिरूपाणि त्रीणि संक्रमस्थानानि संक्रामन्ति, अष्टादशप्रकृतिरूपे प्रतिग्रहे द्वाविंशतिः संक्रामति, सप्तदशप्रकृतिरूपे प्रतिग्रहे क्षायिकसम्यग्दृष्टेरेकविंशतिः संक्रामति । देशविरतौ पञ्चदशप्रकृतिरूपे प्रतिग्रहे सप्तविंशतिषड्विंशतित्रयोविंशतिरूपाणि त्रीणि संक्रामन्ति, चतुर्दशप्रकृतिरूपे प्रतिग्रहे द्वाविंशतिप्रकृतिस्थानं संक्रामति, त्रयोदशप्रकृतिरूपे प्रतिग्रहे एकविंशतिप्रकृतिस्थानं संक्रामति । प्रमत्ताप्रमत्तयोरेकादशप्रकृतिरूपे प्रतिग्रहे सप्तविंशतिषड्विंशतित्रयोविंशतिरूपाणि त्रीणि संक्रमस्थानानि संक्रामन्ति, दशप्रकृतिरूपे प्रतिग्रहे द्वाविंशतिप्रकृतिस्थानं संक्रामति, नवप्रकृतिरूपे एकविंशतिप्रकृतिस्थानं संक्रामति । अपूर्वकरणे एकादशप्रकृतिरूपे पतद्ग्रहे त्रयोविंशतिप्रकृतिस्थानं संक्रामति, नवकप्रतिग्रहे एकविंशतिप्रकृतिस्थानं संक्रामति । अनिवृत्तिकरणे सप्तकप्रतिग्रहे त्रयोविंशतिद्वाविंशतिरूपे द्वे संक्रामतः, पञ्चप्रकृत्यात्मके प्रतिग्रहे क्षायिकसम्यग्दृष्टेरुपशमश्रेण्यामेकविंशतिविंशतिरूपे द्वे संक्रामतः, क्षपकश्रेण्यां च त्रयोदशद्वादशरूपे द्वे संक्रमस्थाने तस्मिन्नेव पञ्चकप्रतिग्रहे संक्रामतः ॥ १ ॥ वर्षधरात् स्त्रीवेदे यो विशेषः स प्रतिपाद्यते—उपशमश्रेण्यामौपशमिकसम्यग्दृष्टेः नपुंसकवेदे उपशान्ते एकविंशतिः प्रकृतयः सप्तकप्रतिग्रहे संक्रामन्ति, क्षायिकसम्यग्दृष्टेरुपशमश्रेण्यां पञ्चकप्रतिग्रहे नपुंसकवेदे उपशान्ते एकोनविंशतिप्रकृतिस्थानं संक्रामति, क्षपकश्रेण्यां नपुंसकवेदे क्षीणे एकादश प्रकृतयः पञ्चकप्रतिग्रहे संक्रामन्ति ॥ १ ॥ स्त्रीवेदात्पुरुषवेदे यो विशेषः स प्रतिपाद्यते—औपशमिकसम्यग्दृष्टेरुपशमश्रेण्यां स्त्रीवेदे उपशान्ते विंशतिप्रकृतिस्थानं सप्तकप्रतिग्रहे संक्रामति। पुरुषवेदापनीते षट्कप्रतिग्रहे तदेव विंशतिप्रकृतिस्थानं संक्रामति । क्षायिकसम्यग्दृष्टेरुपशमश्रेण्यां स्त्रीवेदे उपशान्तेऽष्टादश प्रकृतयः पञ्चकप्रतिग्रहे संक्रामन्ति । पुरुषवेदे चापनीते चतुष्कप्रतिग्रहेऽपि ता एवाष्टादश संक्रामन्ति । क्षपकश्रेण्यां

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

स्त्रीवेदे क्षपिते पञ्चकप्रतिग्रहे दश प्रकृतयः संक्रामन्ति । पुरुषवेदे चापनीते चतुष्कप्रतिग्रहे ता एव दश प्रकृतयः संक्रामन्तीति ॥ १ ॥ पुरुषवेदात्कषायेष्वयं विशेषः–संज्वलनक्रोधे औपशमिकसम्यग्दृष्टेरुपशमश्रेण्यां पुंवेदस्य बन्धोदयव्यवच्छेदानन्तरं समयोनावलिकाद्विकं यावत् संज्वलनचतुष्कसम्यक्त्वमिश्ररूपे षट्कप्रतिग्रहे चतुर्दश प्रकृतयः संक्रामन्ति । ततः पुरुषवेदे उपशान्ते त्रयोदश प्रकृतयः षट्कप्रतिग्रहे संक्रामन्ति । संज्वलनक्रोधे त्वपनीते पञ्चप्रतिग्रहे त्रयोदश संक्रामन्ति । क्षायिकसम्यग्दृष्टेरुपशमश्रेण्यां नोकषायषट्के उपशान्ते शेषा द्वादश प्रकृतयः समयोनावलिकाद्विकं यावच्चतुष्के प्रतिग्रहे संक्रामन्ति । पुंवेदे उपशान्ते चतुष्कप्रतिग्रहे एकादश प्रकृतयः संक्रामन्ति । संज्वलनक्रोधे चापनीते त्रिकप्रतिग्रहे ता एव एकादश संक्रामन्ति । क्षपकश्रेण्यां हास्यादिषट्के क्षपिते समयोनावलिकाद्विकं यावत् संज्वलनचतुष्के चतसृणां प्रकृतीनां संक्रमो भवति । ततः पुरुषवेदक्षयानन्तरं संज्वलनक्रोधे चापनीते त्रिकप्रतिग्रहे त्रिकं संक्रामति ॥१॥ माने पुनः संज्वलनक्रोधादयं विशेषः–औपशमिकसम्यग्दृष्टेरुपशमश्रेण्यां वर्तमानस्य अप्रत्याख्यानप्रत्याख्यानावरणक्रोधद्विके उपशान्ते तस्मिन्नेव पञ्चकप्रतिग्रहे ता एव एकादश संक्रामन्ति। संज्वलनक्रोधे उपशान्ते पञ्चकप्रतिग्रहे दश प्रकृतयः संक्रामन्ति। पञ्चकपतद्ग्रहात् संज्वलनमाने चापनीते चतुष्कप्रतिग्रहेऽपि दश प्रकृतयः संक्रामन्ति । क्षायिकसम्यग्दृष्टेरुपशमश्रेण्यां मध्यक्रोधद्विके उपशान्ते मानमायालोभरूपे त्रिकप्रतिग्रहे नव प्रकृतयः संक्रमन्ति । ततः संज्वलनक्रोधे उपशान्ते त्रिकपतद्ग्रहेऽष्टौ प्रकृतयः संक्रामन्ति । ततः संज्वलनमाने चापनीते मायालोभरूपे प्रतिग्रहेऽष्टौ प्रकृतयः संक्रामन्ति । क्षपकश्रेण्यां संज्वलनक्रोधस्य क्षयसमये संज्वलनमानस्य पतद्ग्रहता न भवति, ततो मायालोभरूपे मानमायाद्विकं संक्रामति ॥ १ ॥ मानाद् मायायां यो विशेषः स प्रदर्श्यते–उपशमश्रेण्यामौपशमिकसम्यग्दृष्टेः मध्यममानद्विके उपशान्ते चतुष्कप्रतिग्रहेऽष्टौ संक्रामन्ति । ततः संज्वलनमाने उपशान्ते चतुष्कप्रतिग्रहे सप्त प्रकृतयः संक्रामन्ति । ततः संज्वलनमायायाः पतद्ग्रहता नश्यतीति तदपनीते सम्यक्त्वमिश्रलोभरूपे त्रिकप्रतिग्रहे सप्त संक्रामन्ति । उपशमश्रेण्यां क्षायिकसम्यग्दृष्टेः मध्यममानद्विके उपशान्ते षट् प्रकृतयोः मायालोभरूपे द्विकप्रतिग्रहे संक्रामन्ति । ततः संज्वलनमाने उपशान्ते पञ्च प्रकृतयः द्विकप्रतिग्रहे संक्रामन्ति । ततः संज्वलनमायाऽपि पतद्ग्रहात् नश्यतीति तदपनीते लोभरूपे प्रतिग्रहे पञ्च प्रकृतयः संक्रामन्ति । क्षपकश्रेण्यां संज्वलनमानक्षयकाले संज्वलनमाया पतद्ग्रहरूपा न भवति, ततो लोभे मायैव संक्रामतीति ॥ १ ॥ मायाया लोभस्य विशेषः प्रदर्श्यते–उपशमश्रेण्यामौपशमिकसम्यग्दृष्टेः मध्यममायाद्विके उपशान्ते त्रिकप्रतिग्रहे पञ्च प्रकृतयः संक्रामन्ति । ततः संज्वलनमायायामुपशान्तायां सम्यक्त्वमिश्रलोभरूपे त्रिकपतद्ग्रहे चतस्रः प्रकृतयः संक्रामन्ति । ततः संज्वलनलोभस्यापतद्ग्रहभवनानन्तरं मिथ्यात्वमिश्ररूपं प्रकृतिद्विकं सम्यक्त्वमिश्ररूपे द्विके संक्रामति । क्षायिकसम्यग्दृष्टेरुपशमश्रेण्यां मध्यममायाद्विके उपशान्ते तिस्रः प्रकृतयः संज्वलनलोभे संक्रामन्ति । ततः माया-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

यामुपशान्तायां मध्यमलोभद्विकं संज्वलनलोभे संक्रामति । सूक्ष्मसम्परायेऽपि दर्शनद्विकं दर्शनद्विके संक्रामतीति ॥ १ ॥ इत्युक्तो मार्गणासु मोहनीयसंक्रमसंवेधः ॥ ६२ ॥

॥ मोहनीयस्य सं० पत० स्थानसंवेधयन्त्राणि ॥

नरकगति—देवगत्योः	सं० स्था० ५—२७, २६, २५, २३, २१	पत० स्था० ४—२२, २१, १९, १७	गुणस्थाने	सं० स्थानं	पतद्ग्रहे	स्वामि :
			मिथ्यात्वे	२७	२२	२८ सत्ताकः
			,,	२६	,,	उद्व०सम्य० [२७सत्ता.]
			,,	२३	,,	विसंयोजितसं.[२४स.]
			,,	२५	२१	उद्वलितमिश्रोऽनादिमिथ्यादृष्टिर्वा [२६सत्ता.]
			सास्वादने	२५	२१	स एव [२८ सत्ताकः]
			मिश्रे	२५	१७	स एव
			,,	२१	,,	२४ सत्ताकः
			अविरते	२७	१९	स्वाभाविकः
				२६	१९	उपशमावलिकान्तर्गतः
				२१	१७	क्षायिकसम्यग्दृष्टिः
				२३	१९	वियोजितसंयोजनः

तिर्यग्गतौ	१, २, ३, ४ गुणेषु नारकवत्	५ गु. २७, २३, २२ संक्रमाः १५ पतद्ग्रहे				
			मनुज-पंचे०-त्रस-३ योग-चक्षुः-अचक्षु-शुक्ल-भव्य-संज्ञि-आहा० षु [१२ षु]	सर्वाणि संक्रमस्थानानि सर्वाणि च पतद्ग्रहाणि-गुणस्थानोक्तवत्		
			४ जाति-५ काय-असंज्ञिषु[१० षु]	मिथ्यात्वे	सं० २७	पत० २२
				,,	२६	,,
				,,	२५	२१
				सास्वादने	२५	,,
			३ अज्ञानेषु	मिथ्यात्वे	२७-२६-२३	२२ प०
				,,	२५ सं०	२१
				सास्वा०	२५	२१
				मिश्रे	२५	१७
				,,	२१	१७

३ ज्ञानेषु अवधिद०	२२ सं० स्थानानि—२५ वर्जानि १, २, ३, ४, ५, ६, ७, ८, ९, १०, ११, १२, १३, १४, १८, १९, २०, २१, २२, २३, २६, २७ इति संक्रमस्थानानि २२.
	१६ पतद्ग्रहाणि—२२–२१ वर्जानि [१, २, ३, ४, ५,६, ७, ९, १०, ११, १३, १४, १५, १७, १८, १९]
	संवेधः—अविरतादिगुणस्थानोक्तवत्.
सामा० छेदोप०	सं० स्था० २२—२५वर्जसर्वाणि [छेदो० ये २६ अपि न संभवेत्]
	पत० स्था० १०—११, १०, ९, ७, ६, ५, ४, ३, २, १,
	संवेधः—गुणस्थानोक्तवत्.
मनः-पर्यवे	सं० स्था० २१—२५, २६वर्जानि सर्वाणि.
	पत० स्था० १०—११,१०,९,७,६,५,४,३,२,१,
	संवेधः—स्वगुणस्थानोक्तवत्.
केवल२के	० संक्रमपतद्ग्रहाभावः [क्षीणमोहत्वेन.]
सू०संप० यथा०	२ कः २ के. [मिथ्या० मिश्ररूपद्विकं सम्य० मिश्रद्विके]

देशविरते	सं०स्था०५—२७,२६,२३,२२,२१	पंचमे गुणे.
	पत० स्था० ३—१३, १४, १५	
परिहारे	सं० स्था०४—२७,२३,२२,२१	प्रमत्ताप्रमत्तयोः
	पत० स्था०३—११, १०, ९	

अविरते	मिथ्यात्वे	सं०स्था०२७-२६	पत० २२
	,,	२५	२१
	,,	२३	२२
	सास्वा०	२५	२१
	मिश्रे	२५	१७
	,,	२१	१७
	सम्यक्त्वे	२७-२६-२३	१९
	,,	२२	१८
	,,	२१	१७

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

५ आद्य-लेश्यासु	सं० ५—२७, २६, २५, २३, २१		संवेधः-गुणेषु यथासंभ०
	पत० ११—२२, २१, १९, १८, १७, १५, १४; १३, ११, १०, ९,		
अभव्ये	१—२५ सं० २१ पतद्ग्रहे.		
मिथ्या०-सास्वा० मिश्रेषु	स्वस्वगुणस्थानवत्.		
क्षयोपशमे	सं० ४—२७, २३, २२, २१		४, ५, ६, ७ गुणेषु यथायोग्यम्.
	पत० ९—१९, १८, १७, १५, १४, १३, ११, १०, ९		
उपशमे	सं० १५—२७, २६, २३, २२, २१, २०, १४, १३, ११, १०, ८, ७, ५, ४, २		४ तः ११ गुणेषु
	पत० ९—१९, १५, ११, ७, ६, ५, ४, २		
क्षायिके	२१ सं०	१७ पत०	४ थे
	,,	१३ ,,	५ मे
	,,	९ ,,	६–७–८ षु
	शेष १५ स्था० २०, १९, १८, १३, १२, ११, १०, ९, ८, ६, ५, ४, ३, २, १	५-४-३-२-१	९ मे.
अनाहारे-	सं० २७, २६, २३	पत० २२	मिथ्यात्वे
	२५	,, २१	सास्वादने
	२७–२३	,, १९	अविरते
	२१	१७	,, क्षायिकसम्य०
नपुंसके	सं० ९-२७-२६-२५-२३-२२-२१-२०-१३-१२		
	पत० १३—२२-२१-१९-१८-१७-१५-१४-१३-११-१०-९-७-५		
	मिथ्यात्वे	सं० २७–२६–२३	पत० २२
	,,	२५	२१
नपुंसके	सास्वा०	२५	२१
	मिश्रे	२५–२१	१७
	अविरते	२७–२६–२३	१९
	,,	२२	१८
	,,	२१	१७
	देशविरते	२७–२६–२३	१५
	,,	२२	१४
	,,	२१	१३
	६–७ मे	२७–२६–२३	११
	,,	२२	१०
	,,	२१	९
	अपूर्वे	२३	११
	,,	२१	९
	अनिवृत्तौ	२३–२२	७
	,,	२१–२०	५
	,,	१३–१२	५
स्त्री-	नपुंसकवेदवत्, नवरं विशेषोऽयं—		
	२१ सं०	७ पत०	उपशमोपशमकः नपुंसकोपशान्ते.
	१९	५	क्षायिकोपशमकः ,,
	११	५	क्षपकः नपुंसके क्षीणे.
पुंसः	स्त्रीवेद-	वत्,	स्त्रीवेदाद्विशेषोऽयं
	२०	७	उपशमोपशमकः स्त्र्युपशा०
	२०	६	,, पुमपनीते
	१८	५	क्षायिकोपशमकः स्त्र्युपशा०
	१८	४	,, पुमपनीते
	१०	५	क्षपकः स्त्रीक्षपिते
	१०	४	,, पुमपनीते

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

क्रोधे [संज्वलने]	पुंवेदवत्, नवरं विशेषोऽयं—		
	१४–१३ सं०	६ पत०	उपशमोप० पुमुपशान्ते
	१३	५	,, क्रोधवर्जं
	१२–११	४	क्षायिकोप० ६ पुमुपशान्ते
	११	३	,, क्रोधवर्जं
	४	४	क्षपकः हास्यषट्कवर्जं
	३	३	पुंवेदवर्जम्
माने	संज्वलनक्रोधवत् नवरं विशेषोऽयं—		
	सं ११ १०	पत०५ ५	उपशमोपशमकः मध्यको० द्वि०उ० सं०क्रोधोपशान्ते
	१०	४	,, सं० मानवर्जं
	९	३	क्षा. मध्यक्रोधद्विकोपशान्ते
	८	३	क्षा०उ० सं०क्रोधोपशान्ते
	८	२	,, सं० मानवर्जं
	२	२	,, सं० क्रोधक्षयकाले.

मायायां	मानवत् नवरं विशेषोऽयं—		
	८	४	उपशमोप.मध्यमानद्वि.उ०
	७ सं०	४पत०	उपशमोप. सं.मानोपशान्ते
	७	३	,, मायावर्जं
	६	२	क्षा०मध्यमानद्विकोपशा०
	५	२	क्षायिकोप० सं०मानोपशा.
	५	१	,, सं० मायावर्जं
	१	१	क्षपकः सं० मानक्षयकाले.
लोभे	मायावत् नवरं विशेषोऽयं—		
	५	३	उ.उ.मध्य०माया०द्वि.उ.
	४ सं०	पत०३	उपशमोप. सं०मायोपान्ते
	२	२	लोभवर्जं पतद्ग्रहे सम्य० वर्जसंक्रमःउप०पशमकानां
	३	१	क्षा०उ०मध्य०मा०द्वि.उ.
	२	१	क्षायिकोप० मायोपशान्ते
	२	२	उपशमोप. सू०संपरा०च

॥ नाम्नो मार्गणासु संक्रमपतद्ग्रहसंवेधस्थानान्युच्यन्ते ॥

नरकगतौ नाम्नः मिथ्यादृष्टौ तिर्यक्प्रायोग्ये मनुजप्रायोग्ये वा एकोनत्रिंशति प्रतिग्रहे द्व्युत्तरशतपञ्चनवतिरूपे द्वे संक्रमस्थाने संक्रामतः। मनुजप्रायोग्ये च षण्णवतिरपि संक्रामति। तिर्यक्प्रायोग्ये त्रिंशति प्रतिग्रहे द्व्युत्तरशतपञ्चनवतिरूपे द्वे संक्रामतः। सास्वादने तस्मिन्नेवैकोनत्रिंशति त्रिंशति च प्रतिग्रहे पञ्चनवतिरूपमेकं संक्रामति। मिश्रगुणस्थाने मनुजप्रायोग्ये एकोनत्रिंशति द्व्युत्तरशतपञ्चनवतिरूपे द्वे संक्रामतः। अविरतसम्यग्दृष्टौ मनुजप्रायोग्ये एकोनत्रिंशति द्व्युत्तरशतपञ्चनवतिरूपे द्वे संक्रामतः। तीर्थकरयुते त्रिंशति प्रतिग्रहे षण्णवतिः संक्रामति ॥ १ ॥ तिर्यग्गतौ मिथ्यादृष्टावपर्याप्तैकेन्द्रियप्रायोग्ये त्रयोविंशतौ, पर्याप्तैकेन्द्रियप्रायोग्ये अपर्याप्तविकलेन्द्रियतिर्यक्पञ्चेन्द्रियमनुजप्रायोग्ये पञ्चविंशतौ, पर्याप्तैकेन्द्रियप्रायोग्ये षड्विंशतौ, देवप्रायोग्ये नरकप्रायोग्ये वाष्टाविंशतौ, पर्याप्तविकलाक्षतिर्यक्पञ्चाक्षमनुजप्रायोग्ये एकोनत्रिंशति, पर्याप्तविकलाक्षतिर्यक्पञ्चाक्षप्रायोग्ये त्रिंशति पतद्ग्रहे च द्व्युत्तरशतपञ्चनवतित्रिनवतिचतुरशीतिद्व्यशीतिरूपाणि पञ्च संक्रमस्थानानि संक्रामन्ति। नवरमष्टाविंशतिप्रतिग्रहे वैक्रियसप्तकं नरकद्विकसहितं देवद्विकसहितं वा बन्धावलिकाया अभ्यन्तरं न संक्रामति, तेन बन्धावलिकाया ऊर्ध्वं द्व्युत्तरशतपञ्चनवतिरूपे द्वे एव संक्रामतः, अभ्यन्तरं तु चत्वार्यपि संक्रामन्ति, उद्वलितानुद्वलितानामुभयेषामप्यावलिकाभ्य-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

जय भगवा कार्यालय

न्तर्वर्त्तित्वात् । मनुजद्विकविहीनं द्व्यशीतिप्रकृतिरूपं संक्रमस्थानमष्टाविंशतिप्रतिग्रहे न संक्रामति, शेषेषु संक्रामति । मनुजप्रायोग्ये पञ्चविंशतौ एकोनत्रिंशति च बन्धावलिकाया अभ्यन्तरे वर्तमानो द्व्यशीतिः संक्रामति, नोर्ध्वमिति । सास्वादनेऽष्टाविंशतावेकोनत्रिंशति त्रिंशति च पञ्चनवतिरूपमेकमेव संक्रामति । मिश्रादित्रिकेप्यष्टाविंशतौ द्व्युत्तरशतपञ्चनवतिरूपे द्वे संक्रामतः ॥ १ ॥ देवगतौ मिथ्यादृष्टेरेकेन्द्रियप्रायोग्ये पञ्चविंशतौ षड्विंशतौ च, पञ्चाक्षतिर्यक्प्रायोग्ये एकोनत्रिंशति त्रिंशति च, मनुजप्रायोग्ये एकोनत्रिंशति पतद्ग्रहे च द्व्युत्तरशतपञ्चनवतिरूपे द्वे संक्रामतः । सास्वादने एतेष्वेव प्रतिग्रहस्थानेषु पञ्चनवतिरूपमेकमेव संक्रामति । मिश्रदृष्टौ मनुजप्रायोग्ये एकोनत्रिंशति पतद्ग्रहे द्व्युत्तरशतपञ्चनवतिरूपे द्वे संक्रामतः । अविरतसम्यग्दृष्टौ मनुजप्रायोग्ये एकोनत्रिंशति प्रतिग्रहे द्व्युत्तरशतपञ्चनवतिरूपे द्वे संक्रामतः । जिनयुते त्रिंशति त्र्युत्तरशतषण्णवतिरूपे द्वे संक्रामतः ॥ १ ॥ मनुजगतिचक्षुर्दर्शनमनोवाग्योगेषु नरद्विकविहीनद्व्यशीतिवर्जानां सर्वेषां संक्रमस्थानानां प्रतिग्रहस्थानानां संवेधः गुणस्थानेषु प्रागिव वाच्यः ॥ ६ ॥ जातिचतुष्ककायपञ्चकयोः गुणस्थानद्विकेऽपि तिर्यग्गतिवत्संवेधो वाच्यः, नवरं देवनरकप्रायोग्यं प्रतिग्रहस्थानं तेजस्कायिकेषु देवनरकमनुजप्रायोग्याणि प्रतिग्रहस्थानानि च न वक्तव्यानि ॥ ९ ॥ त्रसकायपञ्चाक्षजातिकाययोगवेदत्रिककषायचतुष्काचक्षुर्दर्शनभव्यसंज्ञ्याहारकरूपासु चतुर्दश मार्गणासु सर्वेषु गुणस्थानेषु प्रागुक्तानुसारेण संक्रमस्थानप्रतिग्रहस्थानानां संवधो वाच्यः ॥ १४ ॥ मतिश्रुताज्ञानयोः गुणस्थानद्विकेऽपि तिर्यग्गतिवत् संवेधो वाच्यः, नवरं नरकप्रायोग्येऽष्टाविंशतौ षण्णवतिरूपे संक्रामति ॥ २ ॥ विभङ्गज्ञाने मिथ्यादृष्टौ नरकप्रायोग्येऽष्टाविंशतिप्रतिग्रहे द्व्युत्तरशतषण्णवतिपञ्चनवतिरूपाणि त्रीणि संक्रामन्ति, शेषेषु मिथ्यादृष्टियोग्येषु प्रतिग्रहेषु द्व्युत्तरशतपञ्चनवतिरूपे द्वे द्वे संक्रामतः । सास्वादने देवप्रायोग्याष्टाविंशतौ, पञ्चाक्षतिर्यङ्मनुजप्रायोग्यैकोनत्रिंशति तिर्यक्प्रायोग्यत्रिंशति च, मिश्रगुणस्थाने मनुजप्रायोग्यैकोनत्रिंशति, देवप्रायोग्याष्टाविंशतौ च द्व्युत्तरशतपञ्चनवतिरूपे द्वे संक्रमस्थाने संक्रामतः ॥ १ ॥ मत्यादिज्ञानत्रिकेऽविरतसम्यग्दृष्टौ मनुजप्रायोग्ये एकोनत्रिंशति देवप्रायोग्येऽष्टाविंशतौ च द्व्युत्तरशतपञ्चनवतिरूपे द्वे संक्रामतः । जिनयुते मनुजप्रायोग्ये त्रिंशति षण्णवतित्र्युत्तरशतरूपे द्वे, देवप्रायोग्ये एकोनत्रिंशति च जिननाम्नि बन्धावलिकाभ्यन्तरे द्व्युत्तरशतपञ्चनवतिरूपे द्वे संक्रामतः, बन्धावलिकाया ऊर्ध्वं तु त्र्युत्तरशतषण्णवतिरूपे द्वे संक्रामतः । देशविरतप्रमत्तयोः देवप्रायोग्येऽष्टाविंशतौ द्व्युत्तरशतपञ्चनवतिरूपे द्वे संक्रामतः । देवप्रायोग्ये जिनयुते एकोनत्रिंशति चाविरतसम्यग्दृष्टिवत् भाव्यम् । मनःपर्यवज्ञाने प्रमत्ते मतिज्ञानवत्, अप्रमत्ते मत्यादिज्ञानचतुष्केऽपि अष्टाविंशतिप्रतिग्रहे द्व्युत्तरशतपञ्चनवतिरूपे द्वे संक्रमस्थाने संक्रामतः, एकोनत्रिंशति जिननामबन्धावलिकाभ्यन्तरे वर्तमानस्य पञ्चनवतिः संक्रामति, बन्धावलिकाया उपरि तु षण्णवतिः संक्रामति, त्रिंशति प्रतिग्रहे आहारकसप्तकस्य बन्धावलिकाया अभ्यन्तरे वर्तमानस्य पञ्चनवतिः संक्रामति, बन्धावलिकाया ऊर्ध्वं तु द्व्युत्तरशतं

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

संक्रामति, एकत्रिंशति पतद्ग्रहे जिनाहारकसप्तकयोः बन्धावलिकाया अभ्यन्तरे वर्तमानयोः पञ्चनवतिः संक्रामति, उभयोः बन्धावलिकाया ऊर्ध्वं त्र्युत्तरशतं संक्रामति, आहारकसप्तकस्य बन्धावलिकाभ्यन्तरे जिननाम्नस्तु बन्धावलिकाया ऊर्ध्वं षण्णवतिः संक्रामति, आहारकसप्तकस्य बन्धावलिकोर्ध्वं जिननाम्नो बन्धावलिकाया अभ्यन्तरे वर्तमानस्य द्व्युत्तरशतं संक्रामति। अपूर्वकरणगुणस्थाने षष्ठभागं यावदप्रमत्तवदिति। अपूर्वकरणसप्तमभागादारभ्य उपशमश्रेण्यां सूक्ष्मसंपरायं यावत् क्षपकश्रेण्यां तु अनिवृत्तिकरणे नामत्रयोदशकं क्षयं न याति तावत् यशःकीर्त्तौ द्व्युत्तरशतैकोत्तरशतपञ्चनवतिचतुर्नवतिरूपाणि चत्वारि संक्रमस्थानानि संक्रामन्ति। त्रयोदशक्षयानन्तरमनिवृत्तिकरणे सूक्ष्मसम्पराये चैकोननवत्यष्टाशीत्येकाशीतिद्व्यशीतिरूपाणि चत्वारि संक्रामन्ति। उपशान्तादौ पतद्ग्रहाभावेन संक्रमाभावात् न संवेधः ॥ ४ ॥ केवलज्ञानदर्शनयोर्नास्ति संक्रमप्रतिग्रहस्थानानां संवेध बन्धाभावात् ॥२॥ अवधिदर्शने मतिज्ञानवत्। आद्यगुणस्थानत्रिकविवक्षणे तु मिथ्यात्वादित्रिके विभङ्गवदिति ॥१॥ अविरतमार्गणायां मिथ्यादृष्ट्यादिचतुष्के त्रसकायवदिति ॥१॥

देशविरतेऽष्टाविंशतौ द्व्युत्तरशतपञ्चनवतिरूपे द्वे संक्रामतः। एकोनत्रिंशति जिननाम्नि बन्धावलिकाया अभ्यन्तरे वर्तमाने द्व्युत्तरशतपञ्चनवतिरूपे द्वे संक्रामतः। बन्धावलिकाया ऊर्ध्वं त्र्युत्तरशतषण्णवतिरूपे द्वे संक्रामतः ॥१॥ परिहारविशुद्धौ प्रमत्तगुणस्थानेऽष्टाविंशतौ द्व्युत्तरशतपञ्चनवतिरूपे द्वे संक्रामतः। एकोनत्रिंशति जिननामबन्धावलिकाभ्यन्तरे वर्तमानस्य द्व्युत्तरशतपञ्चनवतिरूपे द्वे संक्रामतः। बन्धावलिकाया ऊर्ध्वं तु षण्णवतित्र्युत्तरशतरूपे द्वे संक्रामतः। अप्रमत्ते अष्टाविंशतौ पञ्चनवतिः, एकोनत्रिंशति जिननाम्नो बन्धावलिकाभ्यन्तरे वर्त्तमानस्य पञ्चनवतिरूर्ध्वं तु षण्णवतिः संक्रामति, त्रिंशति आहारकसप्तकबन्धावलिकाभ्यन्तरे वर्तमानस्य पञ्चनवतिः प्रकृतयः संक्रामन्ति। बन्धावलिकायाः ऊर्ध्वं तु द्व्युत्तरशतं संक्रामति। एकत्रिंशति जिनाहारकयोः बन्धावलिकाभ्यन्तरे वर्तमानयोः पञ्चनवतिः संक्रामति, उभयोः बन्धावलिकाया ऊर्ध्वं त्र्युत्तरशतं संक्रामति। आहारकसप्तकस्य बन्धावलिकाया अभ्यन्तरे वर्तमानस्य जिननाम्नश्च बन्धावलिकाया ऊर्ध्वं वर्तमानस्य षण्णवतिः संक्रामति, जिननाम्नो बन्धावलिकाया अभ्यन्तरे वर्तमानस्याहारकसप्तकस्योर्ध्वं वर्तमानस्य द्व्युत्तरशतं संक्रामति ॥१॥ सामायिकच्छेदोपस्थापनीययोः प्रमत्ताप्रमत्तापूर्वकरणेषु परिहारविशुद्धिवत्। अपूर्वकरणसप्तमभागादारभ्य सूक्ष्मसम्परायं यावदुपशमश्रेण्यां द्व्युत्तरशतैकोत्तरशतपञ्चनवतिचतुर्नवतिरूपाणि चत्वारि यशःकीर्त्तौ संक्रामन्ति। क्षपकश्रेण्यां त्रयोदशक्षयानन्तरमेकोननवत्यष्टाशीतिद्व्यशीत्येकाशीतिरूपाणि चत्वारि तत्रैव संक्रामन्ति ॥ २ ॥ यथाख्याते नास्ति संवेधः, बन्धाभावात् ॥ १ ॥ सूक्ष्मसम्पराये स्वगुणस्थानवदिति ॥१॥ अशुभलेश्यात्रिके संक्रमप्रतिग्रहस्थानानां संवेधः स्वगुणस्थानोक्तो वाच्यः ॥ ३ ॥ तेजोलेश्यायां मिथ्यादृष्टौ बादरपर्याप्तैकेन्द्रियप्रायोग्ये पञ्चविंशतिषड्विंशतिरूपयोर्द्व्युत्तरशतपञ्चनवतित्रिनवतिचतुरशीतिरूपाणि चत्वारि संक्रामन्ति। देवप्रायोग्याष्टा-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

विंशतावप्येतान्येव चत्वारि संक्रामन्ति, भावना प्रागुक्तानुसारेण कर्त्तव्या । पञ्चाक्षतिर्यङ्मनुजप्रायोग्ये एकोनत्रिंशति, तिर्यक्प्रायोग्ये त्रिंशति चैवमेव परिभावनीयम् । सास्वादने तेष्वेव प्रतिग्रहे द्व्युत्तरशतपञ्चनवतिरूपे द्वे संक्रामतः । मिश्रे देवप्रायोग्याष्टाविंशतौ मनुजप्रायोग्यैकोनत्रिंशति च द्व्युत्तरशतपञ्चनवतिरूपे द्वे संक्रामतः । अविरतसम्यग्दृष्टौ देवप्रायोग्याष्टाविंशतौ मनुजप्रायोग्यैकोनत्रिंशति च द्व्युत्तरशतपञ्चनवतिरूपे द्वे संक्रामतः । देवप्रायोग्यैकोनत्रिंशति त्र्युत्तरशतद्व्युत्तरशतपञ्चनवतिषण्णवतिरूपाणि चत्वारि संक्रामन्ति । तत्र जिननामबन्धावलिकाभ्यन्तरे वर्तमानस्य जिननामयुते द्वे स्थाने न संक्रामतः, बन्धावलिकाया ऊर्ध्वं तु जिननामयुते द्वे संक्रामतः । देशविरते प्रमत्ते च देवप्रायोग्येऽष्टाविंशतौ द्व्युत्तरशतपञ्चनवतिरूपे द्वे संक्रामतः । एकोनत्रिंशति जिननामबन्धावलिकाया अभ्यन्तरे वर्तमानस्य द्व्युत्तरशतपञ्चनवतिरूपे द्वे संक्रामतः, ऊर्ध्वं तु त्र्युत्तरशतषण्णवतिरूपे द्वे संक्रामतः । अप्रमत्तेऽप्यष्टाविंशतौ प्रमत्तवदेकोनत्रिंशति परिहारविशुद्धिवत् । त्रिंशति आहारकसप्तकस्य बन्धावलिकाया अभ्यन्तरे वर्तमानस्य पञ्चनवतिः संक्रामति, ऊर्ध्वं तु द्व्युत्तरशतं संक्रामति । एकत्रिंशति त्र्युत्तरशतद्व्युत्तरशतषण्णवतिपञ्चनवतिरूपाणि चत्वारि संक्रामन्ति, भावना तु प्रागिव कर्तव्या ॥ १ ॥ पद्मलेश्यायां मिथ्यादृष्टौ तिर्यङ्मनुजप्रायोग्ये एकोनत्रिंशति, तिर्यक्प्रायोग्ये त्रिंशति, देवप्रायोग्याष्टाविंशतौ च, द्व्युत्तरशतपञ्चनवतित्रिनवतिचतुरशीतिरूपाणि चत्वारि संक्रामन्ति । शेषगुणस्थानेषु तेजोलेश्यावदिति॥१॥ शुक्ललेश्यायां मिथ्यादृष्टौ मनुजप्रायोग्ये एकोनत्रिंशति, देवप्रायोग्याष्टाविंशतौ च द्व्युत्तरशतपञ्चनवतित्रिनवतिचतुरशीतिरूपाणि चत्वारि संक्रामन्ति । सास्वादने मनुजप्रायोग्ये एकोनत्रिंशति सास्वादनमिश्रयोः देवप्रायोग्येऽष्टाविंशतौ द्व्युत्तरशतपञ्चनवतिरूपे द्वे संक्रामतः । अविरत्यादिषु मतिज्ञानवदिति ॥१॥ अभव्ये एकेन्द्रियप्रायोग्ये त्रयोविंशत्यादित्रिके, विकलाक्षप्रायोग्ये पञ्चाक्षतिर्यक्प्रायोग्ये च पञ्चविंशत्यादित्रिके, मनुजप्रायोग्ये पञ्चविंशतौ एकोनत्रिंशति च, मनुजद्विकबन्धावलिकायाः अभ्यन्तरे वर्तमानस्य पञ्चनवतित्रिनवतिचतुरशीतिद्व्यशीतिरूपाणि चत्वारि ऊर्ध्वं तु द्व्यशीतिवर्ज्जानि त्रीणि संक्रमस्थानानि संक्रामन्ति । देवनरकप्रायोग्येऽष्टाविंशतौ पञ्चनवतित्रिनवतिचतुरशीतिरूपाणि त्रीणि संक्रामन्ति ॥ १ ॥ मिथ्यात्वसास्वादनमिश्रमार्गणासु स्वस्वगुणस्थानवत् भावना कार्या ॥३॥ क्षायोपशमिकसम्यग्दृष्टेः चतुर्षु गुणस्थानेषु स्वगुणस्थानोक्तः संवेधो वाच्यः ॥१॥ औपशमिकसम्यग्दृष्टेरविरतसम्यग्दृष्टौ मनुजप्रायोग्ये एकोनत्रिंशति द्व्युत्तरशतपञ्चनवतिरूपे द्वे संक्रामतः । मनुजप्रायोग्ये त्रिंशति त्र्युत्तरशतषण्णवतिरूपे द्वे संक्रामतः । अविरत्यादिषु त्रिषु देवप्रायोग्येऽष्टाविंशतौ द्व्युत्तरशतपञ्चनवतिरूपे द्वे संक्रामतः । जिननामयुते एकोनत्रिंशति अविरत्यादिषु अपूर्वकरणषष्ठभागपर्यन्तेषु जिननामबन्धावलिकाया अभ्यन्तरे वर्तमानस्य पञ्चनवतिरूर्ध्वं तु षण्णवतिः संक्रामति । आहारकसत्कर्मणां त्वविरतादिषु प्रमत्तपर्यन्तेषु जिननामबन्धावलिकाया अभ्यन्तरे द्व्युत्तरशतमूर्ध्वं तु त्र्युत्तरशतं संक्रामति । अप्रमत्तादपूर्वकरणषष्ठभागं यावत् त्रिंशति आहारकस-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सकबन्धावलिकायाः अभ्यन्तरे वर्तमानस्य पञ्चनवतिरूर्ध्वं तु द्व्युत्तरशतं संक्रामति । एकत्रिंशति उभयोः बन्धावलिकायाः अभ्यन्तरे वर्तमानस्य पञ्चनवतिरूर्ध्वं तु त्र्युत्तरशतं संक्रामति । जिननामबन्धावलिकायाः अभ्यन्तरे द्व्युत्तरशतमाहारकसप्तकबन्धावलिकाया अभ्यन्तरे षण्णवतिः संक्रामति । अपूर्वकरणसप्तमभागादारभ्य सूक्ष्मसम्परायं यावत् यशःकीर्त्तौ द्व्युत्तरशतैकोत्तरशतपञ्चनवतिचतुर्नवतिरूपाणि चत्वारि संक्रामन्ति ॥ १ ॥ क्षायिकसम्यग्दृष्टावप्यौपशमिकसम्यग्दृष्टिवत्, नवरं क्षपकश्रेण्यामनिवृत्तिकरणे नामत्रयोदशक्षयानन्तरं सूक्ष्मसम्पराये च यशःकीर्त्तौ एकोननवत्यष्टाशीतिद्व्यशीत्येकाशीतिरूपाणि चत्वारि संक्रामन्ति ॥१॥ असंज्ञिनि एकेन्द्रियप्रायोग्ये त्रयोविंशत्यादिषु त्रिषु, विकलाक्षपञ्चाक्षतिर्यक्प्रायोग्येषु पञ्चविंशत्यादिषु त्रिषु, मनुजप्रायोग्यपञ्चविंशतौ एकोनत्रिंशति च, द्व्युत्तरशतपञ्चनवतित्रिनवतिचतुरशीतिद्व्यशीतिरूपाणि पञ्च मनुजद्विकस्य बन्धावलिकाया ऊर्ध्वं तु द्व्यशीतिवर्जानि चत्वारि मिथ्यादृष्टौ संक्रामन्ति, देवनरकगतिप्रायोग्येऽष्टाविंशतौ द्व्युत्तरशतं पञ्चनवतिश्च संक्रामति । सास्वादने पञ्चाक्षतिर्यङ्मनुजप्रायोग्ये एकोनत्रिंशति तिर्यक्प्रायोग्ये त्रिंशति देवप्रायोग्येऽष्टाविंशतौ च पञ्चनवतिरूपमेकमेव संक्रामति ॥१॥

अनाहारकमार्गणायां मिथ्यादृष्टौ एकेन्द्रियप्रायोग्ये त्रयोविंशत्यादिषु त्रिषु, विकलाक्षपञ्चाक्षतिर्यक्प्रायोग्येषु पञ्चविंशत्यादिषु त्रिषु, मनुजप्रायोग्ये पञ्चविंशतौ च, द्व्युत्तरशतपञ्चनवतित्रिनवतिचतुरशीतिद्व्यशीतिरूपाणि पञ्च, मनुजद्विकबन्धावलिकाया ऊर्ध्वं तु द्व्यशीतिवर्जानि चत्वारि संक्रामन्ति । मनुजप्रायोग्ये एकोनत्रिंशति द्व्युत्तरशतषण्णवतिपञ्चनवतित्रिनवतिचतुरशीतिद्व्यशीतिरूपाणि षट् संक्रामन्ति । सास्वादने पञ्चाक्षतिर्यङ्मनुजप्रायोग्ये एकोनत्रिंशति तिर्यक्प्रायोग्ये त्रिंशति च पञ्चनवतिरूपमेकमेव संक्रामति । अविरतसम्यग्दृष्टेः देवप्रायोग्येऽष्टाविंशतौ मनुजप्रायोग्ये एकोनत्रिंशति च द्व्युत्तरशतपञ्चनवतिरूपे द्वे संक्रामतः । मनुजप्रायोग्ये त्रिंशति त्र्युत्तरशतषण्णवतिरूपे द्वे, देवप्रायोग्ये एकोनत्रिंशति च त्र्युत्तरशतद्व्युत्तरशतषण्णवतिपञ्चनवतिरूपाणि चत्वारि संक्रामन्ति ॥ १ ॥ इत्युक्तो मार्गणासु नामकर्मणः संक्रमप्रतिग्रहस्थानयोः संवेधः, तदुक्तौ चोक्तो मार्गणासु संक्रमप्रतिग्रहयोः संवेधः, एवञ्च समाप्तः सविस्तरः प्रकृतिसंक्रमः ॥

॥ मार्गणासु नाम्नः संक्रमपत० संवेधः ॥

नरकगतौ—	ओघे	सं० ३—१०२,९६,९५	पत०—२९;३०
	मिथ्यात्वे	१०२—९५	२९-३० तिर्यक्प्रा०पत०
		१०२-९५-९६	२९ नरप्रायोग्ये
	सास्वा०	९५	२९ नरतिर्यक्प्रायोग्ये ३० तिर्यक्प्रायोग्ये
	मिश्रे	१०२—९५	२९ नरप्रायोग्ये
	अविरते	१०२-९५-९६	२९—३० ,,

तिर्यग्गतौ—	ओघे	सं० ५—१०२,९५,९३,८४,८२ पत० ६—२३,२५,२६,२८,२९,३०	
	मिथ्यात्वे	१०२—९५—९३—८४—संक्रमस्था०	२३अ० एके०प्रा० पत०
			२५प० एके०—अप० विकल०—अप०ति० पंचे०—अप०मनुज०
			२६ एके० प्रा०
			२८ देव—नरकप्रा०
			२९पर्या० विकल—पर्या० ति०पं०-पर्या० मनुजप्रा०
			३०पर्या० वि०-पर्या०म०

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

		८२ [मनु० २ हीनम्]	२३,२५,२६,२९,३०
	सास्वादने	९५	२८, २९, ३०
	मिश्रे	१०२, ९५	२८
	अविरते देशविते	,, ,,	,,
देव-गतौ-	ओघे	सं० ४—१०३, १०२, ९६, ९५ पत० ४—२५,२६,२९,३०	
	मिथ्यात्वे	सं० १०२,९५	पत० २५, २६ एके०
			२९,३० पंचे० ति०
			२९ मनुज०
	सास्वा०	९५	२५, २६, २९, ३० मिथ्या० वत्
	मिश्रे	१०२, ९५	२९ मनुज०
	अविरते	१०२, ९५	२९ ,,
		१०३, ९६	३० जिनयुते
चक्षुर्द० मनुज-मन-वचनेषु	सं—१०३–१०२–१०१–९६–९५–९४–९३–८९–८८–८४–८१ [इति ८२ वर्जं ११]		
	पत०—२३–२५–२६–२८–२९–३०–३१–१		
	गुण०भावना—पूर्वोक्तवत्.		
४ कुजाति ५ काय	मिथ्यात्वे सास्वा०	संवेधः तिर्यग्वत् .नवरं देवनरकप्रायो०प्रतिग्रहवर्जनं,तेजोवाय्वोस्तु देवनरकमनुजप्रायोग्यप्रतिग्रहवर्जनम्	
त्रस–पंचे०–काययोगवेद ४ कषाय–अचक्षुर्भव्य –संज्ञि–आहा [१४] षु	सं—पूर्वोक्तवत्		
मति-श्रुता-ज्ञानयोः	संवेधः तिर्यग्वत्, नवरं नरकयोग्य २८ तौ ९६ तिरपि संक्रामति. सा० १०२–९५		

विभंगे-	मिथ्यात्वे	१०२,९६,९५	२८ नारकप्रा०	
	,,	१०२–९५	शेषप्रतिग्रहेषु	
	सास्वा०	१०२–९५	२८ देवप्रा०	
	,,	१०२–९५	२९पंचे० ति०–मनुज०	
	,,	१०२–९५	३० तिर्यचप्रा०	
	मिश्रे	१०२–९५	२८ देव०	
	,,	१०२–९५	२९ मनुज०	
मति, श्रुत, अवधि	अविरते	१०२–९५	२९मनुज०	
	,,	,, ,,	२८ देव०	
	,,	,, ,,	२९ देव०	जिनबन्धावलिकान्तः
	,,	१०३–९६	३०मनुज०	०
	,,	,, ,,	२९ देव०	जिनबन्धावलिकोर्ध्वं
	देशवि०	१०२–९५	२८ देव०	
		१०२–९५ ९६–१०३	२९ ,, अवि०स०वत्	
मनः प० वेऽपि	प्रमत्ते	१०२–९५	२८ देव०	
		१०३–९६ १०२–९५	२९ ,,	
	अप्रमत्ते	१०२–९५	२८ देव०	
		,, ,,	२९देव०[जिनबन्धावलि०]	
		९६	२९ देव० [,, कोर्ध्वं]	
		९५	३०देव०[आ०बन्धावलि०]	
		१०२	३० देव० [,, कोर्ध्वं]	
		९५	३१ देव० [जिनाहारक०]	
		१०३	३१ देव० [,, ऊर्ध्वं]	
		९६	३१देव० [जिनबन्धावलिकोर्ध्वं,आहा०७बन्धा०न्तः]	
		१०२	३१देव०[आहा० ७बन्धा०कोर्ध्वं, जिनबन्धाव०न्तश्च]	

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

	अपूर्व० १–६	अप्रमत्तवत्	
	,, ७ मे	१०२–१०१ ९५–९४	१यशसि१३क्षयं यावत्
	,, ,,	८९–८८ ८२–८१	१ यशसि १३ क्षयोर्ध्वं
	सूक्ष्मसं०	१०२–१०१–९५–९४–८९ ८८–८२–८१	१ यशसि.
	उपशान्त. क्षीण०	संक्रमपतद्ग्रहाभावः	
केवल २	संक्रमपतद्ग्रहाभावः		
अवधिदर्शने	मतिज्ञानवत् [ज्ञानविवक्षायां]		
	विभंगवत् अपि [अज्ञानेऽपि विवक्षिते]		
अविरते	१,२,३,४गुणे	त्रसवत्	
देशविरते	१०२,९५सं०	२८ देवयोग्ये.	
	१०२–९५	२९ ,, [जिनान्तवर्तिः]	
	१०३–९६	२९ ,, [जिनोर्ध्वं] *	
परि-हारे	प्रमत्ते	१०२–९५	२८ ,,
		१०२–९५	२९ ,, [जिनाभ्यन्तरे]
		१०३–९६	२९ ,, [जिनोर्ध्वं]
	अप्र०	१०२–९५	२८ ,,
		१०२–९५	२९ ,, [जिनाभ्यन्तरे]
		१०३–९६	२९ ,, [जिनोर्ध्वं]
		९५	३० ,, [आहा०भ्यन्तरे]
		१०२	३० ,, [आहारकोर्ध्वं]
		९५	३१ ,, [जिनाहारकाभ्य०]
		१०३	३१ ,, [जिनाहाकोर्ध्वं]
		९६	३१ ,, [आहारकाभ्यन्तरे, जिनोर्ध्वं च]
		१०२	३१ ,, [जिनान्तराहारकोर्ध्वं]

* अन्तः अभ्यन्तरश्चात्र बन्धावलिकायाः, ऊर्ध्वं शब्देनापि बन्धावलिकोर्ध्वमिति.

सामायिकछेदोप०	६,७,८,गुणेषु	परिहारवि० वत्	
	ऊर्ध्वतः१०गुणेषु	१०२,१०१,९५, ९४ संक्रमः	उपशमके
		८९-८८-८२-८१	क्षपके १३ क्षयोर्ध्वम्
यथाख्याते	नास्ति संवेधः		
सू० संपराये	स्वगुणस्थानवत्		
कृष्ण, नील, कापोतेषु	स्वस्वगुणस्थानोक्तवत् .		
तेजो०	मिथ्यात्वे	१०२,९५, ९३,८४	२५–२६ बा० प० एकें० प्रायोग्ये.
	,,	,, ,,	२८ देवयोग्ये.
	,,	,, ,,	२९पंचें०ति०-मनुजप्रा.
	,,	,, ,,	३० तिर्यंचप्रायोग्ये
	सास्वा०	१०२–९५	२८–२९–३०
	मिश्रे	१०२–९५	२८ देव०,२९ मनुज०
	अविरते	१०२–९५	२८ ,, २९ ,,
	,,	१०२–९५	२९ ,,[जिनाभ्यन्तरे]
	,,	१०३–९६	२९ ,,[जिनोर्ध्वम्]
	देशवि० प्रम०	१०२–९५	२८ ,,
		१०२–९५	२९ ,, [जिनान्तः]
		१०३–९६	२९ ,, [जिनोर्ध्वं]
	अप्रमत्ते	१०२–९५	२८ ,,
	,,	९५	२९ ,, [जिनान्तः]
	,,	९६	२९ ,, [जिनोर्ध्वं]
	,,	९५	३० ,, [आहारका०]
	,,	१०२	३० ,,[आहारकोर्ध्वं]
	,,	१०३–१०२ ९६–९५	३१ मनःपर्ययवत्.

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

पद्मे	मिथ्या०	१०२, ९५, ९३, ८४	२९ ति० मनु०योग्ये
			३० ति० योग्ये.
			२८ देवयोग्ये
	शेषगुणेषु	—तेजोलेश्यावत्	
शुक्ले	मिथ्या०	१०२, ९५,	२९ मनुजयोग्ये
			२८ देवयोग्ये
	सास्वा०	१०२–९५	२९ मनुज०
			२८ देव०
	मिश्रे	१०२–९५	२८ देव०
	अविरता	दिगुणेषु	मतिज्ञानवत्
अभव्ये	९५, ९३ ८४, ८२	२३, २५, २६ एके० योग्येषु	
		२५–२९–३० विकले०–पंचे० ति०	
		२५–२९मनुजयो० [मनुजबन्धा०न्तः]	
	९५–९३–८४	२८ देव० नरक०	
मिथ्या०–सास्वा०–मिश्रेषु—स्वस्वगुणस्थानवत.			
क्षयोपशमे–उपशमे च	४, ५, ६, ७ गुणेषु स्वस्वगुणस्थानवत्.		
	,, ८–१० ,,		
उपशमे—	८ तः १०	१०२–९५ १०१–९४	यशसि

क्षायिके	उपशमसम्य०वत् नवरं विशेषोऽयं		
	९ मे	८९, ८८, ८२, ८१,	१ यशसि, क्षपकानाम् १३ क्षयानन्तरम्.
	१० मे	,, ,, ,, ,,	,, क्षपकानाम्
असंज्ञिनि	मिथ्यात्वे	१०२–९५ ९३–८४ ८२	२३-२५-२६एके०योग्ये
			२५-२९-३०वि०पं०ति.
			२५–२९ मनुज०
		१०२–९५	२८ देव–नरक०
	सास्वा.	९५	२९पंचे० ति०–मनुज०
	,,	,,	३० तिर्यग्०
	,,	,,	२८ देवयोग्ये
अनाहारे	मिथ्यात्वे	१०२, ९५ ९३,८४,८२	२३-२५-२६ एके०यो.
			२५-२९-३० वि०-पं.ति.
			२५ नृयोग्ये
	,,	१०२-९६-९५ ९३-८४-८२	२९ नृयोग्ये
	सास्वा.	९५	२९नृ–पंचे०ति०योग्ये
			३० तिर्यग्योग्ये.
	अविर.	१०२–९५	२८ देवयोग्ये
	,,	,, ,,	२९ नृयोग्ये
	,,	१०३–९६	३० नृयोग्ये
	,,	१०३–१०२ ९६–९५	२९ देवयोग्ये.

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अथ स्थितिसंक्रमाधिकारः।

साम्प्रतं स्थितिसंक्रमाभिधानावसरः, तत्र च षडर्थाधिकाराः, तद्यथा—भेदः, विशेषलक्षणं, उत्कृष्टस्थितिसंक्रमपरिमाणं, जघन्यस्थितिसंक्रमपरिमाणं, साद्यादिप्ररूपणा, स्वामित्वप्ररूपणा चेति। तत्र भेदो द्विविधः, तद्यथा—मूलप्रकृतिस्थितिसंक्रमः, उत्तरप्रकृतिस्थितिसंक्रमश्च। मूलप्रकृतिस्थितिसंक्रमोऽष्टधा, तद्यथा—ज्ञानावरणीयस्य, दर्शनावरणीयस्य, वेदनीयस्य, मोहनीयस्य, आयुषः, नाम्नः, गोत्रस्य, अन्तरायस्येति। नन्वष्टानां मूलप्रकृतीनामायुषश्चोत्तरप्रकृतीनां प्राक्सर्वथा संक्रमो निषिद्ध इति चेत्?, सत्यम्, परं तत्रान्यप्रकृतावन्यप्रकृतिनयनलक्षणस्यैव संक्रमस्य निषेधः कृतः, अत्र तूद्वर्तनापवर्तनरूपत्वेन संक्रमस्य विवक्षितत्वात् न कश्चिद् दोषः, उत्तरप्रकृतीनां तु त्रयोऽपि संक्रमाः सम्भवन्ति। तत्र उत्तरप्रकृतिस्थितिसंक्रमोऽष्टपञ्चाशदधिकशतधा, तद्यथा—मतिज्ञानावरणीयस्य, श्रुतज्ञानावरणीयस्य यावद्वीर्यान्तरायस्येत्युक्तो भेदः। अधुना विशेषलक्षणमुच्यते—तच्च त्रिविधम्, उद्वर्तनारूपं, अपवर्तनारूपं, प्रकृत्यन्तरनयनलक्षणम्। तत्रोद्वर्तनं नाम शुभाशुभाध्यवसायेन बध्यमानायास्तेव स्वप्रकृतिस्थितौ प्राग् बद्धायाः स्वप्रकृतिस्थितेर्ह्रस्वकालतामपहाय दीर्घीकरणम्, अपवर्तनं नाम बध्यमानायामबध्यमानायां वा स्वप्रकृतावेव दीर्घस्थितिकालतामपहाय ह्रस्वस्थितिकालतया व्यवस्थापनम्, एतौ द्वौ मूलोत्तरप्रकृतिविषयौ भवतः। संक्रम्यमाणप्रकृतिस्थितीनां तुल्यासु स्थितिषु प्रतिग्रहप्रकृतौ नीत्वा यत् प्रवेशनं स प्रकृत्यन्तरनयनसंक्रमः, तदुक्तं पञ्चसंग्रहमूलवृत्तौ—"संक्रमप्रकृतितुल्यासु स्थितिषु निवेश्यन्त" इति, यथा मतिज्ञानावरणीयं बध्यमाने श्रुतज्ञानावरणीये, अयं संक्रम उत्तरप्रकृतिष्वेव भवति। तत्रापि विशेषलक्षणं सामान्यलक्षणं न सर्वथाऽपवदतीति न्यायात् दर्शनमोहनीयचारित्रमोहनीययोरायुषश्चतसृणां प्रकृतीनां बन्धसंक्रमोद्वर्तनोदयावलिकागतस्थितेश्चायं संक्रमो न भवत्येवेति। नन्वमूर्तस्य कालस्य गगनमिवोद्वर्तनापवर्तनान्यप्रकृतिनयनलक्षणस्थितिसंक्रमः कथं जाघटीतीति चेत्? उच्यते—ह्रस्वस्थितिकालोपलक्षिताः परमाणव एव शुभाशुभाध्यवसायजनिताभिनवस्थितिसमयेषूर्ध्वं यद् व्यवस्थाप्यन्ते तदुद्वर्तनम्, दीर्घकालोपलक्षिताः परमाणवः शुभाशुभाध्यवसायेन स्वाधस्तनस्थितौ यद्व्यवस्थाप्यन्ते तदपवर्तनम्, संक्रम्यमाणप्रकृतिस्थितिसमयस्थाः कर्मपरमाणवः स्वभिन्नबध्यमानप्रतिग्रहप्रकृतौ नीत्वा तुल्यसमयेषु यद् व्यवस्थाप्यन्ते स प्रकृत्यन्तरनयनलक्षणः संक्रमः, ईदृशः स्थितिसंक्रमः "मञ्चाः क्रोशन्ति" इति न्यायेनाभिधीयमानो न विरुध्यत इत्युक्तं स्थितिसंक्रमस्य विशेषलक्षणम्। अथोत्कृष्टसंक्रमपरिमाणं प्रतिपाद्यते—तत्र प्रकृतयो द्विधा, बन्धोत्कृष्टाः संक्रमोत्कृष्टाश्च। तत्र बन्धादेव स्वमूलप्रकृतितुल्या स्थितिर्यासामुत्तरप्रकृतीनां ता बन्धोत्कृष्टाः, ताश्च सप्तनवतिस्तद्यथा—ज्ञानावरणपञ्चकं दर्शनावरणनवकमन्तरायपञ्चकं षोडशकषाया मिथ्यात्वमायुश्चतुष्टयमसातवेदनीयं नीचैर्गोत्रं नरकद्विकं तिर्यग्द्विकमेकेन्द्रियजातिः पञ्चेन्द्रियजातिस्तैजससप्तकमौदारिकसप्तकं वैक्रियसप्तकं षष्ठसंस्थानसंहननेऽशुभविहायोगतिर्नीलकटुकवर्जमशुभवर्णादिसप्तकमगुरुलघुपराघातोपघातोच्छ्वासातपोद्योतानि निर्माणं त्रसचतुष्कम-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

स्थिरषट्कं स्थावरनाम चेति । 'नीलकटुकवर्ज'मित्यत्र कर्मप्रकृतिवृत्तिद्वये कटुकस्थाने 'तिक्त' मित्युक्तं, पञ्चसङ्ग्रहवृत्तिद्वये च संक्रमोत्कृष्टासु तिक्तं गृहीतं, तथापि "तिक्तकृष्ण-दुरभिगन्धगुरुकर्कशरूक्षशीतानां विंशतिः" इति पञ्चसङ्ग्रहमूलवृत्तौ, "तिक्तरसकृष्णवर्णयोस्तु श-ब्दस्याधिकार्थसंसूचनात् दुरभिगन्धगुरुकर्कशरूक्षशीतानां चोत्कृष्टा स्थितिर्विंशतिः सागरोपमकोटा-कोटयः" इति पञ्चसङ्ग्रहबृहद्वृत्तौ च बन्धोत्कृष्टास्वपि तिक्तं गृहीतम् । कर्मप्रकृतिचूर्णौ तु वर्णादिविंशतिरपि बन्धोत्कृष्टासु गृहीता अवसीयते यतः संक्रमोत्कृष्टासु वर्णादिवर्जा अष्टचत्वारिंशदेव गृहीतास्तथा च तद्ग्रन्थः—"तत्थ संकमुक्कसातो इमातो सायावेयणिज्जं-सम्मंचसम्मामिच्छत्तणवणोकेसायमणुअगतिदेवगतिवेइंदियतेइंदियचउरिंदियजाइआहारसत्तगं अंतिम-वज्जसंठाणसंघयणमणुयगतिदेवगतिआणुपुव्विओ पसत्थविहायगतिसुहुमअपज्जत्तसाहारणथिरसुहसु-भगसुस्सरआदेज्जजसकीत्तितित्थगरउच्चागोयाणं एयासिं अडयालीसाए पगतीणं संकमतो उक्कस्स थिति लब्भते" इति । कर्मप्रकृतौ वर्णादीनां विंशतेरपि विंशतिः कोटाकोटिप्रमाणा स्थि-तिरुक्ता संभाव्यते, तदुक्तं—"वीसा सणिच्चणामाणं", अस्य प्रतीकस्य व्याख्यायां वर्णादयः सामान्येन गृहीताः, यथा पञ्चसङ्ग्रहे पार्थक्येन वर्णादीनां स्थितिरुक्ता तथा कर्मप्रकृतावनु-क्तत्वेन विंशतिरपि बन्धोत्कृष्टासु गृहिता व्यवसीयत इति । पञ्चसङ्ग्रहतृतीयद्वारे पञ्चमद्वारे चोत्कृष्टस्थितिसत्कर्मस्वामित्वाधिकारे वृत्तिद्वयेऽपि कर्मप्रकृतिचूर्णौ कर्मप्रकृतिवृत्तिद्वये च तस्मिन्नेवाधिकारे बन्धनकरणप्रथमगाथावृत्तौ न्यायाचार्यैरुदये सति बन्धोत्कृष्टासु वर्णादयो गृहीताः, नानुदये सति बन्धोत्कृष्टासु नाऽप्युदये सति अनुदये सति वा संक्रमोत्कृष्टासु वर्णादयो गृहीताः, तथोत्कृष्टस्थित्युदीरणाधिकारेऽपि उदये सति बन्धोत्कृष्टासु विंशति-रपि वर्णादयो गृहीताः । तत्त्वं पुनः तद्विदो विदन्ति । ताश्च बन्धोत्कृष्टा द्वेधा—उदये सति बन्धोत्कृष्टा अनुदये सति बन्धोत्कृष्टाश्च, तत्र विपाकोदये सति यासां प्रकृतीनां बन्धा-दुत्कृष्टं स्थितिसत्कर्मावाप्यते ता उदयबन्धोत्कृष्टाः, यासां तु विपाकोदयाभावे बन्धादु-त्कृष्टस्थितिसत्कर्मावाप्तिस्ता अनुदयबन्धोत्कृष्टाः । तत्रानुदयबन्धोत्कृष्टा विंशतिः तद्यथा—नरकद्विकंतिर्यग्द्विकैकेन्द्रियजात्यौदारिकसप्तकसेवार्त्तसंहननस्थावरनामातपनामानि पञ्च-निद्रेति । तत्र नरकद्विकस्योदयो नरकगतौ, उत्कृष्टस्थितिबन्धकास्तिर्यग्मनुजाः । एकेन्द्रिय-जातिस्थावरातपनाम्नामुदय एकेन्द्रियेषु, न च तत्रोत्कृष्टबन्धस्तत्र तेषां सागरोपमस्य द्वौ सप्तभागौ उत्कृष्टतः स्थितिबन्धस्योक्तत्वात् । तिर्यग्द्विकस्योदयः तिर्यग्गतौ, बन्धश्चतसृष्वपि गतिषु स्यात्, तथापि उत्कृष्टस्थितिबन्धका देवनारका एव, न मनुजतिर्यञ्चः, ते हि तद्बन्धा-र्हसंक्लेशे वर्तमानास्तिर्यग्द्विकस्योत्कृष्टतोऽपि अष्टादशकोटाकोटिप्रमाणमेव स्थितिं बध्नन्ति, उत्कृष्टसंक्लेशे वर्तमानास्ते तु तिर्यक्प्रायोग्यं नैव बध्नन्ति, किन्तु नरकप्रायोग्यमेव बध्नन्ति । तथौदारिकसप्तकसेवार्तसंहननयोरुदयस्तिर्यग्मनुजानां, न च ते उत्कृष्टां स्थि-तिमुपरचयन्ति, किन्तु सुरनारकाः । निद्रापञ्चकोदये उत्कृष्टसंक्लेशाभावेन निद्रापञ्चकस्यो-त्कृष्टबन्धाभाव इति । शेषा उदयबन्धोत्कृष्टाः । बन्धेऽबन्धे वा सति संक्रमादेवोत्कृष्टा स्वमूलप्रकृतिभिः समाना स्थितिर्यासामुत्तरप्रकृतीनां ताः संक्रमोत्कृष्टास्ताश्चेमा एकषष्टिः—

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सातवेदनीयं सम्यक्त्वं सम्यग्मिथ्यात्वं नवनोकषाया आहारकसप्तकं शुभवर्णाद्येकादशकं नीलं कटुकं देवद्विकं मनुजद्विकं विकलजातित्रिकमाद्यानि पञ्च संस्थानानि संहननानि च प्रशस्तविहायोगतिः सूक्ष्मं साधारणमपर्याप्तं स्थिरादिषट्कं तीर्थंकरमुच्चैर्गोत्रमिति । संक्रमोत्कृष्टा अपि द्वेधा, ताश्चाग्रे प्रतिपादितः ।

अधुनाऽऽदौ बन्धोत्कृष्टानामुत्कृष्टा बन्धस्थितिः प्रतिपाद्यते—ज्ञानावरणपञ्चकं दर्शनावरणनवकमसातवेदनीयमन्तरायपञ्चकमिति विंशतेः प्रकृतीनां त्रिंशत्सागरोपमकोटाकोटिमाना स्थितिः, कषायाणां चत्वारिंशत्कोटाकोटिप्रमाणा, मिथ्यात्वस्य सप्ततिः कोटाकोटिप्रमाणा, तिर्यङ्मनुजायुषोः त्रिपल्योपमा, देवनारकायुषोः त्रयस्त्रिंशत्सागरोपमस्थितिः, आयुषामेषा निषेककालस्थितिरवगन्तव्या, पूर्वकोटित्रिभागाभ्यधिका तु एषां सर्वास्थितिर्वाच्या, अत्र तिर्यङ्मनुजायुषी यद्यपि स्वमूलप्रकृत्यपेक्षया तुल्यस्थितिके न भवतस्तथापि संक्रमोत्कृष्टत्वाभावात्ते बन्धोत्कृष्टे उक्ते, नरकद्विकतिर्यग्द्विकैकेन्द्रियजातिपञ्चेन्द्रियजातितैजससप्तकौदारिकसप्तकवैक्रियसप्तकनीलकटुकवर्जाशुभवर्णादिसप्तकागुरुलघूपघातपराघातोच्छ्वासातपोद्योतनिर्माणान्त्यसंहननसंस्थानाप्रशस्तविहायोगतिस्थावरत्रसचतुष्कास्थिरषट्कनीचगोत्रमिति षट्पञ्चाशत्प्रकृतीनामुत्कृष्टा स्थितिर्विंशतिसागरोपमकोटाकोटिप्रमाणा । अथ संक्रमोत्कृष्टानां बन्धस्थितिः प्रतिपाद्यते—तत्र सातवेदनीयस्त्रीवेदमनुजद्विकानां पञ्चदशकोटाकोटिप्रमाणा उत्कृष्टा स्थितिः । पुंवेदहास्यरत्युच्चैर्गोत्रप्रशस्तखगतिस्थिरशुभसुभगसुस्वरादेययशःकीर्तिदेवगतिदेवानुपूर्वीलक्षणानां त्रयोदशप्रकृतीनामुत्कृष्टा स्थितिर्दशसागरोपमकोटाकोटिमाना । भयजुगुप्साशोकारतिनपुंसकवेदानां विंशतिः, सूक्ष्मत्रिकस्य विकलत्रिकस्य चाष्टादश, प्रथमसंस्थानसंहननयोः शुक्लवर्णसुरभिगन्धमधुरसमृदुस्निग्धलघूष्णस्पर्शानां दशसागरोपमकोटाकोटिप्रमाणा स्थितिः, द्वितीययोः संहननसंस्थानयोर्द्वादश, तृतीययोः संहननसंस्थानयोश्चतुर्दश, चतुर्थयोः षोडश, वामनकीलिकयोः संस्थानसंहननयोरष्टादशकोटाकोटिप्रमाणा, आम्लरसहारिद्रवर्णयोः सार्धद्वादशसागरोपमकोटाकोटिप्रमाणा, कषायरसरक्तवर्णयोः पञ्चदश, कटुकरसनीलवर्णयोः सार्धसप्तदशसागरोपमकोटाकोटिप्रमाणा, तीर्थंकराहारकसप्तकयोरन्तःसागरोपमकोटाकोटिप्रमाणा स्थितिरिति, दर्शनद्विकं बन्धे एव नास्तीत्युक्ता स्थितिः संक्रमोत्कृष्टानाम् । तत्र बन्धोत्कृष्टानामुत्कृष्टस्थितिसंक्रम आवलिकाद्विकहीनः, तथाहि—स्थितिर्बद्धा सती बन्धावलिकायामतिक्रान्तायां सत्यामन्यत्र संक्रामति, तत्राप्युदयावलिका सकलकरणायोग्येति कृत्वा उदयावलिकोपरितनी संक्रामति, उदयावलिकामात्रमसंक्रान्तमेवावतिष्ठते, ततो बन्धोत्कृष्टानामावलिकाद्विकहीन एव उत्कृष्टस्थितिसंक्रमः, तदुक्तं—"तीसासत्तरिचत्तालीसावीसुदहिकोडिकोडीणं । जेट्ठो आवलिदुगहा" इति । ज्ञानावरणपञ्चकदर्शनावरणनवकासातवेदनीयान्तरायपञ्चकरूपाणां विंशतेरावलिकाद्विकहीनत्रिंशत्सागरोपमकोटाकोटिप्रमाणः स्थितिसंक्रमः, तथाहि—मतिज्ञानावरणीयस्योत्कृष्टां स्थितिं बध्वा आवलिका-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तिक्रान्तायां सत्यामुदयावलिकात उपरितनीं सर्वां बध्यमानासु श्रुतज्ञानावरणीयादिषु संक्रामति, एवं सर्वत्र बन्धोत्कृष्टास्वावलिकाद्विकहीनत्वं परिभावनीयमिति । षोडशकषायाणामावलिकाद्विकहीनचत्वारिंशत्सागरोपमकोटाकोटीप्रमाणः स्थितिसंक्रमः । आयुषामन्यप्रकृतिनयनलक्षणः संक्रम एव न भवति । यद्यपि बन्धोत्कृष्टासु सर्वत्रावलिकाद्विकहीनत्वमुक्तं तथापि मिथ्यात्वस्य सप्ततिसागरोपमकोटाकोटिस्थितिसंक्रमोऽन्तर्मुहूर्त्तोनो द्रष्टव्यः, तथा हि–मिथ्यात्वस्योत्कृष्टां स्थितिं बध्वा जघन्यतोऽप्यन्तर्मुहूर्तं मिथ्यात्व एव तिष्ठति, ततः सम्यक्त्वं प्रतिपद्य मिथ्यात्वस्यान्तर्मुहूर्त्तोनां सम्यक्त्वे मिश्रे च संक्रमयति, तदुक्तं पञ्चसङ्ग्रहमूलवृत्तौ—"वेदकसम्यग्दृष्टिर्मिथ्यात्वं गत्वा तस्य मिथ्यात्वस्योत्कृष्टस्थितिं च कृत्वा ततो विशुध्यमानपरिणामोऽन्तर्मुहूर्ते व्यतीते सम्यक्त्वं प्रतिपन्नः, ततः सम्यग्दृष्टिः सम्यक्त्वसम्यग्मिथ्यात्वयोर्मिथ्यात्वस्थितिमन्तर्मुहूर्त्तोनसप्ततिकोटाकोटिं प्रमाणां संक्रमयतीति" । ननूत्कृष्टस्थितिबन्धेऽबाधाकालस्याप्युत्कृष्टत्वेनाबाधाकाले दलिकनिक्षेपाभावात् नोदयः, उदयाभावे च कथमुदयावलिकावर्जनं युक्तमिति चेत्? न, अबाधाकालेऽपि प्राग्बद्धदलिकस्यानुभवात्, तदुक्तं पञ्चसङ्ग्रहमूलटीकायाम्–"यत उत्कृष्टस्थितिबन्धकस्य यद्बाधागतं दलं तदनुभूयते प्राग्बद्धमिति कृत्वा विद्यमानतया तदस्त्येव" इति । नन्वनुदयबन्धोत्कृष्टानां कथमुदयावलिकावर्जनं युक्तं तासामुदयाभावादिति चेत्? सत्यम्, किन्तूत्कृष्टबन्धकालेऽबाधाकालेऽपि प्राग्बद्धदलिकस्य विद्यमानत्वेन प्रदेशोदयतस्तद्वेदयति, तदुक्तं पञ्चसङ्ग्रहमूलटीकायां–"यत उत्कृष्टस्थितिबन्धकस्याबाधास्थितयः सन्ति, किन्तूदयस्थितिः स्तिवुकसंक्रमेणोदयगतासु संक्रामति" इति । अत एव उदयवतीनामनुदयवतीनां वा प्रकृतीनामुदयसमयादारभ्यावलिकामात्रा स्थितिरुदयावलिकेति पूर्वग्रन्थेषु व्यवह्रियत इत्यनेनानुदयवतीनां प्रदेशोदयावलिकापि गृहीताऽवसीयते । एवं नरकद्विकादीनां षट्पञ्चाशत्प्रकृतीनामप्यावलिकाद्विकहीनो विंशतिः सागरोपमकोटाकोटिप्रमाण उत्कृष्टस्थितिसंक्रमः । संक्रमोत्कृष्टानामुत्कृष्टस्थितिसंक्रम आवलिकात्रिकहीनः, तथाहि–बन्धावलिकायामतिक्रान्तायां सत्यामुदयावलिकां मुक्त्वा उपरितनीं सर्वामपि स्थितिमन्यत्र प्रकृत्यन्तरे आवलिकाया उपरि संक्रमयति, संक्रान्ता सती संक्रमावलिका सकलकरणायोग्येति कृत्वा तदतिक्रान्तायां सत्यामुदयावलिकात उपरितनी सर्वापि स्थितिः ततोऽप्यन्यत्र प्रकृत्यन्तरे संक्रामति, ततः संक्रमोत्कृष्टानामुत्कृष्टस्थितिसंक्रमपरिमाणमावलिकात्रिकहीनपरमस्थितिबन्धप्रमाणम्, तदुक्तं—"सेसाण वि आवलियतिगूणो" इति । एतदेव भाव्यते–असातस्योत्कृष्टां त्रिंशत्सागरोपमकोटाकोटिप्रमाणां स्थितिं बध्वा परिणामपरावर्तनेन सातं बद्धुं लग्नः, तत्रासातस्य बन्धावलिकायामतिक्रान्तायामुदयावलिकात उपरितनीं सकलामपि स्थितिं संक्रमयति, तत्र च संक्रान्ता सती संक्रमावलिका सकलकरणायोग्येति कृत्वा संक्रमावलिकातिक्रान्तायां सत्यामुदयावलिकात उपरितनीं सर्वामपि स्थितिमसातं बध्नन् तत्र संक्रमयतीत्यावलिकात्रिकहीनत्रिंशत्कोटाकोटिसागरोपमप्रमाणः सातस्य स्थितिसंक्रमः । शुभवर्णाद्येकादश[1]कनीलकटुकदेवद्विकमनुजद्विकविकलजातित्रिकाद्यपञ्चसंहननाद्यपञ्चसंस्थानप्रशस्तखगतिसूक्ष्मसाधारणापर्याप्तस्थिरादिषट्कोच्चैर्गोत्ररूपाणामेकचत्वारिंशत्प्रकृतीनामावलिकात्रि-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

कहीनविंशतिसागरोपमकोटाकोटिप्रमाणः परमस्थितिसंक्रमः । मनुजद्विकमाश्रित्य भावना क्रियते—नरकद्विकस्योत्कृष्टां विंशतिसागरोपमकोटाकोटिप्रमाणां स्थितिं बध्वा परिणामपरावर्तनेन मनुजद्विकं बद्धुं लग्नः, तत्र नरकद्विकस्य बन्धावलिकायामतिक्रान्तायामुदयावलिकात उपरितनीमावलिकाद्विकहीनां विंशतिसागरोपमकोटाकोटिप्रमाणां स्थितिं संक्रमयति, ततोऽपि परिणामपरावर्तनेन देवद्विकं बद्धुं लग्नः, तत्र संक्रमोत्कृष्टमनुजद्विकस्थितेः संक्रमावलिकायामतीतायां उदयावलिकात उपरितनीमावलिकात्रिकहीनां विंशतिसागरोपमप्रमाणां मनुजद्विकस्थितिं संक्रमयति । एवमुक्तानुसारेण शेषनाम्नामपि परिभावनीयमिति । नवनोकषायाणां चत्वारिंशत्सागरोपमकोटाकोटिप्रमाण आवलिकात्रिकहीनः परमस्थितिसंक्रमो वेदितव्यः । आहारकसप्तकस्य जिननाम्नश्चोत्कृष्टः स्थितिबन्धोऽन्तःसागरोपमकोटाकोटिप्रमाणस्तस्मात् संख्येयगुणस्तस्य स्थितिसंक्रमः, तदुक्तं कर्मप्रकृतिचूर्णौ—"बन्धट्ठिईओ संतकम्मट्ठिई संखेज्जगुणा" इति । ननु नामकर्मण उत्कृष्टतो विंशतिसागरोपमकोटाकोटिप्रमाणा स्थितिः, अत आहारकसप्तके जिननाम्नि च संक्रमात् बन्धावलिकोदयावलिकारहिता विंशतिसागरोपमकोटाकोटिप्रमाणैवोत्कृष्टास्थितिर्लभ्यते, कथमुच्यते संक्रमतोऽप्यन्तःसागरोपमकोटाकोटिप्रमाणेति? उच्यते, जिननाम्नो विशुद्धसम्यग्दृष्टेराहारकसप्तकस्य च विशुद्धसंयमवतां बन्धकत्वेन तेषामायुर्वर्जसप्तकर्मणामन्तःसागरोपमकोटाकोटिप्रमाणस्यैव सत्कर्मत्वात्, तदुक्तं पञ्चसङ्ग्रहे—"तित्थयराहाराणं संकमणे बन्धसन्तएसुं पि । अंतोकोडाकोडी तहावि ता संकमुक्कोसा ॥ १ ॥ एवइयसंतया जं सम्मदिट्ठीण सव्वकम्मेसु" इति । 'एवइय संतय'त्ति एतावत्येवान्तःसागरोपमकोटाकोटीप्रमाणा सत्तेति । सातवेदनीयस्यावलिकात्रिकहीनत्रिंशत्सागरोपमकोटाकोटिप्रमाण उत्कृष्टस्थितिसंक्रमः, भावनाऽसातवेदनीयवत्कर्त्तव्या । उक्तं बन्धे सति यासां संक्रमादुत्कृष्टास्थितिः तासामुत्कृष्टसंक्रमपरिमाणम् ।

अथ बन्धाभावेऽपि यासां संक्रमादेव केवलादुत्कृष्टा स्थितिः तासामुत्कृष्टस्थितिसंक्रमः प्रतिपाद्यते, तथाहि—दर्शनमोहनीयत्रयसत्कर्मा मिथ्यादृष्टिरुत्कृष्टसंक्लेशे वर्तमानो मिथ्यात्वस्योत्कृष्टां स्थितिं बध्वा तत्रैवान्तर्मुहूर्तमवतिष्ठते, ततः सम्यक्त्वं प्रतिपद्य मिथ्यात्वस्थितिमन्तर्मुहूर्तोनां सकलामपि सम्यक्त्वे सम्यग्मिथ्यात्वे च संक्रामति, ततो मिश्रस्य संक्रमावलिकामतिक्रम्योदयावलिकात उपरितनीं सकलामपि स्थितिं सम्यक्त्वे संक्रमयति, अपवर्तनाकरणेन च स्वस्थानेऽपि संक्रमयति, सम्यक्त्वस्यापवर्तनाकरणेन स्वस्थान एव संक्रामति, तदेवं मिथ्यात्वसत्कमन्तर्मुहूर्तं संक्रमोदयावलिकाद्विकसहितं सप्ततिमध्यादूनं सम्यक्त्वमिश्रयोर्द्रष्टव्यमिति । ननु दर्शनत्रयसत्कर्मा मिथ्यादृष्टिः स एव भवति यः पूर्वं सम्यग्दृष्टिर्भूत्वा प्रतिपतितः, तस्य चोत्कृष्टः स्थितिबन्ध एव न संभवति, "बंधेण न वोलइ" इत्यनेन भिन्नग्रन्थिकस्य प्रतिपतितस्य मिथ्यादृष्टेरपि अन्तः कोटाकोट्यधिकबन्धस्य प्रतिषेधात्, ततः सर्वमिदं निर्मूलमिति चेत्? न, "बंधेण न वोलइ" इति सिद्धान्तमतत्वात्, कार्मग्रन्थिकैः प्रतिपतितस्यापि मिथ्यादृष्टेरुत्कृष्टस्थितिबन्धस्याप्यभ्युपगमात्, तस्य तथाविधरसाभावेनैव विशेषसमर्थनादिति न कश्चिद्दोषः । ननु तथापि सम्यग्दृष्टेरुत्कृष्टतोऽप्य-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

न्तःसागरोपमकोटाकोटिप्रमाणमेव सत्कर्म विद्यते नाधिकं, ततः कथं सम्यग्दृष्टेरन्तर्मुहूर्तोनसप्ततिसागरोपमकोटाकोटिप्रमाणस्थितिसंक्रमो भवतीति चेत्? सत्यं, किन्त्वनाभोगेन सम्यक्त्वाच्च्युतो मिथ्यादृष्टिः पुनः करणत्रिकमकृत्वा सम्यक्त्वं प्रतिपद्यते, तस्य कियत्कालमुत्कृष्टस्थितिसत्कर्म संभाव्यते, तत्त्वं तु तद्विदो विदन्ति । ननु बन्धसंक्रमौ समकं भवतोऽतः साधारणा एकावलिका भवति, न भिन्ना, तस्मात् संक्रमोत्कृष्टानां प्रकृतीनामप्यावलिकाद्विकहीनोत्कृष्टस्थितिसंक्रमः प्राप्नोति, नावलिकात्रिकहीन इति चेत्? न, उभयोरपि भिन्नकालत्वात्, तथाहि–पूर्वं बन्धोत्कृष्टायाः प्रकृतेरुत्कृष्टां स्थितिं बध्नाति, बन्धावलिकागतं च सकलकरणायोग्यमिति कृत्वा बन्धावलिकायामतिक्रान्तायां सत्यामुदयावलिकाया उपरितनं बध्यमानसङ्क्रमोत्कृष्टायां प्रकृतौ बन्धोत्कृष्टासत्कं दलिकं सङ्क्रमयति, ततो जाता उत्कृष्टस्थितिका सङ्क्रमोत्कृष्टा प्रकृतिः, सङ्क्रमावलिकागतमपि सकलकरणायोग्यमिति कृत्वा सङ्क्रमावलिकायामतिक्रान्तायां सत्यां बध्यमानायां प्रकृतौ उदयावलिकात उपरितनीं सकलामपि सङ्क्रमोत्कृष्टां स्थितिं सङ्क्रामतीत्यतो भिन्नकालत्वं सुस्पष्टम्। यदि बन्धोत्कृष्टसत्का संक्रमावलिका संक्रमोत्कृष्टसत्का च बन्धावलिका गृहीता स्यात्तदा समानकालत्वं स्यात् । ननु नरकगतिर्बन्धोत्कृष्टा प्रकृतिरावलिकाद्विकहीना सर्वाऽपि मनुजगतौ संक्रामति, ततो मनुजगतिश्चावलिकात्रिकहीनाऽन्यत्र संक्रामतीत्युभयमीलने पञ्चावलिकाहीन उत्कृष्टस्थितिसङ्क्रमो भवतीति कथमुच्यते सङ्क्रमोत्कृष्टानामावलिकात्रिकहीना उत्कृष्टा स्थितिरिति चेत्? न, नरकगतिसत्कोदयावलिका सङ्क्रमावलिका च मनुजगतिसत्का बन्धावलिका च इति त्रयाणामेककालत्वान्न दोषः । यत्तु पञ्चसङ्ग्रहमूलवृत्तौ–"नरकद्विकस्य बन्धोत्कृष्टस्य या बद्धा उत्कृष्टास्थितिः सा बन्धावलिकाहीना मिथ्यादृष्टिर्मनुजद्विकं बध्नानो मनुजद्विके संक्रमयति, ततः स एव देवद्विकं बध्नानः संक्रमोत्कृष्टान्मनुजद्विकात्संक्रमावलिकारहितामुदयावलिकारहितां च तां बन्धावलिकारहितां संक्रान्तस्थितिं देवद्विके संक्रमयती"त्युक्तं, तत्र बन्धोत्कृष्टाया उदयावलिकाहीनत्वं नोक्तमन्यत्र च सर्वत्रोक्तं तदपि न विरोधावहं, यतो नरकद्विकस्य सङ्क्रमावलिकाया उदयावलिकायाश्चैककालीनत्वेन सङ्क्रमावलिकाग्रहणेनैव गृहीता द्रष्टव्येति । ननु पञ्चसङ्ग्रहमूलवृत्तिमन्तरेण सर्वत्र नरकद्विकस्योत्कृष्टस्थितिसङ्क्रमो बन्धोदयावलिकाद्विकहीन इत्युक्त्वा ततः मनुजद्विकस्यापि सङ्क्रमोदयावलिकाद्विकहीनत्वमुक्तं, तथा च तद्ग्रन्थः–"ततो संकमावलियाए उदयावलिए मोत्तुणं उवरिल्ला ठिति संकमति" इति चेत्? सत्यं, केवलं नरकद्विकस्य बन्धोत्कृष्टत्वपरिज्ञापनार्थमुदयावलिका पृथक् गृहीता, कालस्तु नरकद्विकोदयावलिकायाः सङ्क्रमावलिकायाश्चाभिन्न एव, पृथक् कल्प्यमाने तु "तिआवलिऊणं संकमुक्कोसट्ठितिपरिमाणं" इत्यनेन विरोधापत्तेः, पञ्चसङ्ग्रहमूलवृत्तावपि तदेवाभिप्रायः, नरकद्विकस्योदयावलिकाहीनत्वाकल्प्यमाने "बन्धुक्कोसाण ठिईं मोत्तुं दो आवली उ संकमइ" इत्यनेन मूलेन सह तत्रैव विरोधः स्यात् । ननु तर्हि नरकद्विकस्योदयावलिकाहीनत्वकल्प्यमाने उत्कृष्टस्थित्युदीरणास्वामित्वाधिकारेऽनुदयसङ्क्रमोत्कृष्टस्य देवगतेर्मनुजानुपूर्व्याश्च स्थितेः कर्मप्रकृतिवृत्तिद्वये आवलिकामात्रहीनविंशतिसागरोपमकोटाकोटिप्रमाणत्वमुक्तं तत्कथं संगच्छते? तदुक्तं न्यायाचार्यैः–"देवगतेरपि विंशतिसागरोपमकोटाकोटीप्रमाणस्थितिराव-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

लिकामात्रहीना जायते" "ततो मनुष्यानुपूर्व्या अपि स्थितिरावलिकामात्रहीनविंशतिसागरोपमकोटाकोटीप्रमाणा जाता", एवमेव श्रीमलयगिरिकृतकर्म्मप्रकृतिवृत्तौ पञ्चसङ्ग्रहबृहद्वृत्तौ चाप्युक्तं, कर्मप्रकृतिचूर्णौ "एतासिं ठ्ठिति वीसं सागरोपमकोडाकोडीतो आवलि ऊणं संकमे लब्भइ" इति च, अत्र "एतासिं"ति तत्र प्रागुक्तानामनुदयसङ्क्रमोत्कृष्टानामित्यर्थ इति चेत्? अत्रोच्यते—देवगतिप्रदेशोदयसत्कोदयावलिका युता एतावत्प्रमाणैव स्थितिर्भवति, न नरकद्विकस्योदयावलिकासङ्क्रमेणैतावत्प्रमाणा भवति, नरकद्विकस्योदयावलिकाया अपि संक्रमे कल्प्यमाने तत्रैव "नरकगतेरुत्कृष्टां स्थितिं विंशतिसागरोपमकोटाकोटीप्रमाणां बद्ध्वा ततः शुभपरिणामविशेषभावतो देवगतेरुत्कृष्टां स्थितिं दशसागरोपमकोटाकोटीप्रमाणां बद्धुमारभते, ततस्तस्यां देवगतिस्थितौ बध्यमानाया आवलिकाया उपरि बन्धावलिकाहीनामावलिकात[1] उपरितनीं सर्वामपि नरकगतिस्थितिं संक्रमयति" इत्युक्तस्य विरोधः स्यात्। ननु "बन्धुक्कोसाण ठ्ठिई मोत्तुं दो आवली उ संकमइ" इत्यत्रोदयबन्धोत्कृष्टानां वाच्यम्, अनुदयबन्धोत्कृष्टानां त्वावलिकां मुक्त्वेति चेत्? न, सर्वासां सङ्क्रमोत्कृष्टानामुत्कृष्टसंक्रमकाले आवलिकाद्विकहीनत्वस्य सर्वस्थितेरुक्तत्वात्, किञ्चैवं सङ्क्रमकाले देवगतेः सर्वास्थितिः सम्पूर्णा विंशतिसागरोपमकोटाकोटीप्रमाणा स्यात्, तथा हि—नरकगतिसत्काऽऽवलिकाहीना विंशतिसागरोपमकोटाकोटिप्रमाणा सङ्क्रमेण प्राप्ता स्वोदयावलिका च, उभयमीलने सम्पूर्णा विंशतिसागरोपमकोटाकोटीप्रमाणा, न चैतावन्मात्रा सर्वास्थितिः सङ्क्रमकाले उक्ता, नापि सत्ताधिकारे एतत्प्रमाणा उत्कृष्टा सत्ताप्युक्ता, किन्तु स्वरूपापेक्षया समयाधिकावलिकोनविंशतिसागरोपमकोटाकोटिप्रमाणा, तदुक्तं कर्मप्रकृतिवृत्तौ, तथाहि—"कश्चिन्मनुष्य उत्कृष्टसंक्लेशवशादुत्कृष्टां नरकगतिस्थितिं बध्वा परिणामपरावर्तनेन देवगतिं बद्धुमारब्धवान्। तस्यां च देवगतौ बध्यमानायामावलिकाया उपरि नरकस्थितिं बन्धावलिकातीतां उदयावलिकाया उपरितनीं सकलामपि विंशतिसागरोपमकोटाकोटीप्रमाणां संक्रमयति। प्रथमा च स्थितिः समयमात्रा देवगतेः सत्का मनुजगतौ वेद्यमानायां स्तिबुकसंक्रमेण संक्रामति। ततस्तया समयमात्रया स्थित्या ऊन आवलिकयाऽभ्यधिक आवलिकाद्विकहीनोत्कृष्टस्थितिसमागमो देवगतेरुत्कृष्टं स्थितिसत्कर्म। एवं द्वित्रिचतुरिन्द्रियजात्याहारकसप्तकमनुजानुपूर्वीदेवानुपूर्वीसूक्ष्मापर्याप्तसाधारणतीर्थकराख्यानामपि षोडशप्रकृतीनां यथोक्तमानमुत्कृष्टं स्थितिसत्कर्म भावनीयम्। सम्यग्मिथ्यात्वस्य पुनरन्तर्मुहूर्तोन उत्कृष्टस्थितिसमागम आवलिकयाभ्यधिकसमयोन उत्कृष्टं स्थितिसत्कर्म वाच्यम्। तच्च सम्यक्त्वोक्तभावनानुसारेण भावनीयम्" इति, ततो नरकद्विकस्यावश्यमेव बन्धावलिकोदयावलिकाहीनत्वं कल्पनीयमिति।

अथ सङ्क्रमकाले बन्धोत्कृष्टानां संक्रमोत्कृष्टानां वा प्रकृतीनां यावती स्थितिः प्राप्यते सोच्यते—तत्र ज्ञानावरणपञ्चकं दर्शनावरणनवकमसातवेदनीयमन्तरायपञ्चकमिति विंशतिप्रकृतीनामावलिकाहीनत्रिंशत्सागरोपमकोटाकोटिप्रमाणा सङ्क्रमकाले सर्वा स्थितिः, तथाहि—संक्लेशादिकरणवशात उत्कृष्टां स्थितिं बध्वा बन्धावलिकायामतिक्रान्तायामुदयावलिकात उपरितनी सर्वा स्थितिः सङ्क्रमयितुमारभ्यते, ततः सङ्क्रमप्रथमसमये उदयावलिकासहिता

१ उदयावलिकातः।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

बन्धावलिकारहिता सर्वा स्थितिरवाप्यते । नीचैर्गोत्रयुतानां नाम्नः पञ्चपञ्चाशत्प्रकृतीनां बन्धावलिकाहीना उदयावलिकायुता विंशतिसागरोपमकोटाकोटिप्रमाणा सर्वा स्थितिः प्राप्यते । आयुषामबाधया युता स्वस्वोत्कृष्टा स्थितिर्बन्धावलिकाहीना सर्वा स्थितिरुद्वर्तनारूपसङ्क्रमकालेऽपवर्तनारूपसङ्क्रमकाले वा सर्वा स्थितिरवाप्यते, तथाहि—यद्यपि स्थितिसङ्क्रमस्त्रिविध उक्तः तथाप्यायुषामुद्वर्तनापवर्तनरूपद्विविधः सङ्क्रमो भवति, प्रकृत्यन्तरनयनस्य निषेधात्, उद्वर्तनापि द्विधा—व्याघातभाविनी, निर्व्याघातभाविनी च, एवमपवर्तनापि । उद्वर्तनापवर्तनयोर्निखिलस्वरूपमग्रे न्यक्षेण प्रतिपादयिष्यामः । इहायुषो व्याघातभाविन्यपवर्तना नियमादुदये सति प्रवर्तते, ततो न तामधिकृत्येह सर्वा स्थितिः प्रतिपाद्यते, प्रवचने श्रीनेमिजिनस्य मुनिगणवन्दनेन कृष्णवासुदेवस्य पूर्वबद्धसप्तमनरकायुषस्तृतीयनरकायुःकरणरूपा अपवर्त्तना अनुदयेऽप्युक्ता, सा प्रायोवृत्त्या संभवेत्, यदि वा तदभिप्रायः श्रीबहुश्रुतगम्यः । या तु निर्व्याघातभाविन्यपवर्तना सा उदयेऽनुदये वा बन्धावलिकायामतिक्रान्तायां सत्यां सर्वदा प्रवर्तते । उद्वर्तना तु बन्धे प्रवर्तमान एव प्रथमसमयबद्धलतानां बन्धावलिकातिक्रान्तायां सत्यां भवति, ततो निर्व्याघातभाव्यपवर्तनारूपे उद्वर्तनारूपे च स्वस्थानसंक्रमे आयुषः सर्वास्थितिः बन्धावलिकारहिताऽबाधायुता प्राप्यत इति । बन्धोत्कृष्टासु मिथ्यात्वं विहाय सर्वासु प्रकृतिषु बन्धावलिकोना उत्कृष्टा बन्धस्थितिः सर्वा स्थितिः संक्रमकाले द्रष्टव्या, तदुक्तं—"बन्धुक्कस्साण आवलिगूणा ठिई जट्ठिई" इति । 'जट्ठिइ'त्ति संक्रमकाले या स्थितिर्विद्यते सा यत्स्थितिः सर्वा स्थितिरित्यर्थः । कषायाणां बन्धावलिकाहीनोदयावलिकायुता चत्वारिंशत्सागरोपमकोटाकोटी प्रमाणा सर्वा स्थितिः । मिथ्यात्वस्यान्तमुहूर्तोनः सप्ततिसागरोपमकोटाकोटीप्रमाणा सर्वा स्थितिरिति । संक्रमोत्कृष्टानां त्वावलिकाद्विकहीना सर्वा स्थितिः संक्रमकाले प्राप्यते, यतो बन्धावलिकासंक्रमावलिकयोरतीतयोरुदयावलिकात उपरितनी सर्वा स्थितिरन्यत्र संक्रम्यत इति, तथा हि—सातवेदनीयस्यावलिकाद्विकोनत्रिंशत्सागरोपमकोटाकोटिप्रमाणा संक्रमकाले सर्वा स्थितिः, नवानां नोकषायाणामावलिकाद्विकोनचत्वारिंशत्सागरोपमकोटाकोटिप्रमाणा संक्रमकाले सर्वा स्थितिः, आहारकसप्तकजिननाम्नोरांवलिकाद्विकोनान्तःसागरोपमकोटाकोटिप्रमाणा सर्वास्थितिः संक्रमकाले प्राप्यते । शुभवर्णाद्येकादशकनीलकटुकदेवद्विकमनुजद्विकविकलजातिप्रशस्तविहायोगतिसूक्ष्मत्रिकांत्यवर्ज्यसंहननसंस्थानदशकस्थिरषट्कोच्चैर्गोत्ररूपाणामेकचत्वारिंशत्प्रकृतीनामावलिकाद्विकोनविंशतिसागरोपमकोटाकोटिप्रमाणा सर्वास्थितिः संक्रमकालेऽवाप्यते । सम्यक्त्वमिश्रयोः संक्रमावलिकायुतान्तर्मुहूर्तोनसप्ततिसागरोपमकोटाकोटिप्रमाणा सर्वास्थितिः, तथा हि—अष्टाविंशतिसत्कर्मा मिथ्यात्वस्योत्कृष्टां स्थितिं बद्ध्वान्तर्मुहूर्तं तत्रैव स्थित्वा सम्यक्त्वं प्रतिपद्यते तत्समयादारभ्यान्तर्मुहूर्तोनां सप्ततिसागरोपमकोटाकोटिप्रमाणां स्थितिं सम्यक्त्वे मिश्रे च संक्रामति, संक्रमावलिकायामतीतायामुदयावलिकात उपरितनीं सम्यक्त्वस्य सर्वां स्थितिमपवर्तनाकरणेन स्वस्थाने, मिश्रस्य सम्यक्त्वे, अपवर्त्तनाकरणेन स्वस्थाने च संक्रामति, तदानीं सर्वास्थितिः संक्रमावलिकायुतान्तर्मुहूर्तोना प्राप्यत इति ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

स्थितिसंक्रमे परप्रकृतिलतायां या संक्रम्यमाणा स्थितिः संक्रमकाले च सर्वा स्थितिः तयोः स्थापना.



अत्र या उदयावलिका सा उदयवतीनां विपाकोदयावलिका अनुदयवतीनां च प्रदेशोदयावलिका इति। अस्याः स्थापनाया अनुसारेण बन्धोत्कृष्टानामावलिकाद्विकोना संक्रमस्थितिः १–२ इति अङ्कतः, संक्रमोत्कृष्टानां चावलिकात्रिकहीना संक्रमस्थितिः १–२–३ इति अङ्कतः अङ्किता। परप्रकृतिलतायां संक्रम्यमाणदलिकमुदयावलिकायां न संक्रमति इति उदयावलिकायाः सर्वत्र वर्जनं कृतम्।

(उदीरणापवर्त्तनयोरेवोदयावलिकासु दलिकप्रक्षेपः स्यान्नान्यत्र)

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ननूदयबन्धोत्कृष्टादिसंज्ञाचतुष्काधिकारे बन्धोत्कृष्टानां प्रकृतीनां पादोनं शतं, संक्रमोत्कृष्टाः प्रकृतयः त्रिचत्वारिंशत्; उत्कृष्टस्थितिसत्कर्मस्वामित्वाधिकारे बन्धोत्कृष्टानां प्रकृतीनां षडधिकशतं, संक्रमोत्कृष्टाः प्रकृतयः अष्टचत्वारिंशत्; संक्रमाधिकारे बन्धोत्कृष्टाः सप्तनवतिः, संक्रमोत्कृष्टा एकषष्टिरिति पञ्चसङ्ग्रहवृत्तिद्वये कर्मप्रकृतिवृत्तिद्वये च । कर्मप्रकृतिचूर्णौ तु संक्रमाधिकारे संक्रमोत्कृष्टाः प्रकृतयोऽष्टचत्वारिंशत्, शेषाः बन्धोत्कृष्टाः; उत्कृष्टस्थितिसत्कर्मस्वामित्वाधिकारे बन्धोत्कृष्टानां प्रकृतीनां षडधिकं शतं, संक्रमोत्कृष्टाः प्रकृतय अष्टचत्वारिंशदिति कथं न विरोध इति चेत्? न, अभिप्रायापरिज्ञानात्, तथा हि—उदयबन्धोत्कृष्टादिसंज्ञाचतुष्काधिकारे बन्धोदयापेक्षया द्वाविंशत्यधिकं प्रकृतीनां शतं गृहीतं, तत्राप्यायुषां परस्परसंक्रमाभावात् प्रयोजनाभावाच्च न कापि संज्ञा कृता, तदुक्तं—"आयुषां तु नान्योऽन्यं संक्रमो, नापि बध्यमानायुर्दलिकं पूर्वबद्धायुषः उपचयायालम् । ततस्तिर्यग्मनुष्यायुषोरुत्कृष्टा स्थितिर्न कथमपीति तेऽनुदयबन्धोत्कृष्टादिसंज्ञाचतुष्टयातीते, देवनरकायुषी त्वनुदयबन्धोत्कृष्टेऽपि प्रयोजनाभावात् पूर्वाचार्यैः संज्ञाचतुष्टयातीते विवक्षिते" इति । उत्कृष्टस्थितिसत्कर्माधिकारे तु न केनाप्यायुश्चतुष्कं गृहीतं, ननु तर्हि संक्रमाधिकारे सर्वैरपि बन्धोत्कृष्टा संज्ञाऽऽयुषां कृतेति कथं न विरोधः? सत्यं, सत्त्वाधिकारे प्रयोजनाभावात्, अत्र तूद्वर्तनापवर्तनसंक्रमसंभवेन सप्रयोजना, तदुक्तं पञ्चसंग्रहमूलवृत्तौ—"आह तृतीयद्वारे आयुष्काणि चतसृणामपि संज्ञानां बाह्यानि कृतान्यत्र तु बन्धोत्कृष्टान्युक्तान्येवं विरोधः; अत्रोच्यते—सदधिकारं प्रकृत्यन्तरसंक्रमं चाङ्गीकृत्य संज्ञाकरणं व्यर्थमिति तत्र न कृतं, अत्र तु उद्वर्तनापवर्तनाधिकारे सार्थकत्वात् कृतमिति न दोषः" इति । चूर्णिकृदन्तरेण सर्वैरपि संक्रमाधिकारे पञ्चसंग्रहकाराभिप्रायः स्वीकृतः, अत एव संक्रमोत्कृष्टासु अष्टचत्वारिंशदुक्ताः प्रकृतयः । ननूभयोः को भेदः? श्रूयतां पञ्चसंग्रहकृद्भिर्वर्णादिविंशतिप्रकृतीनां बन्धस्थितिः पृथगुक्ता, बन्धनानि च पञ्चाभिप्रेतानि, शिवशर्मसूरिपादैः सामान्येन वर्णादीनां विंशतिसागरोपमकोटाकोटिप्रमाणा स्थितिरुक्ता, बन्धनानि च पञ्चदश स्वीकृतानीति विशेषः । ननु किमिदं प्रकृतीनां संज्ञा चतुष्कमिति चेत्? उच्यते—तत्र विपाकोदये प्रवर्तमाने सति संक्रमत एवोत्कृष्टा स्थितिर्यासामुत्तरप्रकृतीनां समुपलभ्यते, न बन्धतः, ता उदयसंक्रमोत्कृष्टाः, ताश्चेमाः—मनुजगतिः, सातवेदनीयं, सम्यक्त्वं, स्थिरादिषट्कं, हास्यादिषट्कं, वेदत्रिकं, प्रशस्तविहायोगतिः, आद्यानि पञ्च संहननानि, पञ्च संस्थानानि, उच्चैर्गोत्रमिति त्रिंशत् । उदयप्राप्तानामेतासां प्रकृतीनां या प्रतिपक्षीभूता नरकगत्यादयः प्रकृतयस्तासामुत्कृष्टां स्थितिं बद्ध्वा पुनस्ता एव बद्धुं लग्नः, तत्र प्राग्बद्धविपक्षप्रकृतीनां दलिकं संक्रमयति, शुभप्रकृतीनां प्रायः स्वबन्धतः स्थितिः स्तोकैव भवतीति संक्रमतः एतासामुत्कृष्टा स्थितिरवाप्यते, तथा हि—सातं वेदयमानोऽसातोत्कृष्टां स्थितिं बध्वा पुनः सातं बद्धुं लग्नः, तत्रासातस्य बन्धावलिकातिक्रान्तायामुदयावलिकात उपरितनीं सर्वां संक्रामति, तदोत्कृष्टस्थितिका भवति साता, एवमन्यासामपि प्रकृतीनां वाच्यम् । यासामुत्तरप्रकृतीनामुदयाभावे एव संक्रमत उत्कृष्टा स्थितिः प्राप्यते ता अनुदयसंक्रमोत्कृष्टाः, ताश्च मनुजा-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

नुपूर्वीमिश्र[1]आहारकद्विक[2]देवद्विक[2]विकलत्रिक[3]सूक्ष्मत्रिक[3]जिननाम[1]लक्षणास्त्रयोदश । एतासां तु स्वबन्धत उत्कृष्टा स्थितिर्न लभ्यते, किन्तु संक्रमतः, संक्रमतोऽपि तदोत्कृष्टा स्थितिर्भवति यदैतत्प्रतिपक्षप्रकृतीनामुत्कृष्टां स्थितिं बध्वा तदुत्तरकालमेतासु बध्यमानासु तद्दलिकं संक्रमयति । विपक्षप्रकृतीनां तु प्रायः उत्कृष्टस्थितिबन्धको मिथ्यादृष्ट्यादिमनुष्यः, न चैतासां तदानीमुदयोऽस्तीत्यनुदयसंक्रमोत्कृष्टाः, तथा हि–उत्कृष्टसंक्लेशे वर्तमानो मिथ्यादृष्टिर्नरकद्विकस्योत्कृष्टां स्थितिं बध्वा पुनः परिणामपरावर्तनेन देवद्विकं बद्धुं लग्नः, तत्र नरकद्विकस्य बन्धावलिकायामतिक्रान्तायामुदयावलिकात उपरितनीं सर्वामपि स्थितिं संक्रमयति, तदा देवद्विकस्योत्कृष्टा स्थितिर्भवति, एवमन्यासामपि भावनीयमिति । उदयबन्धोत्कृष्टा अनुदयबन्धोत्कृष्टा प्राग्वर्णिताः । आयुषां संक्रमाभावे कारणं प्रागुक्तमेवेति । उक्तमुत्कृष्टस्थितिसंक्रमपरिमाणम् ।

उत्कृष्टसंक्रमस्थितेर्यत्स्थितेश्च प्रमाणम्

प्रकृतिषु	संक्रमस्थितिप्रमाणं	यत्स्थितेः प्रमाणं
मिथ्यात्ववर्जबन्धोत्कृष्टानां	आवलिकाद्विकहीनं	एकाव० हीनं
संक्रमोत्कृष्टानां	आवलिकात्रिकहीनं	आव० द्विकहीनं
मिथ्यात्वस्य	अन्तर्मु० हीनं ७० सा० को० को०	अन्तर्मु० हीनं ७० सा० को० को०
सम्यक्त्वमिश्रयोः	आवलिकाद्विकाविकान्तर्मुं०हीन ७० सा०को०	सावलिकान्तर्मु० ही० ७० सा० को०

अथ जघन्यस्थितिसंक्रमपरिमाणमुच्यते–जघन्यस्थितिसंक्रमो द्विविधः–स्वप्रकृतौ परप्रकृतौ च । उभयत्राप्युदयावलिकायां योऽन्तिमप्रक्षेपः स जघन्यस्थितिसंक्रमः, तेनोदयावलिकाया बहिर्भागेऽपि यः प्रक्षेपः स जघन्यस्थितिसंक्रमो न भवतीति सिद्धम् । एतल्लक्षणं निद्राद्विकव्यतिरेकेण वाच्यं, निद्राद्विकस्य तु तृतीयावलिकाऽसंख्येयभागाधिकावलिकाद्विकस्योपरितनी समयमात्रा स्थितिः स्वसंक्रमान्तेऽधस्तन्या आवलिकायाः समयाधिके त्रिभागे निक्षिप्यते, तदा जघन्यस्थितिसंक्रमो भवति, न तु मतिज्ञानावरणादीनामिव समयाधिकावलिकाशेषायामिति । अत्र वस्तुस्वभावमन्तरेण नान्यो हेतुः संभाव्यते, संक्रमकाले सर्वा स्थितिरसंख्येयभागाधिकावलिकाद्विकप्रमाणा, तदुक्तं–"निद्दादुगस्स एगा आवलियदुगं असंखभागो अ" इति । ज्ञानावरणपञ्च[5]कान्तरायपञ्च[5]कदर्शनावरणचतुष्[4]कान्तिमलोभ[1]सम्यक्त्व[1]आयुश्चतुष्[4]करूपाणां विंशतिप्रकृतीनां स्वस्वसत्ताव्यवच्छेदसमये समयाधिकावलिकाशेषायां स्थितौ उदयावलिका सकलकरणायोग्येति कृत्वा तस्या अपवर्तना न भवतीति उदयावलिकाया उपरितनी समयमात्रा स्थितिः समयाधिकोदयावलिकात्रिभागेऽपवर्तनासंक्रमेण संक्रामति, एषः समयमात्रो जघन्यस्थितिसंक्रमः, सर्वा स्थितिः समयाधिकावलिकामात्रेति । हास्यरत्यरतिशोकभयजुगुप्सारूपस्य हास्यषट्कस्य क्षपकोऽपवर्तनाकरणेन संख्येयवर्षप्रमाणां स्थितिं करोति, ततस्तस्यां स्वनिर्लेपनावसरे संज्वलनक्रोधरूपे परप्रकृतौ प्रक्षिप्यमाणायां जघन्यस्थितिसंक्रमो भवति, अस्याश्च संख्येयवर्षप्रमाणायाः स्थितेरपवर्तनाकरणेनापवर्त्य संज्वलनक्रोधस्योदयावलिकायां प्रक्षेपो वाच्यः, अन्यथा स्थितेः प्रभू-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तत्त्वेनोदयावलिकाया बहिर्भागेऽपि प्रक्षेपः स्यात् । तथा च सति 'अन्यप्रकृतेरुदयावलिकायां योऽन्तिमः प्रक्षेपः स जघन्यस्थितिसंक्रम' इति प्रागुक्तं लक्षणं विरुद्ध्येत । संक्रमकाले सर्वास्थितिरन्तर्मुहूर्ताभ्यधिकसंख्येयवर्षप्रमाणा, तथाहि—अन्तरकरणे वर्तमानः संख्येयवर्षप्रमाणां स्थितिं संज्वलनक्रोधस्योदयावलिकायां संक्रमयति, अन्तरकरणे च हास्यषट्कस्य दलिकं न विद्यते किन्तु तत ऊर्ध्वं, ततोऽन्तरकरणसत्केनान्तर्मुहूर्तेनाभ्यधिकसंख्येयवर्षप्रमाणा जघन्यस्थितिसंक्रमकाले सर्वा स्थितिः प्राप्यत इति । पुंवेदस्य संज्वलनत्रिकस्य चाबाधोनस्वजघन्यस्थितिबन्धो जघन्यस्थितिसंक्रमः, तथाहि—पुंवेदस्याष्टौ संवत्सराणि, संज्वलनक्रोधस्य मासद्वयं, संज्वलनमानस्य मासः, संज्वलनमायायाः पञ्चदश दिनानि, आन्तर्मौहूर्त्तिकी चाबाधा, अबाधाकालहीना च कर्मस्थितिर्जघन्यस्थितिसंक्रमः । अबाधाकालहीनैव स्थितिरन्यत्र संक्रामति, तत्रैव दलस्य संभवात्, अबाधाहीनायाः कर्मस्थितेर्निषेकरूपत्वात्, न च जघन्यस्थितिसंक्रमकाले प्राग्बद्धदलिकमबाधाया मध्येऽपि विद्यते, सर्वस्य क्षीणत्वात् । ततः पुंवेदादीनामन्तर्मुहूर्तोना स्वकीया स्वकीया जघन्या स्थितिर्जघन्यस्थितिसंक्रमः, जघन्यसंक्रमकाले च सर्वा स्थितिरबाधायुक्तो जघन्यस्थितिबन्ध आवलिकाद्विकोनो द्रष्टव्यः । नन्वावलिकाद्विकोनत्वं कथमिति चेत् ? उच्यते—बन्धव्यवच्छेदानन्तरं बन्धावलिकायामतीतायां चरमसमयबद्धाः पुंवेदादिप्रकृतिलताः संक्रमयितुमारभ्यन्ते, आवलिकामात्रेण कालेन च ताः संक्रम्यन्ते, संक्रमावलिकायाश्चरमसमये च जघन्यस्थितिसंक्रमः प्राप्यते, ततो बन्धावलिकासंक्रमावलिकोनोऽबाधाकालयुतो जघन्यस्थितिबन्धः जघन्यस्थितिसंक्रमकाले सर्वा स्थितिः प्राप्यते । अत्र यद्यपि समयोनावलिकाद्विकहीना सर्वास्थितिर्जघन्यस्थितिसंक्रमकाले प्राप्यते, यतः संक्रमावलिकायाश्चरमसमये दलिकस्य संक्रम्यमाणत्वेन तत्समयोनत्वं न संभवति, अन्यथा मतिज्ञानावरणादीनामपि सर्वा स्थितिरावलिकामात्रैव प्राप्नोति न समयाधिकावलिकामात्रेति, तथापि सर्वैः पूर्वपुरुषैरावलिकाद्विकोनत्वं उक्तमतोऽत्र किमपि हेतुः स्यात् ततोऽस्माभिरपि तथैवोक्तं । जघन्यस्थितिसंक्रमस्वामित्वपर्यवसाने पुंवेदस्य—"तस्स समयूण दुआवलिय (हीणजहन्न) बन्धों सव्वजहन्नगो(गे) ट्ठितिसंकमो(मे) लब्भति" इति चूर्णावुक्तमपि । केवलं पुरुषवेदस्य पुरुषवेदारूढ एव जघन्यस्थितिसंक्रामकः, न शेषवेदारूढः, तथाहि—पुंवेदोदयेन क्षपकश्रेणीं प्रतिपन्नस्य पूर्वं हास्यादिषट्कं क्षीयते, ततः पुंवेदः, शेषवेदोदयेन प्रतिपन्नस्य तु हास्यादिषट्केन समकं पुंवेदः क्षीयते, ततः पुंवेदेन क्षपकश्रेणीं प्रतिपन्नस्य कालबाहुल्यं, किञ्च यस्य वेदस्योदयस्तस्योदीरणापि प्रवर्तते, ततः पुंवेदेन क्षपकश्रेणीमारोहतः पुंवेदस्य बही स्थितिस्त्रुट्यति, ततः पुंवेदेन क्षपकश्रेणीं प्रतिपन्नस्य पुंवेदस्य जघन्यस्थितिसंक्रमो लभ्यते, न शेषवेदारूढस्येति । मनुजद्विकदेवद्विकपञ्चेन्द्रियजात्यौदारिकसप्तकवैक्रियसप्तकाहारकसप्तकतैजससप्तकसंहननषट्कसंस्थानषट्कवर्णादिविंशतिखगतिद्विकापर्याप्तास्थिरषट्कत्रसादिदशकातपोद्योतवर्जप्रत्येकषट्करूपाणां नामकर्मणो नवतिप्रकृतीनां सातासातवेदनीयोच्चैर्गोत्रनीचैर्गोत्राणां च जघन्यस्थितिसंक्रमोऽन्तर्मुहूर्तप्रमाणः । तथाहि—एतासां सयोगिकेवलिचरमसमयेऽन्त-

संक्र० द्वि० १८

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मुहूर्त्तप्रमाणा स्थितिर्विद्यते, सा च तस्मिन्नेव समये सर्वापवर्तनयाऽपवर्त्यायोग्यवस्थासमाना क्रियतेऽयोग्यवस्थाप्यान्तर्मौहूर्तिकी, केवलमिदमन्तर्मुहूर्तं लघुतरमवसेयम्, सर्वापवर्तनयाऽपवर्त्यमाना उदयावलिकारहिता स्थितिर्जघन्यस्थितिसंक्रम, उदयावलिका च सकलकरणायोग्यत्वेनानपवर्तनीया अपवर्तनरूपजघन्यस्थितिसंक्रमकाले उदयावलिकायुता सर्वा स्थितिः। ननु क्षीणकषाये मतिज्ञानावरणादीनामिवायोगिकेवलिनि समयाधिकावलिकाशेषायां स्थितौ वर्तमानो जघन्यस्थितिसंक्रमं कथं न करोतीति चेत्? न, सूक्ष्मबादरयोगरहितत्वेनायोगिकेवलिनि करणमात्रस्याप्रवर्तनादिति। स्त्यानर्द्धित्रिकमिथ्यात्वसम्यग्मिथ्यात्वानन्तानुबन्ध्यप्रत्याख्यानप्रत्याख्यानावरणनपुंसकस्त्रीवेदनरकद्विकतिर्यग्द्विकाद्यजातिचतुष्कस्थावरसूक्ष्मातपोद्योतसाधारणरूपाणां द्वात्रिंशत्प्रकृतीनां स्वस्वक्षपणकाले यश्चरमप्रक्षेपः पल्योपमासंख्येयभागरूपः स जघन्यस्थितिसंक्रमः। जघन्यस्थितिसंक्रमकाले सर्वा स्थितिरुदयावलिकायुक्तः पल्योपमासंख्येयभागः। इयं च सर्वा स्थितिः स्त्रीनपुंसकवेदव्यतिरिच्याभिहिता द्रष्टव्या, यतः स्त्रीनपुंसकवेदवर्जानां त्रिंशत्प्रकृतीनामेकामधस्तादावलिकां मुक्त्वा शेषमुपरितनं पल्योपमासंख्येयभागमात्रं चरमखण्डमन्यत्र संक्रमयति, ततस्तासां जघन्यस्थितिसंक्रमकाले सर्वा स्थितिरावलिकायुता पल्योपमासंख्येयभागमात्रा। स्त्रीनपुंसकवेदयोरन्तरकरणे स्थितः सन् चरमस्थितिखण्डं संक्रमयति, अन्तरकरणे च कर्मदलिकं न विद्यते, किन्तु तत ऊर्ध्वम्, अन्तरकरणं चान्तर्मुहूर्त्तप्रमाणम्, ततस्तयोरन्तरकरणयुक्ता पल्योपमासंख्येयभागमात्रा सर्वा स्थितिः संभवतीत्युक्तं जघन्यस्थितिसंक्रमप्रमाणम्, जघन्यस्थितिसंक्रमकाले यत्स्थितिप्रमाणं च।

अथ काः प्रकृतयः स्वप्रकृतौ काश्च परप्रकृतौ संक्रामन्तीति स्पष्टीक्रियते—क्षीणमोहसत्का निद्राद्विकज्ञानावरणपञ्चकदर्शनावरणचतुष्कान्तरायपञ्चकरूपाः षोडशप्रकृतयः स्वप्रकृतावेव संक्रामन्ति। सयोगिचरमसमयसत्कचतुर्नवतेर्मध्याद्या उदयवत्यस्ताः स्वप्रकृतौ, यास्त्वनुदयवत्यस्ता उदयवतीषु परप्रकृतिषु संक्रामन्तीति संभाव्यते, आयुश्चतुष्टयसंज्वलनलोभसम्यक्त्वरूपाः षट् स्वप्रकृतौ इति। हास्यषट्कपुंवेदसंज्वलनत्रिकरूपा दश प्रकृतयः परप्रकृतौ, स्त्यानर्द्धित्रिकादिद्वात्रिंशत्प्रकृतयोऽपि परप्रकृतौ संक्रामति। पुंवेदस्य दलिकं जघन्यस्थितिसंक्रमकाले बध्यमानसंज्वलनक्रोधे संक्रामति, तदुक्तं—"पुंवेदमपि समयोनद्व्यावलिकारूपेण कालेन क्रोधे गुणसंक्रमेण संक्रमयन् चरमसमये सर्वसंक्रमेण संक्रमयति, एवं क्षीणपुरुषवेदः" इत्यत्र गुणसंक्रमप्रतिपादनेन बध्यमानसंज्वलनक्रोधादिके प्रक्षिपतीत्यवसीयते। अबध्यमानाशुभप्रकृतीनां दलिकस्य बध्यमानप्रकृतिषु प्रतिसमयमसंख्येयगुणवृद्ध्या प्रक्षेपणं गुणसंक्रम इति। ननूदयवतीनां पुरुषवेदादिप्रकृतीनामपि उदयावलिकासु प्रक्षेपे का क्षतिरिति चेत्? न, "चरमस्थितिखण्डमन्तर्मुहूर्तेन कालेनोत्कीर्यते, तस्य च यत्प्रदेशाग्रं

१ उदयवति संज्वलनक्रोधादावपि यावत्प्रमाणा बध्यमानायां प्रक्षिपति तावत्प्रमाणा स्थितिस्तस्मिन्नेव समये उदयसंभाव्य प्रकृत्यामपि प्रक्षिपतीति तौते, अन्यथा जघन्यस्थितिसंक्रमलक्षणस्यैव व्याहतेः, ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तदुदयावलिकागतं मुक्त्वा शेषं सर्वमपि परस्थाने प्रक्षिप्यते” इति वचनस्य विरोधापत्तेः वस्तुगत्या क्षपणकाले चरमसमये उदयाभावेनोदयवतीत्वलक्षणायोगात् न ता उदयवत्यः।

जघ० स्थि० संक्रमप्रमाणयन्त्रम्।

प्रकृतीनां	जघ० स्थि० संक्रमप्रमाणं	जघ०यत्स्थिति-प्रमाणं	कदा?
ज्ञाना० ५ दर्श० ४ विघ्न ५ सं० लोभ सम्य० ४ आयुषां	१ समयमात्रं	समयाधिकाव० १ १	समयाधिकावलिकाशेषे सत्ताविच्छेदसमये (अपवर्त्तनया)
निद्रा-प्रचलयोः	१ समयमात्रं	२ आव० आव० असं० भागाधिका	आ० असंख्येयभागाधिके आवलिकाद्विकशेषे संक्रमान्ते (अपवत्तनया) १२ मे गु०
हास्या० ६ पुंवेदस्य सं० क्रोधस्य सं० मानस्य सं० मायायाः	संख्येयवर्षाणि अवाधोन ८ वर्षा० अबाधोन २ मास० अबाधोन १ मास० अबाधोन ०॥ मास०	अन्तर्मु०अधिकसंख्येयव० २ आव०ऊन ८ वर्षे ,, २ मास० ,, १ मास० ,, ०॥ मास०	स्वसंक्रमावलिकान्त्य-समय एता दशापि परप्रकृतौ
नरक २-तिर्यं० २-कुजाति ४-स्था० सू०-साधा०-आत० उद्योत इति १३ वर्जं नाम ९० वेदनीय २ गोत्राणां २	उदयावलिकारहितं अन्तर्मुहूर्तं	उदयाव० सहान्तर्मुहूर्त्तं	सयोगिकेवलिगुणस्थानान्ते (सर्वापवर्त्तनया)
उक्तशेषाणां ३०	पल्योपमाऽसंख्येय-भागः	पल्योपमाऽसं० भाग० संक्रमाव० सहितः	स्वक्षपणकाले
स्त्री-नपुंसकयोः	पल्योपमासंख्येयभागः	अन्तरकरणरूपमन्तर्मु० अधिकपल्योपमासंख्येयभागः	,,

अथ साद्यादिप्ररूपणा क्रियते—सा मूलप्रकृतीनामुत्तरप्रकृतीनां च, तत्र ज्ञानावरणदर्शनावरणवेदनीयायुर्नामगोत्रान्तरायाणामजघन्यस्थितिसंक्रमस्त्रिविधः, तद्यथा—अनादिर्ध्रुवोऽध्रुवश्चेति। ज्ञानावरणदर्शनावरणान्तरायाणां क्षीणकषायस्य समयाधिकावलिकाशेषायां स्थितौ वर्तमानस्य जघन्यस्थितिसंक्रमो भवति, वेदनीयायुर्नामगोत्राणां सयोगिकेवलिचरमसमयेऽन्तर्मुहूर्त्तप्रमाण उदयावलिकारहितो जघन्यस्थितिसंक्रमः, स च सादिरध्रुवश्च, तस्मादन्यः सर्वोऽपि स्थितिसंक्रमोऽजघन्यः, स चानादिः, ध्रुवोऽभव्यानाम्, भव्यानामध्रुवः। ननु चतुर्णामप्यायुषां चरमोदयावलिकायाः संक्रमाभावेन साद्यध्रुव एव स्थितिसंक्रमोऽ-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

न्यत्रोक्तः, कथमुच्यतेऽत्रायुषोऽजघन्यस्थितिसंक्रमस्त्रिविध इति चेत्? सत्यम्, उत्तरप्रकृतीनां तथात्वेऽपि मूलप्रकृतेर्न बाधः, देवाद्यायुषश्चरमावलिकायाः संक्रमाभावेऽपि तत्रागामिभवायुषोऽपवर्त्तनाया विद्यमानत्वान्नात्र दोषः, एवमन्यत्रापि वाच्यम्। मोहनीयस्याजघन्यस्थितिसंक्रमश्चतुर्विधः, तद्यथा—सादिरनादिर्ध्रुवोऽध्रुवश्चेति। तत्र क्षपकस्य सूक्ष्मसम्परायगुणस्थानस्य समयाधिकावलिकाशेषायां स्थितौ वर्तमानस्य जघन्यस्थितिसंक्रमो भवति, स च सादिरध्रुवः। तस्मादन्यः सर्वोऽप्यजघन्यः, स च क्षायिकसम्यग्दृष्टेरुपशान्तमोहे न भवति, ततः प्रतिपाते सति भवतीति सादिः, तत्स्थानमप्राप्तस्यानादिः। अभव्यस्य ध्रुवः, भव्यस्याध्रुवः। अष्टानामपि कर्मणां उत्कृष्टानुत्कृष्टजघन्यरूपास्त्रयोऽपि विकल्पाः सादयोऽध्रुवाश्च भवन्ति। तथाहि—उत्कृष्टसंक्लेशे वर्तमान उत्कृष्टां स्थितिं बध्नन् उत्कृष्टं संक्रमं करोति, उत्कृष्टसंक्लेशः कदाचिदेव भवति, न तु सर्वदा, तत उत्कृष्टबन्धसंक्रमौ कदाचिदेव भवतः; ततः प्रतिपातेऽनुत्कृष्टः, तस्माद्द्वावप्येतौ साद्यध्रुवौ, जघन्यस्त्वजघन्यसंक्रमाधिकारे भावित एवेति मूलप्रकृतीनां साद्यादिप्ररूपणा कृता।

अथोत्तरप्रकृतीनां सा क्रियते। तत्र पञ्चज्ञानावरणनवदर्शनावरणवेदनीयद्विकमिथ्यात्वमोहनीयतिर्यग्द्विकौदारिकसप्तकतैजससप्तकजातिपञ्चकसंहननषट्कसंस्थानषट्कवर्णादिविंशतिखगतिद्विकत्रसादिविंशतिजिनवर्जप्रत्येकप्रकृतिसप्तकनीचैर्गोत्रान्तरायपञ्चकरूपाणां ध्रुवसत्कर्मणां पञ्चोत्तरशतप्रकृतीनां स्वस्वक्षपणपर्यवसाने जघन्यस्थितिसंक्रमो भवति। तथाहि—ज्ञानावरणान्तरायदशकदर्शनावरणचतुष्करूपाणां चतुर्दशप्रकृतीनां क्षीणकषायस्य समयाधिकावलिकाशेषायां जघन्यस्थितिसंक्रमो भवति, निद्राद्विकस्य क्षीणमोहस्य समयाधिकावलिकासंख्येयभागाभ्यधिकावलिकाद्विकशेषायां जघन्यस्थितिसंक्रमो भवति। स्त्यानर्द्धित्रिकतिर्यग्द्विकाद्यजातिचतुष्कस्थावरसूक्ष्मसाधारणातपोद्योतमिथ्यात्वरूपाणां ध्रुवसत्कर्मणां पञ्चदशप्रकृतीनां स्वस्वक्षपणकाले चरमप्रक्षेपे जघन्यस्थितिसंक्रमो भवति। वेदनीयद्विकौदारिकसप्तकतैजससप्तकपञ्चेन्द्रियजातिसंहननषट्कसंस्थानषट्कवर्णादिविंशतिखगतिद्विकत्रसदशकापर्याप्तास्थिरषट्कागुरुलघुपराघातोपघातोच्छ्वासनिर्माणनीचैर्गोत्ररूपाणां ध्रुवसत्कर्मणां चतुःसप्ततिप्रकृतीनां सयोगिकेवलिचरमसमये जघन्यस्थितिसंक्रमो भवति। स च सादिरध्रुवश्च। तस्मादन्यः सर्वोऽप्यजघन्यः स चानादिः, भव्यानामध्रुवोऽभव्यानां ध्रुवः। चारित्रमोहनीयसत्कानां पञ्चविंशतिप्रकृतीनामजघन्यस्थितिसंक्रमश्चतुर्धा, तद्यथा—सादिरनादिर्ध्रुवोऽध्रुवश्चेति। तथाहि—उपशमश्रेण्यां वर्तमानस्योपशान्तमोहस्य न भवति, ततः प्रतिपाते च भवतीति सादिः, तत्स्थानमप्राप्तस्यानादिः, ध्रुवोऽभव्यानाम्, अध्रुवो भव्यानाम्। उत्कृष्टानुत्कृष्टजघन्येषु स्थितिसंक्रमविकल्पेषु द्विप्रकारः सादिरध्रुवश्चेति। तत्र जघन्यो भावितः, उत्कृष्टानुत्कृष्टौ मूलप्रकृतिवद्वाच्यौ। नरकद्विकमनुजद्विकाहारकसप्तकवैक्रियसप्तकदेवद्विकतीर्थकरसम्यक्त्वमिश्रमोहनीयोच्चैर्गोत्रायुश्चतुष्टयरूपाणामष्टाविंशतिप्रकृतीनां चत्वारोऽपि विकल्पाः सादयोऽध्रुवाश्चेति। साद्यध्रुवता चाध्रुवसत्कर्मत्वादेवावसेयेति उक्ता साद्यादिप्ररूपणा।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मूलप्रकृतिषु स्थितिसंक्रमस्य साद्यादिभंगयन्त्रम् ।

मूलप्रकृतयः	अजघन्यः				जघन्यः				अनुत्कृष्टः				उत्कृष्टः			
	सादिः	अध्रुवः	अना०	ध्रुवः	सादिः	अध्रुवः	अना०	ध्रु०	सादिः	अध्रुवः	अना०	ध्रुवः	सादिः	अध्रु०	अना०	ध्रुवः
ज्ञाना० दर्श० अन्त०	—	जघन्यसंक्रमकाले व्यवच्छे०	भव्यस्य	अभव्यस्य	१२ मे गु० समयाधिका व०शेषे	विच्छेदभावात्	—	—	परावर्त्तमानत्वात्	परावर्त्तमानत्वात्	—	—	पराव०	पराव०	—	—
नाम–गोत्र–वेदनीय–आयु०	—	„	„	[1] „	१३ मान्ते	„	—	—	„	„	—	—	„	„	—	—
मोहनीय०	क्षायिकोपशमकस्य ११ तः प्रतिपततः	भव्यानां	साद्यप्राप्तस्य	अभ०	क्ष० १०मे	„	—	—	„	„	—	—	„	„	—	—

उत्तरप्रकृतिषु स्थितिसंक्रमस्य साद्यादिभंगयन्त्रम् ।

उत्तरप्रकृतयः	अजघन्यः				जघन्यः				अनुत्कृष्टः				उत्कृष्टः			
	सादिः	अध्रुवः	अना०	ध्रुवः	सादिः	अध्रुवः	अना०	ध्रुवः	सादिः	अध्रुवः	अना०	ध्रु०	सादिः	अध्रु०	अना०	ध्रुवः
२५ चारित्रमोहनीयानाम्	११ तः पतितस्य	भव्यानां	तत्स्थानाप्राप्तस्य	अभ०	स्वक्षयकाले	भव्यानां	—	—	उत्कृष्टेन परावर्त्तमानत्वात्	परावर्त्तमानत्वात्	—	—	अनुत्कृष्टेन परा०त्वात्	परावर्त्तमानत्वात्	—	—
२८ अध्रुवसत्ताकानां	अध्रु०सत्ताकत्वात्	अध्रु० सत्ताकत्वात्	—	—	अध्रु०सत्ताकत्वात्	अध्रुवसत्ताकत्वात्	—	—	अध्रु०सत्ताकत्वात्	अध्रुवसत्ताकत्वात्	—	—	अध्रु० सत्ता०	अध्रु० सत्ता०	—	—
१०५ उक्तशेषाणां	—	भव्यानां क्षयिष्यमाणत्वात्	जघन्यस्थानाप्राप्तस्य	अभ०	स्वक्षयसमये	भव्यानां	—	—	परावर्त्तमानत्वात्	परावर्त्तमानत्वात्	—	—	परावर्त्तमानत्वात्	परावर्त्तमानत्वात्	—	—

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अथ स्वामित्वमुच्यते—तच्च द्विधा, उत्कृष्टस्थितिसंक्रमस्वामित्वं, जघन्यस्थितिसंक्रमस्वामित्वं च। तत्रामरायुषः प्रमत्तसंयतः पूर्वकोट्यायुष्कोऽप्रमत्तभावाभिमुखः स्वायुःशेषतृतीयभागाद्यसमये उत्कृष्टां स्थितिं बद्ध्वा बन्धावलिकायाः परतो देवायुष उत्कृष्टस्थितिसंक्रमस्वामी भवति। उत्कृष्टे तिर्यङ्मनुजायुषी तत्प्रायोग्यविशुद्धो मिथ्यादृष्टिः सर्वपर्याप्तिपर्याप्तस्तिर्यङ्मनुजो वा बध्नाति, बन्धावलिकायामतिक्रान्तायां तूत्कृष्टस्थितिसंक्रमं करोतीति मिथ्यादृष्टयस्तत्प्रायोग्यविशुद्ध्या पर्याप्तास्तिर्यङ्मनुजा उत्कृष्टस्थितिसंक्रमस्वामिनो भवन्ति। ननु यदि विशुद्ध्यायुर्द्वयं बध्यते तर्हि मिथ्यादृष्टेः सास्वादनो विशुद्धतर इति स कस्मान्नैतदायुर्द्विकमुत्कृष्टस्थितिकं बध्नाति? न च तिर्यङ्मनुजायुषी सास्वादनो न बध्नातीति वाच्यम्, सप्ततिकावृत्तौ "तिर्यगायुषो बन्धो मनुजायुष उदयस्तिर्यङ्मनुजायुषी सती' एष विकल्पो मिथ्यादृष्टेः सास्वादनस्य वा, 'मनुजायुषो बन्धो मनुजायुष उदयो मनुजमनुजायुषी सती' एषोऽपि विकल्पो मिथ्यादृष्टेः सास्वादनस्य वे'त्यभिधानात्, अत्रोच्यते, सास्वादनगुणे सामान्यतो मनुजतिर्यगायुर्बन्धसंभवेऽपि प्रस्तुतायुर्द्वयमुत्कृष्टस्थितिकमसंख्येयवर्षप्रमाणं सास्वादनो न बध्नाति, तस्य गुणप्रतिपाताभिमुखत्वेन गुणाभिमुखविशुद्धमिथ्यादृष्टेः सकाशाद्विशुद्ध्याधिक्यासिद्धेः। यद्यपि देवनारकाः प्रस्तुतायुर्द्वयं बध्नन्ति, तथापि ते त्रिपल्योपमलक्षणे उत्कृष्टस्थितिके न बध्नन्ति, तस्मात्तिर्यङ्मनुजायुषोरुत्कृष्टस्थितिबन्धकाः तिर्यङ्मनुजा एव, पूर्वकोट्यायुषस्तृतीयभागाद्यसमये वर्तमानास्तत्प्रायोग्यविशुद्धाः पर्याप्ता मिथ्यादृष्टय उत्कृष्टां स्थितिं बद्ध्वा बन्धावलिकायामतीतायां तिर्यङ्मनुजायुष उत्कृष्टस्थितिसंक्रमं करोति। अपर्याप्तास्तिर्यङ्मनुजाः प्रस्तुतायुर्द्वयं बध्नन्ति, तथाप्युत्कृष्टां स्थितिं न बध्नन्ति। अतिविशुद्धमिथ्यादृष्टेः सम्यग्दृष्टेर्वा देवायुर्बन्ध एव स्यादिति पर्याप्तत्वमिथ्यादृष्टित्वतत्प्रायोग्यविशुद्धत्वमिति विशेषणत्रिकं गृहीतम्। नरकायुषोऽपि तत्प्रायोग्यसंक्लिष्टा उत्कृष्टां स्थितिं बद्ध्वा बन्धावलिकायामतीतायां सत्यामुत्कृष्टस्थितिसंक्रमस्वामी भवति। अत्यन्तविशुद्धस्यात्यन्तसंक्लिष्टस्य चायुर्बन्धस्यैव निषेधात्, तत्प्रायोग्यसंक्लिष्टग्रहणं कृतम्। नरकद्विकवैक्रियसप्तकरूपाणां नवप्रकृतीनां तिर्यङ्मनुजा एव बन्धावलिकायामतिक्रान्तायामुत्कृष्टस्थितिसंक्रमस्वामिनो भवन्ति। विकलत्रिकसूक्ष्मत्रिकसुरद्विकानां तिर्यङ्मनुजा उत्कृष्टां स्थितिं बध्नन्ति। ततो बन्धावलिकासंक्रमावलिकातिक्रान्तायां सत्यां उत्कृष्टस्थितिसंक्रमस्वामिनः ते एव भवन्ति। बद्धनरकायुष्को नरकं जिगमिषुर्मिथ्यात्वाभिमुखो जिननाम्नि उत्कृष्टस्थितिके बध्यमाने तत्कालीनोत्कृष्टसत्ताका अतिक्रान्तबन्धावलिका नाम्नः प्रकृतयस्तत्र संक्रामन्ति। संक्रमावलिकायामतीतायां मिथ्यादृष्टिर्बध्यमानशेषनामकर्मणि जिननामकर्म संक्रामति, स एव जिननाम्न उत्कृष्टस्थितिसंक्रमस्वामी संभाव्यते। आहारकसप्तकस्य प्रमत्ताभिमुखोऽप्रमत्त उत्कृष्टां स्थितिं बध्नाति। तत आवलिकायाः परत उत्कृष्टसंक्रमस्वामी भवति। स्थावरैकेन्द्रियजात्यातपानामीशानान्ता देवा

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

उत्कृष्टां स्थितिं बद्ध्वा, ततः पुनर्बन्धावलिकायामतीतायामुत्कृष्टस्थितिसंक्रमस्वामिनो भवन्ति । ततः परे देवा न स्थावरादीनां संक्रामकाः, एकेन्द्रियप्रायोग्यबन्धाभावात् । तिर्यङ्मनुजानामेतासां प्रकृतीनां बन्धसंभवेऽपि न ते उत्कृष्टां स्थितिं बध्नन्ति, तस्मादासां संक्रमस्वामिनोऽपि ते न भवन्ति । तिर्यग्द्विकौदारिकसप्तकोद्योतसेवार्तसंहननानां सुरनारका उत्कृष्टां स्थितिं बद्ध्वा, ततो बन्धावलिकायामतिक्रान्तायां सत्यां उत्कृष्टस्थितिसंक्रमस्वामिनो भवन्ति । दर्शनत्रिकसत्कर्मा मिथ्यादृष्टिः सप्ततिसागरोपमकोटाकोटिप्रमाणां मिथ्यात्वोत्कृष्टां स्थितिं बद्ध्वाऽन्तर्मुहूर्तं तत्रैव स्थित्वा ततः सम्यक्त्वं प्रतिपद्यते, ततः सम्यग्दृष्टिः सन् तस्मिन्नेव समयेऽन्तर्मुहूर्तोनां सप्ततिसागरोपमकोटाकोटिप्रमाणां मिथ्यात्वस्थितिं सम्यक्त्वे मिश्रे च संक्रमयति, ततः संक्रमावलिकायामतिक्रान्तायामुदयावलिकात उपरितनीं स्थितिमपवर्तनाकरणेन स्वस्थाने संक्रमयति । मिश्रस्थितिं च सम्यक्त्वे संक्रमयत्यपवर्तयति च स्वस्थाने इति दर्शनत्रिकस्य सम्यग्दृष्टिरुत्कृष्टस्थितिसंक्रमस्वामी । शेषाणां सर्वासामपि प्रकृतीनां चतुर्गतिका उत्कृष्टस्थितिसंक्रमस्वामिनो भवन्ति । तत्र बन्धोत्कृष्टानां बन्धावलिकायामतीतायां, संक्रमोत्कृष्टानां तु बन्धावलिकायां संक्रमावलिकायामतिक्रान्तायां सत्यां संक्रामति तदुक्तं—"बंधाओ उक्कस्सो जासिं गंतूण आलिगं परओ। उक्कस्स सामिओ संकमेण जासिं दुगं तासिं ॥ १ ॥" इत्युक्त उत्कृष्टस्थितिसंक्रमस्वामी ।

अथ जघन्यस्थितिसंक्रमस्वामिन उच्यन्ते—तत्र ज्ञानावरणपञ्चकदर्शनावरणचतुष्कान्तरायपञ्चकरूपाणां चतुर्दशप्रकृतीनां समयाधिकावलिकाशेषायां स्थितौ वर्तमानः क्षीणकषायवीतरागच्छद्मस्थो जघन्यस्थितिसंक्रमस्वामी भवति, निद्राद्विकस्य स एव समयाधिकावलिकासंख्येयभागाधिकावलिकाद्विकशेषायां स्थितौ वर्तमानो जघन्यस्थितिसंक्रमस्वामी भवति सम्यक्त्वमोहनीयस्य दर्शनमोहनीयक्षपणाय प्रवर्तितकरणो मनुजो जघन्यतोऽपि वर्षाष्टकस्योपरि वर्तमानः प्रथमसंहननी जिनकालिको मिथ्यात्वसम्यङ्मिथ्यात्वे क्षपयित्वा सम्यक्त्वं सर्वापवर्तनयापवर्त्य क्षपितशेषसम्यक्त्वश्चतुर्गतिको भूत्वा चतसृणां गतीनामन्यतमस्यां गतौ गत्वा वेदकसम्यक्त्वस्य समयाधिकावलिकायां स्थितौ वर्तमान उदयावलिकात उपरितनीं समयमात्रां स्थितिमपवर्तनाकरणेनाधस्तने स्वोदयावलिकाप्रथमे समयाधिके त्रिभागे प्रक्षिपन् जघन्यस्थितिसंक्रमस्वामी भवति । मिथ्यात्वमिश्रयोर्मनुजोऽविरतो देशविरतः प्रमत्तयतिरप्रमत्तयतिर्वा स्वक्षपणकाले सर्वापवर्तनयाऽपवर्त्य पल्योपमासंख्येयभागमात्रं चरमखण्डं परप्रकृतौ यदा संक्रमयति तदा जघन्यस्थितिसंक्रमस्वामी भवति । संज्वलनलोभस्य समयाधिकावलिकाशेषायां स्थितौ वर्तमानः सूक्ष्मसम्पराय उदयावलिकात उपरितनीं समयमात्रां स्थितिमपवर्तनाकरणेन समयाधिके स्वोदयावलिकाप्रथमत्रिभागे यदा प्रक्षिपति तदा स संज्वलनलोभस्य जघन्यस्थितिसंक्रमस्वामी भवति । अनन्तानुबन्धीनां चतसृणां गतीनामन्यतमस्यां

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

गतौ वर्तमानः सम्यग्दृष्टिश्चरमखण्डं पल्योपमासंख्येयभागमात्रं यदा संक्रमयति तदा स जघन्यस्थितिसंक्रमस्वामी भवति। सयोगिकेवलिनि याः प्रागुक्ताश्चतुर्नवतिः प्रकृतयस्तासां सयोगिकेवली अन्तर्मुहूर्तस्थितिकरणरूपे चरमापवर्तने वर्तमानो जघन्यस्थितिसंक्रमस्वामी भवति। स्त्यानर्द्धित्रिकनामत्रयोदशकमध्यमकषायाष्टकस्त्रीवेदनपुंसकवेदरूपाणां षड्विंशतिप्रकृतीनां पल्योपमासंख्येयभागमात्रं चरमप्रक्षेपं यदा करोति तदाऽनिवृत्तिबादरो जघन्यस्थितिसंक्रमस्वामी भवति। हास्यादिषट्कस्यानिवृत्तिबादरः क्षपकश्रेण्यां वर्तमानोऽपवर्तनाकरणेन संख्येयवर्षप्रमाणां स्थितिं करोति, ततस्तस्यां स्वनिर्लेपनावसरे संज्वलनक्रोधरूपे परप्रकृतौ प्रक्षिप्यमाणायां जघन्यस्थितिसंक्रमो यदा भवति तदा जघन्यस्थितिसंक्रमस्वामी भवति। पुंवेदसंज्वलनक्रोधमानमायानां चरमसमयबद्धालताया बन्धावलिकामतिक्रम्य संक्रमचरमसमये चरमप्रक्षेपं प्रक्षिपन्ननिवृत्तिबादरः क्षपकश्रेण्यां वर्त्तमानो जघन्यस्थितिसंक्रमस्वामी भवति, केवलं येन वेदेनारूढः क्षपकश्रेणीमारोहति तस्य तद्वेदस्यैव जघन्यस्थितिसंक्रमो भवति, न वेदान्तरस्य, यत उदितस्य वेदस्योदयोदीरणापवर्तनादिभिर्बह्वी स्थितिस्त्रुट्यति, बहूनां पुद्गलानां च परिशाटनं भवति। एवं हि यद्यपि नपुंसकवेदारूढः स्त्रीवेदनपुंसकवेदौ युगपत् क्षपयति, तथापि नपुंसकवेदस्यैव जघन्यस्थितिसंक्रमो लभ्यते, न स्त्रीवेदस्य, तस्योदयोदीरणयोरभावात्। स्त्रीवेदेनारूढो नपुंसकवेदक्षपणानन्तरमन्तर्मुहूर्तेन कालेन स्त्रीवेदं क्षपयति, पुंवेदारूढस्याप्येतावानेव कालो लभ्यते, तथापि तस्य स्त्रीवेदस्योदयोदीरणे न भवत इत्येतावता कालेन स्त्रीवेदारूढस्योदयोदीरणाभ्यां बह्वी स्थितिस्त्रुट्यति, तस्मात् स्त्रीवेदारूढ एव स्त्रीवेदस्य जघन्यस्थितिसंक्रमस्वामी भवति। तथा पुंवेदारूढो हास्यादिषट्कक्षयानन्तरं पुंवेदं क्षपयति, अन्यथा तु हास्यादिषट्कसहितं क्षपयति। उदितस्य च वेदस्योदीरणाया अपि प्रवृत्तेः प्रभूता स्थितिस्त्रुट्यतीति पुंवेदस्यापि पुंवेदारूढस्यैव जघन्यस्थितिसंक्रमो भवति, न शेषस्य। आयुषां तु स्वस्वभवव्यवच्छेदसमये समयाधिकावलिकाशेषायां स्थितौ वर्तमानः समयमात्रामुपरितनीं स्थितिं स्वस्वोदयावलिकात्रिभागेऽधस्तने समयाधिके प्रक्षिपन् जघन्यसंक्रमस्वामी भवतीति, उक्तं जघन्यस्थितिसंक्रमस्वामित्वम्, तत्प्रतिपादनेन च प्रतिपादितः स्थितिसंक्रमः॥

उत्कृष्टस्थितिसंक्रमस्वामिनः

प्रकृतीनाम्	स्वामिनः	विशेषः
बंधोत्कृष्टानां	४ गतिकाः	बंधावलिकापरतः
संक्रमोत्कृष्टानां	,,	बंधसंक्रमाव० २परतः
दर्शनमोहानां	सम्यग्दृष्टयः	

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

जघ० स्थितिसंक्रमस्वामिनः

ज्ञाना० ५ नाम् विघ्न ५ नाम् दर्श० ४ णाम्	१२ मे समयाधिकावलिकाशेषे	१ समयमात्रा	अपवर्त्तनया
निद्रा २	१२ मे असं० भा० सह २ आव० शेषे	१ समयमात्रा	अपवर्त्तनया
मिथ्या० मिश्र०	४–५–६–७ गुणस्थाः स्वस्वक्षपणकाले	पल्यासं० भा०	सर्वापवर्त्तनया
सं० लोभ०	सू० समयाधिकाव०शेषे क्ष०	१ समयमात्रा	अपवर्त्तनया
अनंता० ४	४ गतिकाः सम्यग्दृशः	पल्यासं० भा०	उद्वलनया
सम्यक्त्व०	४ गतिकाः कृतकरणाः समयाधिकाव० शेषे	१ समयमात्रा	अपवर्त्तनया
सयोगिसत्ताक ९४ नाम्	१३ मान्ते	आवलिकोनांतर्मुहूर्त्तं	चरमापवर्त्तनया
स्त्रीवेदस्य	स्त्रीवेदोदयेन श्रेणिगताः	पल्योपमासंख्येय भा०	
पुंवेदस्य	पुंवेदोदयेन ,,	अबाधोन ८ वर्षा	
नपुंवेदस्य	नपुंवेदोदयेन ,,	अन्तर्मु०	
आयूंषि ४	स्वस्वभवस्थाः	१ समयमात्रा	भवविच्छेदकाले अपवर्त्तनया
३३ उक्तशेषाणां	९ मस्थाः स्वस्वक्षयकाले	पल्यासं०	उद्वलनया

अथानुभागसंक्रमः प्रतिपाद्यते–तत्रानुभागो रसः "ताण रसो अणुभागो" त्ति वचनात् । अनुभागोऽनुभावो रस इति पर्यायाः । अनुभागस्य काषायिका अध्यवसाया हेतवः, तदुक्तं– "ठिइ अणुभागं कसायओ कुणइ" इति वचनात् । ते च शुभाशुभभेदेन द्विप्रकारा अपि असंख्येयलोकाकाशप्रदेशप्रमाणा भवन्ति । केवलमशुभाध्यवसायेभ्यः शुभा विशेषाधिकाः, तथा हि–यावन्ति सोपानानि आरोहति, तावन्त्येवावतरति, तथापि क्षपकस्यारोहणमेव, न प्रत्यवतरणमतस्तत्सत्कानि विशेषाधिकानि । नन्वनन्तान्यनुभागबन्धाध्यवसायस्थानानि कथं न प्राप्यन्ते, तद्बन्धकजीवानामानन्त्यादिति चेत् ? न, एकैकस्मिन् स्थितिस्थानेऽसंख्येयलोकाकाशप्रमाणानामनुभागबन्धाध्यवसायस्थानानां प्राप्यमाणत्वात्, स्थितिस्थानानि त्वसंख्येयान्येव भवन्ति, तद्यथा–जघन्यस्थितेरारभ्योत्कृष्टस्थितिं यावत् यावन्तः समयास्तावन्त्येव स्थितिस्थानानि भवन्ति । तदुक्तं कर्मप्रकृतौ–"एक्केक्कम्मि कसाओदयम्मि लोगा असंखिया हुंति । ठिइबन्धट्ठाणेसु वि अज्झवसाणाण ठ्ठाणाणि ॥ १ ॥" वृत्ति–"एकैकस्मिन् कषायोदये स्थितिस्थाननिबन्धनभूते नानाजीवापेक्षयाऽनुभागबन्धाध्यवसायस्थानानि कृष्णादिलेश्यापरिणामविशेषरूपाण्यसंख्येयलोकाकाशप्रदेशप्रमाणानि भवन्ति । तथा हि–जघन्यस्थितेरारभ्योत्कृष्टां स्थितिं यावत् यावन्तः समयास्तावन्ति स्थितिस्थानानि । तथा हि–जघन्यस्थितिरेकं

Ganesh Varni Digambar Jain Institute, Naria, Varanasi.

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

स्थितिस्थानं सैव समयोत्तरा द्वितीयम्, द्विसमयोत्तरा तृतीयम्, एवं समयवृद्ध्या तावद्वाच्यं यावदुत्कृष्टा स्थितिः। एवं चासंख्येयानि स्थितिस्थानानि भवन्ति। तेषु च प्रत्येकमेकैकस्मिन् स्थितिबन्धस्थानेऽध्यवसायस्थानानि तीव्रमन्दादिकषायोदयविशेषरूपाण्यसंख्येयलोकाकाशप्रदेशप्रमाणानि भवन्ति। एकैकस्मिंश्च कषायोदये सति असंख्येयलोकाकाशप्रदेशप्रमाणान्यनुभागबन्धस्थानानि कृष्णादिलेश्यापरिणामविशेषरूपाणि भवन्ति, "सकषायोदया हि कृष्णादिलेश्यापरिणामविशेषा अनुभागबन्धहेतव" इति वचनादिति मिलितोऽर्थः। यत्तु 'स्थितिपाकविशेषस्तस्य भवति लेश्याविशेषेण' इति वाचकवचनं तत्रापि पाकपदमहिम्नाऽनुभाग एव ग्राह्य इति वृद्धवाद इति। स्थावरप्रायोग्यैकैकस्मिन्ननुभागबन्धाध्यवसायस्थानेऽनन्तस्थावरजीवानां, त्रसप्रायोग्ये चैकैकस्मिन्ननुभागबन्धाध्यवसायस्थाने जघन्येनैको द्वौ वोत्कृष्टत आवलिकासंख्येयभागे यावन्तः समयास्तावत्प्रमाणानां त्रसजीवानां च प्राप्यमाणत्वेन न दोषः, तदुक्तं—"थावरजीवाणन्ता इक्किके तसजिया असंखेज्जा" इति। यद्यपि कर्मवर्गणान्तःपातिनः कर्मपरमाणवो न पूर्वं तथाविधरसोपेता आसन्, किन्तु प्रायो नीरसा एकस्वरूपाश्च, तथापि काषायिकाध्यवसायेन ग्रहणसमय एव जीवः प्रति कर्मपरमाणुं सर्वजीवेभ्योऽनन्तगुणान् रसाविभागान् ज्ञानावारकत्वादिविचित्रस्वभावतां चोत्पादयति, जीवानां पुद्गलानां चाचिन्त्यशक्तिमत्त्वात्, न चैतदनुपपन्नम्, अत्यन्तनीरसानामपि शुष्कतृणादिपरमाणूनां गवादिभिर्गृहीतानां क्षीरादिरूपतया सप्तधातुरूपतया च परिणामदर्शनात्। ननु सर्वेषु कर्मपरमाणुषु तुल्यान् रसाविभागान् जनयति, उत विषमान्? विषमानिति ब्रूमः, तथाहि—केषुचित् स्तोकान्, केषुचित् प्रभूतान्, केषुचित्प्रभूततरान्, तांश्च जघन्यतोऽपि सर्वजीवानन्तगुणान्, न संख्येयानसंख्येयान् वेति। तत्रापि सर्वेभ्योऽन्येभ्यः परमाणुभ्यो ये जघन्यरसान्विताः परमाणवस्तेषां समुदायः प्रथमा वर्गणा, ततोऽप्येकेन रसाविभागेनाधिकानां परमाणूनां समुदायो द्वितीया वर्गणा, द्वाभ्यां स्नेहाविभागाभ्यां अधिकानां परमाणूनां समुदायस्तृतीया। एवमेकैकस्नेहाविभागैरधिकानां परमाणूनां तावत् वर्गणा वाच्याः, यावदभव्यानन्तगुणाः सिद्धानामनन्तभागकल्पाः। प्रथमवर्गणायां परमाणवोऽतिप्रभूताः, स्नेहाविभागा अत्यल्पतराः, द्वितीयस्यां वर्गणायां प्रथमवर्गणागतपरमाण्वपेक्षया परमाणवः स्तोकाः स्नेहाविभागाश्च प्रभूताः, द्वितीयवर्गणागतपरमाण्वपेक्षया तृतीयस्यां वर्गणायां परमाणवः स्तोकाः स्नेहाविभागाश्च प्रभूताः, तृतीयवर्गणागतपरमाण्वपेक्षया चतुर्थ्यां वर्गणायां परमाणवः स्तोकाः स्नेहाविभागाश्च प्रभूताः, एवं सर्वत्र वाच्यम्। स्वभावतोऽल्पस्नेहाः परमाणवः प्रभूताः, बहुस्नेहाः परमाणवोऽल्पाः प्राप्यन्ते। (अत्र स्नेहशब्देन सप्रतिपक्षः स्निग्धस्पर्शो ग्राह्यः, तस्यैव पुद्गलानां परस्परबन्धनिमित्तत्वात्, न च स्नेहप्रत्ययस्पर्द्धके स्नेहस्यैव ग्रहणात् रूक्षस्पर्शो न ग्राह्य इति वाच्यम्, रूक्षेण रूक्षस्यापि बन्धसंभवात्, स्नेहप्रत्यये कथं रूक्षस्य ग्रहणं न कृतमित्यपि न वाच्यम्, स्नेहशब्देनोभयस्यापि ग्रहणं कृतमेव, अन्यथा स्नेहप्रत्यये जगद्वर्तिसर्वेषां परमाणूनां स्नेहप्रत्ययमेकं स्पर्द्धकं न स्यात्, तत्र रूक्षपरमाणूनामपि

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

संभवात् । ग्रहणसमयात्पूर्वं बन्धप्रायोग्यस्नेहसत्त्वेऽपि शुभाशुभफलजनकस्नेहाभावात् कर्मवर्गणाबन्धप्रायोग्यस्नेहस्याविर्भावेऽपि तादृक् स्नेहतिरोभावाच्च कर्मपरमाणवः प्रायो नीरसा एकस्वभावा इत्युक्तम्, ग्रहणसमये तु पूर्वतोऽनन्तगुणस्नेहाविर्भावः काषायिकाध्यवसायेन शुभाशुभफलजननयोग्यता च तेषु भवति ।) अत्र केवलिप्रज्ञाच्छेदनकेन च्छिद्यमानं यदा विभागं न प्रयच्छति, तदा योंऽशो विश्राम्यति स रसाविभाग उच्यते, ते च रसाविभागा एकैकस्मिन् परमाणौ जघन्यतोऽपि सर्वजीवेभ्योऽनन्तगुणा भवन्ति, उत्कृष्टतोऽप्येतावत्संख्याका एव, किन्तु ते जघन्यपदभाविरसाविभागेभ्योऽनन्तगुणा द्रष्टव्या इति । प्रागुक्तानामभव्येभ्योऽनन्तगुणानां सिद्धानामनन्तभागकल्पानां वर्गणानां समुदायः प्रथमं स्पर्द्धकम्, तत एकेन रसाविभागेनाधिकाः कर्मपरमाणवो न प्राप्यन्ते, नापि द्वाभ्यां, नापि त्रिभिः, किन्त्वनन्तानन्तैरेव सर्वजीवेभ्योऽनन्तगुणै रसाविभागैरधिकाः परमाणवः प्राप्यन्ते, ततस्तेषां समुदायो द्वितीयस्पर्द्धकस्य प्रथमा वर्गणा, तत एकैकरसाविभागवृद्ध्याऽभव्यानन्तगुणसिद्धानन्तभागकल्पा वर्गणा वाच्याः, तासां समुदायो द्वितीयं स्पर्द्धकम्। एवमभव्येभ्योऽनन्तगुणानि सिद्धेभ्योऽनन्तभागकल्पानि स्पर्द्धकानि वाच्यानि । तेषां समुदायः प्रथममनुभागबन्धस्थानम्। प्रथममनुभागबन्धस्थानान्तिमस्पर्द्धकचरमवर्गणाया द्वितीयस्थानाद्यवर्गणायाश्चान्तरं सर्वजीवानन्तगुणं वाच्यम्, द्वितीयस्थानमनन्तभागाधिकस्पर्द्धकान्वितं प्रथमस्थानापेक्षया वक्तव्यम्, एवं यथोत्तरमनन्तभागवृद्धानि स्थानानि तावद्वाच्यानि यावदङ्गुलासंख्येयभागगताकाशप्रदेशप्रमाणानि भवन्ति। एतेषां समुदाय एकं कण्डकं भवति, अनन्तभागाधिकोत्तरस्थानसमुदायरूपत्वेनानन्तभागोत्तरं कण्डकम् । प्रथमकण्डकचरमानुभागबन्धस्थानगतस्पर्द्धकापेक्षया यदनन्तरमनुभागबन्धस्थानं तदसंख्येयभागाधिकैः स्पर्द्धकैरधिकं भवति । तच्चासंख्यभागोत्तराभिधानस्य द्वितीयकण्डकस्य प्रथमं स्थानं भवति, ततः पुनरपि प्रथमासंख्येयभागवृद्धानुभागस्थानादनन्तरमनुभागस्थानं तदनन्तभागाधिकस्पर्द्धकयुतं, ततः पुनरप्यनन्तभागवृद्धम्, एवमेवानन्तभागवृद्धानि कण्डकमात्राणि स्थानानि वाच्यानि, ततः पुनरप्यसंख्येयभागाधिकस्पर्द्धकैर्वृद्धं द्वितीयमसंख्येयभागवृद्धं स्थानं प्राप्यते, ततः पुनरप्यनन्तभागोत्तराणि कण्डकमात्राणि स्थानानि वक्तव्यानि, पुनस्तृतीयमसंख्येयभागवृद्धं स्थानं, पुनरप्यनन्तभागोत्तराणि कण्डकमात्राणि स्थानानि, ततः पुनरप्यसंख्येयभागवृद्धं स्थानम् । एवमनन्तभागवृद्धकण्डकव्यवहितान्यसंख्येयभागाधिकानि स्थानानि तावद्वाच्यानि यावत्कण्डकमात्राणि भवन्ति । यद्यप्यसंख्येयभागस्थानान्तरितान्यनन्तभागवृद्धानि कण्डकानि भवन्ति, तथापि तानि प्रथमकण्डकगतचरमानुभागबन्धस्थानापेक्षया सर्वाण्यप्यसंख्येयभागवृद्धानि, ततः प्राक्तनानन्तभागवृद्धस्थानेभ्यस्तु सुतरामसंख्येयभागवृद्धानि सर्वाण्यपि प्राप्यन्ते । असंख्येयभागवृद्धचरमस्थानात् पुनरप्यनन्तभागवृद्धानि कण्डकमात्राणि स्थानानि वाच्यानि । ततोऽसंख्येयभागवृद्धस्थाने प्रथमं संख्येयभागाधिकं स्थानं वाच्यम्, ततः पुनरप्यनन्तभागोत्तराणि कण्डकमात्राणि स्थानानि, पुनरसंख्येयभागवृद्धं

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

स्थानं, पुनरनन्तभागोत्तराणि कण्डकमात्राणि स्थानानि, पुनरसंख्येयभागवृद्धं स्थानं । एवमसंख्येयभागवृद्धानि कण्डकमात्राणि स्थानान्यभिधाय पुनरनन्तभागोत्तरं कण्डकं, ततोऽसंख्येयभागवृद्धस्थाने द्वितीयं संख्येयभागवृद्धं स्थानं वक्तव्यम् । एवं संख्येयभागवृद्धानि स्थानान्यपि कण्डकमात्राणि वाच्यानि । ततः पुनरप्यनन्तभागोत्तराणि कण्डकमात्राणि स्थानानि, पुनरसंख्येयभागवृद्धं स्थानं, पुनरनन्तभागवृद्धं कण्डकं, पुनरसंख्येयभागवृद्धं-स्थानम्, एवमसंख्येयभागवृद्धानि कण्डकमात्राण्यभिधायानन्तभागवृद्धं च कण्डकमुक्त्वा संख्येयभागवृद्धिस्थाने प्रथमं संख्येयगुणवृद्धं स्थानं वाच्यम्, प्रथमात् संख्येयगुणोत्तरादनुभागबन्धस्थानादधो यावन्ति मूलत आरभ्य प्रागतिक्रान्तानि स्थानानि तावन्त्यतिक्रम्य द्वितीयं संख्येयगुणाधिकं वक्तव्यम्, एवं संख्येयगुणाधिकानि स्थानानि तावद्वाच्यानि यावत् कण्डकस्थानतुल्यानि स्थानानि भवन्ति । ततः पुनरपि पूर्वपरिपाट्या संख्येयगुणाधिकस्थानप्रसङ्गेऽसंख्येयगुणाधिकं स्थानं वाच्यम् । पुनरपि मूलत आरभ्य यावन्त्यतिक्रान्तानि तावन्ति भूयोऽप्यतिक्रम्य द्वितीयमसंख्येयगुणाधिकं स्थानं वाच्यम् । एवमसंख्येयगुणाधिकानि स्थानानि कण्डकप्रमाणानि भवन्ति । ततः पुनरप्यसंख्येयगुणाधिकस्थानप्रसङ्गेऽनन्तगुणाधिकं स्थानं वाच्यम्, ततो भूयोऽपि मूलत आरभ्य यावन्ति स्थानानि प्रागतीतानि तावन्त्यभिधाय द्वितीयमनन्तगुणाधिकं स्थानं वाच्यम् । एवमनन्तगुणाधिकानि स्थानान्यपि कण्डकस्थानतुल्यानि वाच्यानि । ततः पुनरपि पूर्वपरिपाट्या वृद्धिपञ्चकमभिधातव्यम् । ततो भूयोऽप्यनन्तगुणाधिकं स्थानं न वाच्यम्, षट्स्थानकस्य परिसमाप्तत्वात् । ततः पुनरप्यनन्तभागवृद्धं यत्स्थानं लभ्यते तत् द्वितीयस्य षट्स्थानकस्य प्रथमम् । एवं पूर्वपरिपाट्या द्वितीयं षट्स्थानं समुत्पद्यते, एवं षट्स्थानान्यपि सर्वाण्यसंख्येयलोकाकाशप्रदेशप्रमाणानि भवन्ति, तदुक्तं—"छट्ठाणमसंखया लोगा" इति । विशेषसंख्यानिर्धारणार्थं तु कर्मप्रकृतिगता सवृत्तिका गाथा लिख्यते—"सुहुमगणिपवेसणया अगणिकाया य तेसि कायट्ठिई । कमसो असंखगुणियाणज्झवसाणाणि अणुभागे ॥ १ ॥" व्याख्या—"सूक्ष्माग्नौ सूक्ष्माग्निकाये प्रवेशनम्—उत्पादो येषां ते तथा सूक्ष्माग्नौ प्रविशन्ति इति यावत्, तथाग्निकायाः—अग्निकायत्वेनावस्थिताः, तथा तेषाम्—अग्निकायानां कायस्थितिः—कायस्थितिकालः, एते क्रमशः—क्रमेणासंख्येयगुणिताः, तथाऽनुभागे—अनुभागविषये, अध्यवसायानि—उपचारादध्यवसायनिर्वृत्तान्यनुभागबन्धस्थानान्यसंख्येयगुणानि । अयमिह विशदार्थः—ये एकस्मिन् समये सूक्ष्माग्निकायेषु प्रविशन्ति ते स्तोकाः, ते चासंख्येयलोकाकाशप्रदेशप्रमाणाः, तेभ्योऽपि येऽग्निकायत्वेनावतिष्ठन्ते तेऽसंख्येयगुणाः, तेभ्योऽप्यग्निकायिकानां कायस्थितिकालोऽसंख्येयगुणः, तेभ्योऽप्यसंख्येयगुणान्यनुभागबन्धस्थानानीति" । ननु कियन्मात्रेणानन्तासंख्येयसंख्येयतमेन भागेन कियन्मात्रेण चानन्तासंख्येयसंख्येयगुणेन वृद्धिः कर्तव्या इति चेत्? शृणु—सर्वजीवासंख्येयलोकाकाशप्रदेशोत्कृष्टसंख्येयकैः, तथा हि—प्रथमस्यानुभागबन्धस्थानस्य सर्वजीवसंख्याप्रमाणेन राशिना भागे हृते सति यल्लभ्यते सोऽत्रानन्तभागो

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ग्राह्यः, तेनाधिकं द्वितीयमनुभागबन्धस्थानम्, तस्यापि सर्वजीवप्रमाणेन राशिना भागे हृते यल्लभ्यते तेनाधिकं तृतीयमनुभागबन्धस्थानम्, एवं यद्यदनुभागबन्धस्थानं यतो यतोऽनन्तभागवृद्धमुपलभ्यते तत्तत्तस्य तस्य सर्वजीवप्रमाणराशिना भागलभ्येनानन्ततमेनांशेनाधिकं द्रष्टव्यम्। तथाऽसंख्येयभागाधिकं नाम पाश्चात्यस्यानुभागबन्धस्थानस्यासंख्येयलोकाकाशप्रदेशप्रमाणेन राशिना भागे हृते यल्लभ्यते सोऽसंख्येयतमो भागस्तेनाधिकम्। तथा संख्येयभागवृद्धं नाम पाश्चात्यस्यानुभागबन्धस्थानस्योत्कृष्टेन संख्येयेन भागे हृते सति यल्लभ्यते स संख्येयतमो भागस्तेनाधिकम्। तथा संख्येयगुणवृद्धं नाम पाश्चात्येऽनुभागबन्धस्थाने उत्कृष्टसंख्येयकप्रमाणेन राशिना गुणिते यावल्लभ्यते तावत्प्रमाणम्। तथाऽसंख्येयगुणवृद्धं नाम पाश्चात्येऽनुभागबन्धस्थानेऽसंख्येयलोकाकाशप्रदेशप्रमाणेन राशिना गुणिते सति यावान् राशिर्भवति तावत्प्रमाणम्। तथाऽनन्तगुणवृद्धं नाम पाश्चात्येऽनुभागबन्धस्थाने सर्वजीवसंख्याप्रमाणेन राशिना गुणिते सति यावान् राशिर्भवति तावत्प्रमाणम्। ननु प्रथमादनुभागबन्धस्थानाद्यद्द्वितीयमनुभागबन्धस्थानमनन्तभागवृद्धं तत् किं स्पर्द्धकापेक्षया, यद्वा पुद्गलापेक्षया, उत रसाविभागापेक्षयेति? अत्र त्रयोऽपि विकल्पा न युक्तिक्षमाः, तथा हि—न तावत् प्रथमपक्षो यतः प्रथमानुभागबन्धस्थानेऽभव्येभ्योऽनन्तगुणत्वेन सिद्धानामनन्तभागत्वेन स्पर्द्धकानां प्राप्यमाणत्वेन सर्वजीवराशिना भागे हृते सति एकमपि न प्राप्यते, नापि द्वितीयः, यतो यथा यथाऽनुभागवृद्धिस्तथा तथा पुद्गलाः स्तोकाः स्तोकतराः लभ्यन्त इति प्रथमादिस्थानात् द्वितीयादिस्थाने परमाणूनां हानिरेव स्यात् नानन्तभागाधिक्यम्, नापि तृतीयः, यतः प्रथमाद्यनुभागबन्धस्थानगतरसाविभागापेक्षया द्वितीयाद्यनुभागबन्धस्थानगतरसाविभागाः संख्येयादिगुणतया प्राप्यन्ते, तथा हि—प्रथमानुभागबन्धस्थानगतप्रथमस्पर्द्धकस्य प्रथमवर्गणायामनन्ता अपि रसाविभागा असत्कल्पनया सप्त, द्वितीयस्यामष्टौ, तृतीयस्यां नव, चतुर्थ्यां दश, इदमेकं स्पर्द्धकम्, इत ऊर्ध्वमेकोत्तरादिरसाविभागानां वृद्धिर्न प्राप्यते, किन्तु सर्वजीवानन्तगुणरसाविभागैः, ततो द्वितीयस्पर्द्धकप्रथमवर्गणायां सप्तदश, द्वितीयस्यामष्टादश, तृतीयस्यामेकोनविंशतिः, चतुर्थ्यां विंशतिः, इदं द्वितीयं स्पर्द्धकं, ततः पुनरपि सर्वजीवानन्तगुणमन्तरम्, ततस्तृतीयस्पर्द्धकप्रथमवर्गणायां सप्तविंशतिः, द्वितीयस्यामष्टाविंशतिः, तृतीयस्यामेकोनत्रिंशत्, चतुर्थ्यां त्रिंशत्, इदं तृतीयं स्पर्द्धकम्, ततः पुनरपि तावत्प्रमाणान्तरम्, ततः चतुर्थस्पर्द्धकस्य प्रथमवर्गणायां सप्तत्रिंशत्, द्वितीयस्यामष्टात्रिंशत्, तृतीयस्यामेकोनचत्वारिंशत्, चतुर्थ्यां चत्वारिंशत्, इदं चतुर्थं स्पर्द्धकम्, इदमसत्कल्पनया प्रथममनुभागबन्धस्थानम्, अत्र च रसाविभागाः सर्वसंख्यया षट्सप्तत्यधिकानि त्रीणि शतानि, ततः पुनरपि तावत्प्रमाणमन्तरम्, ततः पुनर्द्वितीयानुभागप्रथमस्पर्द्धकप्रथमवर्गणायां सप्तचत्वारिंशत्, द्वितीयस्यामष्टचत्वारिंशत्, तृतीयस्यामेकोनपञ्चाशत्, चतुर्थ्यां पञ्चाशत्, इदमेकं स्पर्द्धकम्, ततः पुनरपि तावत्प्रमाणमन्तरम्, ततः द्वितीयानुभागद्वितीयस्पर्द्धकस्य प्रथमवर्गणायां सप्तपञ्चाशत्, द्वितीयस्यामष्टपञ्चाशत्,

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तृतीयस्यामेकोनषष्टिः, चतुर्थ्यां षष्टिः, इदं द्वितीयं स्पर्द्धकम्, पुनरपि तावत्प्रमाणमन्तरम्, ततो द्वितीयानुभागस्य तृतीयस्पर्द्धकप्रथमवर्गणायां सप्तषष्टिः, द्वितीयस्यामष्टषष्टिः, तृतीयस्यामेकोनसप्ततिः, चतुर्थ्यां सप्ततिः, इदं तृतीयं स्पर्द्धकम्। ततः पुनरपि तावत्प्रमाणमन्तरम्, ततश्चतुर्थस्पर्द्धकप्रथमवर्गणायां सप्तसप्ततिः, द्वितीयस्यामष्टसप्ततिः, तृतीयस्यामेकोनाशीतिः, चतुर्थ्यामशीतिः, इदं चतुर्थं स्पर्द्धकमिति द्वितीयानुभागबन्धस्थानम्, अत्रासत्कल्पनया रसाविभागाः सर्वसंख्यया षोडशोत्तरसहस्रम्, तदेवं प्रथमस्थानगतरसाविभागापेक्षया द्वितीये स्थाने रसाविभागाः संख्येयगुणतया लभ्यन्ते, उत्तरोत्तरस्थाने तु प्रभूतप्रभूततमा इति न क्वापि रसाविभागापेक्षया पूर्वपूर्वस्थानापेक्षयोत्तरोत्तरस्थानेष्वनन्तभागाधिक्यमिति चेत्? अत्रोच्यते—इयं षट्स्थानप्ररूपणा बहु संभवाभिप्रायेण संभवति, तेन यद्यपि प्रथमानन्तगुणानुभागवृद्धात् स्थानात् अर्वाक्तनेषु स्थानेषु सर्वजीवप्रमाणेन राशिना भागहारो न संभवति, तथाप्युपरितनेषु स्थानेषु अन्येष्वपि द्वितीयादिषट्स्थानेषु सर्वेष्वपि च संयमश्रेण्यादिगतेषु स्थानेषु संभवतीति न विरोधः। यद्यपि च पूर्वपूर्वस्थानापेक्षयोत्तरोत्तरस्थानेषु परमाणवः किञ्चिद्धीनहीनतराः प्राप्यन्ते तथापि तेषु स्तोकस्तोकतरैः परमाणुभिर्वर्गणानां निष्पत्तेरुक्तस्वरूपं स्पर्द्धकबाहुल्यं न विरुध्यते। अपि च प्रथमानन्तगुणानुभागवृद्धस्थानात् पूर्वपूर्वस्थानेभ्यः उत्तरोत्तरस्थानानामनन्तभागाधिक्यमतिस्तोकतरमिति।

अयं च रसः शुभप्रकृतीनां क्षीरखण्डादिरसोपमोऽशुभप्रकृतीनां निम्बघोषातक्यादिरसोपमः। तत्र स्वाभाविकः एकस्थानकः, द्वयोः कर्षयोरावर्त्तितयोर्य एकः कर्षोऽवतिष्ठते तदुपमो द्विस्थानकः। त्रयाणां कर्षाणामावर्तितानां य एकः कर्षोऽवशिष्यते तदुपमस्त्रिस्थानकः। चतुर्णां कर्षाणामावर्तने कृते सत्युद्धरितैककर्षोपमश्चतुःस्थानकः। अत्रैकस्थानादिरसा यथोत्तरमनन्तगुणा द्रष्टव्याः। बन्धमाश्रित्य मतिश्रुतावधिमनःपर्यायज्ञानावरणचक्षुरचक्षुरवधिदर्शनावरणानि पुंवेदश्चत्वारः संज्वलनाः पञ्चविधान्तरायमिति सप्तदशप्रकृतिव्यतिरिक्ताः शुभा अशुभा वा द्विस्थानकरसाः त्रिस्थानकरसाश्चतुःस्थानकरसाश्च प्राप्यन्ते, न तु कदाचनाप्येकस्थानकरसाः। उक्तसप्तदशानां तु प्रकृतीनां बन्धमाश्रित्यैकस्थानकोऽपि रसोऽनिवृत्तिसंख्येयभागेषु गतेषु सत्सु परतः प्राप्यते, अशुभानामत्यन्तविशुद्धाध्यवसाययोगेनैकस्थानकस्य रसस्य बन्धात्, पूर्वं तु नैकस्थानकरसबन्धं किन्तु द्विस्थानकादिरसं बध्नाति। ननु हास्यादीनां स्वबन्धचरमद्विचरमादिसमयेषु वर्तमानस्यैकस्थानिकरसबन्धः कथं न संभवतीति चेत्? न, एकस्थानिकरसबन्धप्रायोग्यपरमप्रकर्षप्राप्तविशुद्धेरभावात्, यदा तु तत् बन्धप्रायोग्या परमप्रकर्षप्राप्ता शुद्धिर्नवमगुणस्थानसंख्येयेभ्यो भागेभ्यः परतो जायते, तदा बन्धमेव ता नायान्तीति कुत एकस्थानिकरसबन्धस्य संभवः? ननु यथा मतिज्ञानावरणादीनामनिवृत्तिबादराद्धायाः संख्येयेषु भागेषु गतेषु परतोऽतिविशुद्धत्वेनैकस्थानिकरसबन्धः, तथा क्षपकश्रेण्यां सूक्ष्मसम्परायस्य चरमद्विचरमादिसमयेषु वर्तमानस्य संभवत् बन्धस्य केवलद्विकावरणस्य कथमेकस्थानिकरसबन्धो न भवति, तदानीमतिविशुद्धत्वा-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

दिति चेत्? न, सर्वघातित्वेन केवलद्विकावरणस्य जघन्यपदेऽपि द्विस्थानिकरसबन्धस्यैव संभवात् । ननु यथाऽशुभसप्तदशप्रकृतीनां परमविशुद्धौ सत्यामेकस्थानिकरसबन्धः संभवति तद्वदतिसंक्लिष्टे मिथ्यादृष्टौ शुभप्रकृतीनामेकस्थानिकरसबन्धः कथं न भवतीति चेत्? न, मनाग्विशुद्ध्यमाने सत्येव तद्बन्धसंभवेनातिसंक्लिष्टे मिथ्यादृष्टौ तद्बन्धासंभवात्, तदसंभवे च परमसंक्लिष्टे मिथ्यादृष्टौ शुभप्रकृतीनामेकस्थानिकरसबन्धस्य संभावनाया एव कुतोऽवकाशः । नन्वतिसंक्लिष्टे मिथ्यादृष्टौ नरकप्रायोग्यवैक्रियतैजसादिप्रकृतीनां बन्धसंभवेन कथमेकस्थानिकरसबन्धो न संभवतीति चेत्? सत्यं, परं तासामपि तथास्वाभाव्यात् जघन्यतोऽपि द्विस्थानिकरसबन्धस्यैव संभवात् । ननु यैरध्यवसायैः शुभप्रकृतीनामुत्कृष्टा स्थितिर्भवति तैरेवाध्यवसायैः शुभप्रकृतीनामेकस्थानिकरसबन्धः कथं न संभवतीति चेत्? शृणु–इह हि प्रथमस्थितेरारभ्य समयवृद्ध्या असंख्येयाः स्थितिविशेषा भवन्ति, एकैकस्यां च स्थितौ अनन्तस्पर्द्धकात्मका असंख्येया रसस्पर्द्धकसंघातविशेषा भवन्ति । तत उत्कृष्टस्थितौ बध्यमानायां प्रतिस्थितिविशेषमसंख्येया ये रसस्पर्द्धकसङ्घातविशेषास्ते सर्वे द्विस्थानिकरसबन्धस्यैव घटन्ते, नैकस्थानिकस्येति न शुभप्रकृतीनामेकस्थानिकरसबन्धः, तदुक्तं–"उक्कोसठ्ठिई अज्झवसाणेहिं एगठ्ठाणिओ होही । सुभिटाण तं न जं ठ्ठिइअसंखगुणिया उ अणुभागा ॥ १ ॥" इति । अत्रानुभागबन्धस्यानुभागसङ्क्रमे सोपयोगित्वेन किञ्चित्स्वरूपमुक्तम् ।

अनुभागसङ्क्रमे सप्तानुयोगद्वाराणि, तद्यथा–भेदः, विशेषलक्षणं, स्पर्द्धकप्ररूपणा, उत्कृष्टानुभागसंक्रमपरिमाणम्, जघन्यानुभागसंक्रमपरिमाणम्, साद्यादिप्ररूपणा, स्वामित्वं चेति । तत्र भेदः द्विप्रकारः, तद्यथा–मूलप्रकृत्यनुभागसङ्क्रमः, उत्तरप्रकृत्यनुभागसङ्क्रमश्च । मूलप्रकृत्यनुभागसंक्रमोऽष्टधा, तद्यथा–ज्ञानावरणीयस्य, दर्शनावरणीयस्य, वेदनीयस्य, आयुषः, मोहनीयस्य, नामकर्मणः, गोत्रस्य, अन्तरायस्य चेति । उत्तरप्रकृत्यनुभागसंक्रमोऽष्टपञ्चाशच्छतधा, तद्यथा–मतिज्ञानावरणीयस्य, श्रुतज्ञानावरणीयस्य, यावद्वीर्यान्तरायस्येति, कृतं भेदनिरूपणम् । विशेषलक्षणमुच्यते–स्थितिसंक्रमवत् रससंक्रमोऽपि त्रिविधः, तद्यथा–उद्वर्तनासङ्क्रमः, अपवर्तनासङ्क्रमः, प्रकृत्यन्तरनयनलक्षणसङ्क्रमश्चेति । तत्र स्तोकस्य रसस्य प्रभूतीकरणमुद्वर्तना, प्रभूतस्य रसस्याल्पीकरणमपवर्तना, विवक्षितायाः प्रकृतेः समाकृष्य प्रकृत्यन्तरे नीत्वा निवेशनं प्रकृत्यन्तरनयनलक्षणसंक्रमः, अत्र केवलस्य रसस्यान्यत्र नेतुमशक्यत्वेन तदुक्तानां परमाणूनामवसेयमिति निरूपितं विशेषलक्षणम् । अथ स्पर्द्धकप्ररूपणा प्ररूप्यते–तत्र स्पर्द्धकानि त्रिविधानि, तद्यथा–सर्वघातीनि, देशघातीनि, अघातीनि चेति । तत्र स्वविषयं केवलज्ञानादिगुणं सर्वं घातयन्तीत्येवंशीलानि यानि रसस्पर्द्धकानि तानि सर्वघातीनि । स्वघात्यज्ञानादेर्गुणस्य देशं मतिज्ञानादिलक्षणं घातयन्तीत्येवंशीलानि यानि रसस्पर्द्धकानि तानि देशघातीनि । यानि रसस्पर्द्धकानि न किमपि घातयन्ति तान्यघातीनि, केवलं सर्वघातिरसस्पर्द्धकसम्बन्धात् तान्यपि सर्वघातीनि भवन्ति, यथेह लोकेऽपि स्वयमचौराणामपि चौरसम्पर्कात् चौरता । सर्वघातिरसस्पर्द्धकसम्पर्कात् प्रकृतयोऽपि सर्वघातिन्य उच्यन्ते, ताश्च केवलज्ञाना-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

वरणं, केवलदर्शनावरणम्, आद्यद्वादशकषायाः मिथ्यात्वं, निद्रापञ्चेति विंशतिः। एता हि प्रकृतयो यथायोगं स्वघात्यं गुणं ज्ञानं, दर्शनं, चारित्रं, सम्यक्त्वं, दर्शनलब्धिं वा सर्वात्मना घातयन्तीति। यद्यपि केवलज्ञानावरणीयं कर्म ज्ञानलक्षणं गुणं सर्वात्मना हन्तुं प्रवर्तते तथापि न तत्तेन समूलं हन्तुं शक्यते तथास्वाभाव्यात्, यथा महीयसापि घनपटलेन रविचन्द्रकिरणावरणप्रवृत्तेनापि न तत्प्रभा समूलं हन्तुं शक्यते, अन्यथानुभूयमानदिन-रजनीविभागाभावापत्तेः, एवं केवलदर्शनावरणीयस्यापि वाच्यम्। यद्यपि निद्रापञ्च-कमप्राप्तलब्धेः प्रतिबन्धकत्वेन न प्रवर्तते, तथापि प्राप्तलब्धेः समूलनाशकत्वेन प्रवर्तनात् सर्वघातित्वम्, तदुक्तं गन्धहस्तिपादैः—"निद्रादयः समधिगताया एव दर्शनलब्धेरुपघाते वर्तन्ते दर्शनावरणचतुष्टयं तूद्गमोच्छेदित्वात्समूलघातं हन्ति दर्शनलब्धिम्"। एवमेव न्याया चार्या अपि—"निद्रादयश्च पञ्च प्रकृतयो यद्यपि केवलदर्शनावरणावृत्तकेवलदर्शनगतप्रभामात्रं दर्शनैकदेशमुपघ्नन्ति, तथापि ताश्चक्षुर्दर्शनावरणादिकर्मक्षयोपशमसमुत्थां दर्शनलब्धिं समूलकाषं कष-न्तीति सर्वघातिन्यः" इति। एवं मोहनीयेऽपि सर्वघातित्वं परिभावनीयम्। देशघा-तिरसस्पर्द्धकसम्पर्केण ज्ञानादिगुणैकदेशविघातित्वात् प्रकृतयोऽपि देशघातिन्य उच्य-न्ते, ताश्चेमाः—केवलज्ञानावरणवर्जज्ञानावरणचतुष्ककेवलदर्शनावरणवर्जदर्शनावरणत्रिके-नवनोकषायसंज्वलनचतुष्कान्तरायपञ्चकमिति पञ्चविंशतिः। केवलज्ञानावरणीयेनावृत्ते-ऽपि सर्वात्मना केवलज्ञाने यः कोऽपि तद्गतमन्दविशिष्टतरप्रकाशरूपो ज्ञानैकदेशो मति-ज्ञानादिसंज्ञितं यथायोगं मतिश्रुतावधिमनःपर्यायज्ञानावरणानि घ्नन्ति तानि देश-घातीनि। एवं केवलदर्शनावरणावृत्तेऽपि सर्वात्मना केवलदर्शने या तद्गता मन्दमन्दत-मविशिष्टादिरूपा प्रभा चक्षुर्दर्शनादिसंज्ञा तां यथायोगं चक्षुरचक्षुरवधिदर्शनावरणान्यावृ-ण्वन्ति, ततस्तान्यपि दर्शनैकदेशघातित्वाद्देशघातीनि। नवनोकषायाः संज्वलनचतुष्क-माद्यद्वादशकषायकर्मक्षयोपशमसमुत्थां चारित्रलब्धिं देशतो घ्नन्ति, तेषामतीचारमात्रसम्पा-दनार्थत्वात्, तदुक्तं—"सव्वेवि य अइआरा संजलणाणं तु उदयओ हुन्ति। मूलच्छेज्जं पुण होइ बारसह्नं कसायाणं ॥ १ ॥" तथा—"घाइखओवसमेणं सम्मचरित्ताइं जाइं जीवस्स। ताणं हणंति देसं संजलणा नोकसाया य ॥ १ ॥" ततस्तेऽपि देशघातिनः। नन्वत्र गाथायां चा-रित्रैकदेशघातित्वेन संज्वलननोकषायाणां देशघातित्वमुक्तं, तर्हि अप्रत्याख्यानानामपि चारित्रैकदेशरूपदेशविरतिप्रतिबन्धकत्वेन कथं न देशघातित्वमिति चेत्? उच्यते, सर्व-घातिभिन्नत्वे सति यत् घातित्वं तदेव देशघातित्वमिति लक्षणस्य वाच्यत्वेन न दोषः। यद्वा चारित्रापेक्षया देशघातित्वं चारित्रगतापकर्षजनकत्वमेव, तच्च नाप्रत्याख्यानानामित्य-दोषः। यद्वा यदुदये देशतोऽपि स्वावार्यगुणो नाविर्भवति किन्त्वनुदये एवाविर्भवति सा सर्व-घातिनी इत्यपि संभवल्लक्षणेनाप्रत्याख्यानकषायाः सर्वघातिनः। तथा ग्रहणधारणादियोग्यं यद्वस्तु जीवो न ददाति, न लभते, न भुङ्क्ते, नोपभुङ्क्ते, न करोति वा तद्दानान्तरायादिवि-षयस्तच्च सर्वद्रव्याणामनन्ततमो भागस्ततस्तथारूपसर्वद्रव्यैकदेशविषयदानादिविघातकारित्वा-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

देशघातिदानान्तरायादीनीति । नामगोत्रवेदनीयायुष्कर्मणां प्रकृतयस्तु हन्तव्याभावेन न किमपि घ्नन्तीति ता अघातिन्यो द्रष्टव्याः । सर्वघातिनीनां हि रसस्ताम्रभाजनवन्निश्छिद्रो घृतवदतिस्निग्धो द्राक्षावत्तनुप्रदेशोपचितः स्फटिकाभ्रवच्चातीव निर्मलः सकलस्वविषयघातित्वेन सर्वघाती भवति । देशघातिनीनां तु रसः कश्चिद्वंशदलनिर्मापितकटवदतिस्थूलच्छिद्रशतसंकुलः, कश्चित्कम्बलवन्मध्यमविवरशतसंकुलः, कोऽपि मसृणवासोवदतिसूक्ष्मविवरसंवृत्तः अल्पस्नेहो विमलश्च स्वविषयैकदेशघातित्वाद्देशघाती भवति । अघातिनीनां चोभयविलक्षणत्वादघाती रसः, केवलमघातिनीनामपि प्रकृतीनां घातिप्रकृतिसम्पर्कतस्तद्रसविपाकोपदर्शकत्वं भवति, स्वयमचौराणामपि चौरसम्पर्कत इव चौरत्वमिति ।

अथ रसकारणतः स्थानसंज्ञापि वेदितव्या । मतिज्ञानावरणादिसप्तदशप्रकृतीनामेकद्वित्रिचतुःस्थानसंज्ञा, शेषाणां तु द्वित्रिचतुःस्थानसंज्ञा, सा प्रागभिहितैव । सम्यक्त्वमिश्रयोः स्थानसंज्ञा घातिसंज्ञा च प्राग् न प्रतिपादिता । तयोः सङ्क्रममधिकृत्य विशेषोपदर्शनं च क्रियते–इह दर्शनमोहनीयसत्कर्माश्रित्य रसस्पर्द्धकानि द्विविधानि भवन्ति, तद्यथा–देशघातीनि सर्वघातीनि च । तत्र यानि देशघातीनि रसस्पर्द्धकानि तानि सम्यक्त्वमोहनीयस्यैव भवन्ति, न मिश्रमिथ्यात्वयोः, तयोः सर्वघातित्वात्, तानि चैकस्थानिकरसोपेतानि द्विस्थानिकरसोपेतानि च भवन्ति । यत्र देशघातिरसस्पर्द्धकानि परिनिष्ठितानि ततस्तदुपरितनानि सर्वाणि सर्वघातीनि, तानि मिश्रमिथ्यात्वयोर्भवन्ति । ततो यत्र मिश्रस्य द्विस्थानिकरसोपेतानि रसस्पर्द्धकानि परिनिष्ठितानि ततस्तदुपरितनानि द्विस्थानिकरसोपेतानि, त्रिस्थानिकरसोपेतानि, चतुःस्थानिकरसोपेतानि च सर्वाण्यपि रसस्पर्द्धकानि मिथ्यात्वस्यैव भवन्ति ।

दर्शनमोहनीयस्य स्पर्धकानुक्रमस्य स्थापना ।



सङ्क्रममाश्रित्य मिश्रस्य द्विस्थानिकरसस्पर्द्धकान्येव सङ्क्रामन्ति, शेषाणामभावात् । सम्यक्त्वस्यैकस्थानिकरसोपेतानि द्विस्थानिकरसोपेतानि च संक्रामन्ति, एतेषामेव सद्भावात् । आतपतिर्यङ्मनुजायुषां तु "दुतिचउट्ठाणाउ सेसाउ" इति वचनप्रामाण्यात् द्वित्रिचतुःस्थानिकरसस्पर्द्धकानां सद्भावेऽपि तथास्वाभाव्यात् द्विस्थानिकरसस्पर्द्धकान्येव संक्रमयन्ति । त्रिस्थानिकचतुःस्थानिकरसस्पर्द्धकानां त्रिविधोऽपि संक्रमो न भवति । एतासां सर्वघातिप्रकृत्यन्तररससम्पर्कात् रसः सर्वघाती, न त्वघाती देशघाती वा । मत्यादिज्ञानावरणचतुष्कचक्षुरादिदर्शनावरणत्रिकपुंवेदसंज्वलनचतुष्कान्तरायपञ्चकमिति सप्तदशप्रकृतीनां बन्धमाश्रित्यैकस्थानिकरसस्पर्द्धकानि, द्विस्थानिकरसस्पर्द्धकानि, त्रिस्थानिकरसस्पर्द्धकानि चतुःस्थानिकरसस्पर्द्धकानि च भवन्ति । पुंवेदसंज्वलनचतुष्कवर्जानां द्वादशप्रकृतीनां सद्भावमाश्रित्यैकस्थानिकरसो न भवति, पुंवेदसंज्वलनचतुष्करूपाणां त्वेकस्थानिकरसोऽपि

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

भवति, सङ्क्रममाश्रित्य द्वादशानामेकस्थानकरसस्य सङ्क्रमो न भवति, पञ्चानां तु एकस्थानिकरसोऽपि संक्रामति। शेषाणां सर्वासां प्रकृतीनां तु द्विस्थानिकरसस्पर्द्धकानि त्रिस्थानिकरसस्पर्द्धकानि चतुःस्थानिकरसस्पर्द्धकानि च सद्भावमाश्रित्य भवन्ति, संक्रममाश्रित्य च संक्रामन्ति, नैकस्थानिकानि, तदुक्तं कर्मप्रकृतिचूर्णौ "अण्णं च सव्वकम्माणं संतकम्मं पडुच्च दुट्ठाणिगतिट्ठाणिगचउट्ठाणिगाणि फड्डगाणि, सम्मामिच्छत्तस्स दुट्ठाणिगा चेव फड्डगा, सम्मत्तस्स एगट्ठाणिय दुट्ठाणियाणि, पुरिसवेदसंजलणाणं एगट्ठाणादि चउव्विह फड्डगा फड्डगपरूवणा कया" इति।

यत्तु मतिश्रुतावधिज्ञानावरणचक्षुरचक्षुरवधिदर्शनावरणस्त्रीवेदनपुंसकवेदान्तरायपञ्चकरूपाणां त्रयोदशप्रकृतीनां स्थानमधिकृत्य द्विस्थानमनुभागसत्कर्मोक्तं तत्संक्रमकाले संक्रमविषयकसत्तामाश्रित्यावसेयम्, अन्यथाऽनुभागसत्कर्माधिकारे एकस्थानिकस्यानुभागसत्कर्मण उक्तत्वेन विरोधापत्तेः तदुक्तं—"संकमसयमणुभागे णवरि जहन्नं तु देसघाईणं। छन्नोकसायवज्जाण एगट्ठाणंमि देसहरं ॥ १ ॥ मणनाणे दुट्ठाणं देसहरं" व्याख्या—"अनुभागसंक्रमेण तुल्यमनुभागसत्कर्म वाच्यम्, यथानुभागसंक्रमे स्थानप्रत्ययविपाकशुभाशुभत्वसाद्यनादित्वस्वामित्वान्युक्तानि तथैवात्राप्यनुभागसत्कर्मणि वाच्यानीति भावः, नवरमयं विशेषः—यदुत देशघातिनीनां हास्यादिषट्कवर्जितानां मतिश्रुतावधिज्ञानावरणचक्षुरचक्षुरवधिदर्शनावरणसंज्वलनचतुष्टयवेदत्रयान्तरायपञ्चकरूपाणामष्टादशप्रकृतीनां जघन्यानुभागसत्कर्म स्थानमधिकृत्यैकस्थानीयम्, घातिसंज्ञामधिकृत्य देशहरं देशघाति, मनःपर्यायज्ञानावरणे तु जघन्यानुभागसत्कर्मस्थानचिन्तायां द्विस्थानम्, घातिसंज्ञाविचारे च देशघाति ज्ञेयम्" इति। ननु त्रयोदशप्रकृतीनां जघन्यसंक्रमकाले सर्वघातित्वं द्विस्थानिकत्वं चोक्तं, "एगट्ठाणंमि देसहरं" इत्यनेन तु जघन्यसत्कर्मणि प्रागुक्तानां त्रयोदशप्रकृतीनां देशघातित्वमेकस्थानिकत्वं चेति कथं न विरोध इति चेत्? भिन्नकालत्वेन न दोषः, भिन्नकालत्वं च क्षीणकषायस्य समयाधिकावलिकाशेषायां स्थितौ वर्तमानस्य वेदद्विकवर्जैकादशप्रकृतीनां संक्रमो भवति, जघन्यानुभागसत्कर्म तु स्वान्तिमसमये, वेदद्विकस्य च जघन्यस्थितिसंक्रमे जघन्यानुभागसंक्रमः, अनुभागसत्कर्म तु स्वक्षपणान्तिमसमये इति। ननु मतिज्ञानावरणश्रुतज्ञानावरणचक्षुरचक्षुर्दर्शनावरणानामुत्कृष्टायां श्रुतलब्धौ वर्तमानस्य श्रुतकेवलिनः जघन्यानुभागसत्कर्म प्राप्यते, अवधिद्विकावरणस्य च परमावधेः जघन्यानुभागसत्कर्म प्राप्यते, तयोः कथं नैकस्थानिकरससंक्रमस्य संभवः? न च वाच्यं तयोः एतासां प्रकृतीनां जघन्यानुभागसंक्रमो न भवतीति, एतासामजघन्यसंक्रमस्य सादित्वप्राप्तेः, किञ्च जघन्यतोऽपि एकस्थानिकस्य बन्धः कथं च द्विस्थानिकरसस्य सत्तेति चेत्? सत्यम्, श्रुतकेवलिपरमावधिकौ श्रेणिबहिर्वर्तिनावत्र न गृहीतौ किन्तु क्षपकश्रेण्यारूढौ क्षीणमोहस्थानस्थौ, तेन न कोऽपि दोष इति कृता स्पर्द्धकप्ररूपणा।

अथोत्कृष्टरससङ्क्रमपरिमाणमुच्यते—प्रमाणं द्विविधं घातित्वप्रमाणं स्थानप्रमाणं च। तत्रोत्कृष्टानुभागसंक्रमे सम्यक्त्वमोहनीयं विहाय सर्वासां प्रकृतीनां सर्वघाती एव रसः संक्रामति, सम्यक्त्वस्य तु देशघातीनि रसस्पर्द्धकान्येव संक्रामन्ति। स्थानप्रमाणमाश्रित्य

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तु सम्यक्त्वस्य सर्वोत्कृष्टं द्विस्थानकरसोपेतं स्पर्द्धकपटलं यदा संक्रामति तदा तस्योत्कृष्टानुभागसंक्रमो भवति, त्रिस्थानकरसस्पर्द्धकानि चतुःस्थानकरसस्पर्द्धकानि च न भवन्तीत्युक्तमेव, मिश्रस्य सर्वोत्कृष्टं द्विस्थानिकरसोपेतं स्पर्द्धकं यदा संक्रामति तदोत्कृष्टानुभागसंक्रमः, शेषस्याभावात् । तिर्यङ्मनुजायुरातपानामपि सर्वोत्कृष्टं द्विस्थानिकरसोपेतं स्पर्द्धकपटलं यदा संक्रामति, तदोत्कृष्टानुभागसंक्रमो भवति, त्रिस्थानिकचतुःस्थानिकस्पर्द्धकानां बन्धमाश्रित्य सद्भावमाश्रित्य च संभवेऽपि तथास्वाभाव्यात् सङ्क्रमाभाव इति । शेषाणां सर्वासां प्रकृतीनां सर्वोत्कृष्टः चतुःस्थानको रसो यदा संक्रामति तदा तासामुत्कृष्टानुभागसंक्रमो भवति । उक्तमुत्कृष्टानुभागसंक्रमपरिमाणम् ॥

उत्कृष्टानुभागसंक्रमप्रमाणम्

प्रकृतीनां	स्थानप्रमाणं	घातिप्रमाणं
सम्यक्त्वस्य	२	देशघाति
मिश्रस्य नरायुस्तिर्यगायुरातपानां च	२	सर्वघाति
उक्तशेषाणां	४	,,

अधुना जघन्यानुभागसंक्रमपरिमाणमुच्यते—तत्र घातित्वमाश्रित्य सम्यक्त्वपुंवेदसंज्वलनानां जघन्यरससंक्रमो देशघाती भवति, शेषाणां सर्वासामपि प्रकृतीनां जघन्यतोऽपि सर्वघातिरस एव संक्रामति । स्थानप्रमाणमाश्रित्य सम्यक्त्वस्य सर्वविशुद्ध एकस्थानिकरसः यदा संक्रामति तदा स तस्य जघन्यानुभागसङ्क्रमो भवति । पुरुषवेदसंज्वलनानां च क्षपणकाले यानि समयोनावलिकाद्विकबद्धान्येकस्थानिकरसोपेतानि सर्वजघन्यस्पर्द्धकानि तानि यदा संक्रामन्ति तदा स तेषां जघन्यानुभागसंक्रमो भवति । शेषाणां तु सर्वासां प्रकृतीनां स्वप्रायोग्यसर्वजघन्यानि द्विस्थानिकरसोपेतानि यदा संक्रामन्ति तदा तासां जघन्यरससंक्रमो भवति । ननु मतिश्रुतावधिमनःपर्यवज्ञानावरणचक्षुरचक्षुरवधिदर्शनावरणान्तरायपञ्चकमिति द्वादशप्रकृतीनां बन्धे एकस्थानिकरसस्यापि संभवेन संक्रमे कथमेकस्थानिकरसो न प्राप्यते इति चेत्? सत्यम्, परं क्षयकाले पूर्वबद्धद्विस्थानिकरसस्यापि संक्रमाच्छुद्धस्यैकस्थानिकस्य चासंक्रमेण संक्रमविषयतया एकस्थानिकरसस्यासंभवः । उक्तं जघन्यानुभागसङ्क्रमपरिमाणम् ॥

जघन्यानुभागसंक्रमप्रमाणम्

प्रकृतीनां	स्थानप्रमाणं	घातिप्रमाणं
सम्य० पुं० संज्व० ४	१	देशघाति
उक्तशेषाणां	२	सर्वघाति

अथ साद्यनादिप्ररूपणा क्रियते—सा द्विधा, मूलप्रकृतिविषया उत्तरप्रकृतिविषया च । तत्र ज्ञानावरणदर्शनावरणान्तरायाणामजघन्यानुभागसङ्क्रमस्त्रिविधः, तद्यथा—अनादिरध्रुवो ध्रुवश्चेति । तथाहि—एतासां जघन्यानुभागसङ्क्रमः क्षीणमोहस्य समयाधिकावलिकाशेषायां स्थितौ प्राप्यते, स च सादिरध्रुवश्च, तदन्यः सर्वोऽप्यजघन्यः, स चानादिः, ध्रुवाध्रुवौ अभव्यभव्यापेक्षया । मोहनीयस्याजघन्यानुभागसंक्रमश्चतुर्विधः, तद्यथा—सादिरना-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

दिर्ध्रुवोऽध्रुवश्च । तथाहि–मोहनीयस्य जघन्यानुभागसङ्क्रमः सूक्ष्मसम्परायस्य क्षपकस्य समयाधिकावलिकाशेषायां स्थितौ भवति, स च सादिरध्रुवश्च, तदन्यः सर्वोऽप्यजघन्यः, स च क्षायिकसम्यग्दृष्टेरुपशमश्रेण्यां वर्तमानस्योपशान्तमोहे न भवति, ततः प्रतिपाते च भवति, ततोऽसौ सादिः तत्स्थानमप्राप्तस्य त्वनादिः ध्रुवाध्रुवौ अभव्यभव्यापेक्षया । आयुषोऽनुत्कृष्टोऽनुभागसङ्क्रमश्चतुर्विधः, तद्यथा–सादिरनादिर्ध्रुवोऽध्रुवश्च, तथाहि–अप्रमत्ते देवायुष उत्कृष्टानुभागं बद्ध्वा बन्धावलिकायामतीतायां संक्रमयितुमारभमाणस्तं तावत्कालं संक्रमयति यावद्देवभवे स्थितस्य देवायुषस्त्रयस्त्रिंशत्सागरोपमाण्यतिक्रामन्ति, आवलिकामात्रस्थितिश्चावतिष्ठते, ततोऽन्यः सर्वोऽप्यनुभागसङ्क्रमोऽनुत्कृष्टः, स च सादिः, तत्स्थानमप्राप्तस्यानादिः, ध्रुवाध्रुवौ पूर्ववदिति । वेदनीयगोत्रनाम्नामनुत्कृष्टानुभागसंक्रमस्त्रिविधः, तद्यथा–अनादिः, अध्रुवः, ध्रुवश्च, तथाहि–क्षपकश्रेण्यां वर्तमानः सूक्ष्मसम्परायचरमसमये एतेषां कर्मणामुत्कृष्टानुभागं बद्ध्वा बन्धावलिकायामतीतायां सत्यां तावत्संक्रामति यावत्सयोगिगुणस्थानचरमसमयः, स च सादिरध्रुवश्च, ततोऽन्यः सर्वोऽप्यनुत्कृष्टः, स चादेरभावादनादिः ध्रुवाध्रुवौ पूर्ववत् । चतुर्णां घातिकर्मणामुत्कृष्टानुत्कृष्टजघन्यविकल्पाः सादयोऽध्रुवाश्च । तत्र जघन्यानुभागसंक्रमोऽजघन्यानुभागसंक्रमप्रसङ्गे भावित एव । उत्कृष्टानुभागसङ्क्रमो मिथ्यादृष्टेः प्रतिनियतकाल एव भवति, अन्यदा तु मिथ्यादृष्टेरप्यनुत्कृष्टानुभागसंक्रमो भवतीत्येतौ साद्यध्रुवौ । चतुर्णामघातिकर्मणामनुत्कृष्टानुभागसङ्क्रम उक्तः । जघन्याजघन्योत्कृष्टानुभागसंक्रमास्तु सादयोऽध्रुवाश्च । तत्रोत्कृष्टानुभागसंक्रमः सादिरध्रुवश्च प्रागेव भावितः । जघन्यानुभागसंक्रमस्तु सूक्ष्मस्यापर्याप्तस्य हतप्रभूतानुभागसत्कर्मण एकेन्द्रियस्य भवति, नान्यस्य, प्रभूतानुभागसत्कर्मघाताभावे तु तस्याप्यजघन्यः किं पुनरन्यस्येत्येतौ द्वावपि साद्यध्रुवौ । कृता मूलप्रकृतीनां साद्यनादिप्ररूपणा ।

अथोत्तरप्रकृतीनां सैव क्रियते–अनन्तानुबन्धिचतुष्कसंज्वलनचतुष्कनोकषायनवकलक्षणानां सप्तदशप्रकृतीनामजघन्यानुभागसङ्क्रमश्चतुर्विधः, तद्यथा–सादिरनादिर्ध्रुवोऽध्रुवश्च । तत्रानन्तानुबन्धिनामुद्वलनासंक्रमेणोद्वल्य भूयोऽपि मिथ्यात्वप्रत्ययेन बद्धानां बद्धावलिकायामतीतायां सत्यां द्वितीयावलिकाद्यसमये जघन्यानुभागसंक्रमो लभ्यते, शेषाणां त्रयोदशप्रकृतीनां तु स्वस्वक्षयपर्यवसाने जघन्यस्थितिसंक्रमकाले जघन्यानुभागसंक्रमो भवति, स च सादिरध्रुवश्च एतदन्यस्त्वजघन्यानुभागसंक्रमः, स चोपशमश्रेण्यामुपशान्तानां न भवति, ततः प्रतिपाते च भवतीति सादिः, तत्स्थानमप्राप्तस्यानादिः, ध्रुवाध्रुवौ अभव्यभव्यापेक्षया । तथा ज्ञानावरणपञ्चकस्त्यानर्द्धित्रिकवर्जदर्शनावरणषट्कान्तरायपञ्चकरूपाणां षोडशप्रकृतीनामजघन्यानुभागसङ्क्रमः त्रिप्रकारः, तद्यथा–अनादिरध्रुवो ध्रुवश्च । तथाहि–एतासां मध्ये निद्राद्विकवर्जानां चतुर्दशप्रकृतीनां जघन्यानुभागसङ्क्रमः क्षीणमोहस्य समयाधिकावलिकाशेषायां, निद्राद्विकस्य तु आवलिकासंख्येयभागाधिकावलिकाद्विकशेषायां स्थितौ वर्तमानस्य प्राप्यते, स च सादिरध्रुवश्च, ततोऽन्यः सर्वोऽप्य-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

जघन्यः, स चादेरभावादनादिः, ध्रुवाध्रुवौ अभव्यभव्यापेक्षया। सातवेदनीयपञ्चेन्द्रियजातितैजससप्तकसमचतुरस्रसंस्थानशुभवर्णाद्येकादशकागुरुलघूच्छ्वासपराघातप्रशस्तविहायोगतित्रसबादरपर्याप्तप्रत्येकस्थिरशुभसौभाग्यसुस्वरादेययशःकीर्तिनिर्माणरूपाणां षट्त्रिंशत्प्रकृतीनामनुत्कृष्टोऽनुभागसङ्क्रमः सादिवर्जत्रिविधः, तथाहि–एतासां प्रकृतीनां क्षपकश्रेण्यां वर्तमानः स्वस्वबन्धव्यवच्छेदकाले उत्कृष्टानुभागं बध्नाति, ततो बन्धावलिकायामतिक्रान्तायां सत्यां संक्रमयितुमारभते, तं च तावत्संक्रमयति यावत्सयोगिचरमसमयः, स च सादिरध्रुवश्च, तदन्यः सर्वोऽप्यनुभागसंक्रमोऽनुत्कृष्टः, स चादेरभावादनादिः, ध्रुवाध्रुवौ पूर्ववत्। प्रथमसंहननोद्योतौदारिकसप्तकरूपाणां नवानां प्रकृतीनामनुत्कृष्टोऽनुभागसंक्रमश्चतुर्विधः, तद्यथा–सादिरनादिर्ध्रुवोऽध्रुवश्च। तथाहि–एतासामुद्योतवर्जानामष्टानां प्रकृतीनामत्यन्तविशुद्धपरिणामः सम्यग्दृष्टिर्देव उत्कृष्टानुभागं बद्ध्वा बन्धावलिकायामतीतायां संक्रमयति, स चोत्कृष्टानुभागसंक्रमः सादिरध्रुवश्च, तदन्यः सर्वोऽप्यनुत्कृष्टोऽनुभागसंक्रमः, स च उत्कृष्टानुभागसंक्रमतः प्रतिपाते भवत्सादिः तत्स्थानमप्राप्तस्यानादिः, ध्रुवाध्रुवौ पूर्ववत्। उद्योतनाम्नस्तु सप्तमक्षितेर्नैरयिको मिथ्यादृष्टिः सम्यक्त्वं प्रतिपित्सुरुत्कृष्टानुभागं बध्नाति, बन्धावलिकायामतीतायां तावत् संक्रमयति, यावत्, जघन्यतोऽन्तर्मुहूर्तमुत्कृष्टतो द्वे षट्षष्टी सागरोपमाणां स च सादिरध्रुवश्च, यद्यपि सप्तमनरकपृथिव्यामन्तिमेऽन्तर्मुहूर्तेऽवश्यं मिथ्यात्वं गच्छति तथाप्यग्रेतनभवेऽन्तर्मुहूर्तानन्तरं यः सम्यक्त्वं प्रतिपत्स्यते स इह गृह्यते, ततोऽन्तराले स्तोकं मिथ्यात्वकालं तस्याविवक्षितत्वात् द्वे षट्षष्टी सागरोपमाणामित्युक्तम्, उत्कृष्टानुभागसंक्रमात् प्रतिपततोऽनुत्कृष्टानुभागसंक्रमः, स च सादिः, तत्स्थानमप्राप्तस्यानादिः ध्रुवाध्रुवौ प्रागिव। प्रागुक्तानां सप्तदशप्रकृतीनां षोडशप्रकृतीनां चोत्कृष्टानुभागसंक्रमः उत्कृष्टसंक्लेशे वर्तमानस्य मिथ्यादृष्टेः प्राप्यते, शेषकालं तु मिथ्यादृष्टेरप्यनुत्कृष्ट एवेत्येतौ द्वावपि साद्यध्रुवौ, जघन्यस्तु भावित एव। तथा षट्त्रिंशत्प्रकृतीनां नवकस्य चोत्कृष्टानुभागसंक्रमः प्रागेव भावितः, जघन्यस्तु सूक्ष्मैकेन्द्रियस्य हतप्रभूतानुभागसत्कर्मणः प्राप्यते, प्रभूतानुभागसत्कर्मघाताभावे तु तस्याप्यजघन्यानुभागसंक्रमो लभ्यत इत्येतौ द्वावपि साद्यध्रुवौ। वैक्रियसप्तकदेवमनुजत्रिकातपतीर्थकराहारकसंसकोच्चैर्गोत्रतिर्यगायुर्लक्षणानां शुभानां चतुर्विंशतिप्रकृतीनां विशुद्धौ, स्त्यानर्द्धित्रिकासातवेदनीयदर्शनमोहनीयत्रिकमध्यमकषायाष्टकनरकत्रिकतिर्यग्द्विकाद्यजातिचतुष्कप्रथमवर्जसंहननपञ्चकप्रथमवर्जसंस्थानपञ्चकाशुभवर्णादिनवकाप्रशस्तखगत्युपघातस्थावरदशकनीचैर्गोत्ररूपाणामशुभानां षट्पञ्चाशत्प्रकृतीनां चोत्कृष्टे संक्लेशे वर्तमानः संज्ञिपञ्चेन्द्रियः पर्याप्त उत्कृष्टानुभागं बध्नाति, ततो बन्धावलिकायामतीतायां संक्रामति, तथाविधविशुद्धिसंक्लेशाभावे त्वनुत्कृष्टानुभागं बध्नाति, तथैव पुनः संक्रमयतीति द्वावपि साद्यध्रुवौ। जघन्यानुभागसंक्रमस्तु सूक्ष्मैकेन्द्रियस्य हतप्रभूतसत्कर्मणो लभ्यते, प्रभूतानुभागसत्कर्मघाताभावे तु तस्याप्यजघन्यानुभागसंक्रम इत्येतावपि द्वौ साद्यध्रुवौ। कृता साद्यादिप्ररूपणा।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

मूलप्रकृतिष्वनुभागसंक्रमस्य साद्यादिभंगयन्त्रम् ।

प्रकृतीनां	अजघन्यः				जघन्यः				अनुत्कृष्टः				उत्कृष्टः			
	सादिः	अध्रुवः	अना०	ध्रुवः	सादिः	अध्रुवः	अना०	ध्रुवः	सादिः	अध्रु०	अना०	ध्रु०	सादिः	अध्रु०	अना०	ध्रु०
ज्ञाना०दर्शना० विघ्नानां	—	भव्यानां	अक्षीणमोहानां	अभव्या०	१२ मे. समयाधिकाव०शेषे	सादित्वात्	—	—	उत्कृष्टादागतानां प्रथमसमये	सादित्वात्	—	—	नियतकालत्वात्	सादित्वात्	—	—
मोहस्य	११ तः पतितक्षायिकसम्य०	,,	सादिस्थानाप्राप्ता०	,,	क्षप. १०मे समयाधिकाव० शेषे	,,	—	—	,,	,,	—	—	,,	,,	—	—
आयुषः	अहतप्रभूतानुभागानां	सादित्वात्	—	—	हतप्रभूतानुभागजीवानां	,,	—	—	उत्कृष्टादन्येषां बन्धका०	भव्यानां	साद्यप्राप्तानां	अभव्यानां	उ.सत्ताकानां मनुजानामनुत्तराणां च	,,	—	—
नामगोत्रवेदनीयानां	,,	,,	—	—	,,	,,	—	—	,,	,,	आदेरभावात्	,,	क्षपकाणां १२–१३मे	,,	—	—

उत्तरप्रकृतिष्वनुभागसंक्रमस्य साद्यादिभंगयन्त्रम् ।

प्रकृतीनाम्	अजघन्यः				जघन्यः				अनुत्कृष्टः				उत्कृष्टः			
	सादिः	अध्रु०	अना०	ध्रुवः	सादिः	अध्रुवः	अना०	ध्रुवः	सादिः	अध्रुवः	अना०	ध्रुवः	सादिः	अध्रु०	अना०	ध्रुवः
९ नोक० संज्व० ४ नाम्	उप० श्रेणितः पतितानां	भ०	साद्यप्राप्तानां	अभव्या०	स्वस्वक्षयसमये	सादित्वात्	—	—	उत्कृष्टानुभागसंक्रमात्पतितानां	सादित्वात्	—	—	उत्कृ०संक्लेशानां सिथ्यादृशां	सादित्वात्	—	—

अनन्तानु० ४ नाम्	,,	,,	,,	,,	पुनर्बन्धद्वितीयावलिकाद्यसमये	,,	—	—	,,	,,	—	—	,,	,,	—	—
ज्ञाना. ५–दर्श. ६–अन्त० ५ नाम्	—	,,	आदेरभावात्	,,	१२ मा: समयाधिकाव० शेषे	,,	—	—	,,	,,	—	—	,,	,,	—	—
सात–पंचें–तै० ७–समच–शुभ वर्णादि ११–अगु०–उच्छ्वा०–परा०–सुखग–त्रसादि १०–निर्माणानां (३१)	अहतप्रभूतानुभागसत्ताकानां	सादित्वात्	—	० —	हतप्रभूतानुभागसत्कर्मसूक्ष्मैकेंद्रियाणां	,,	—	—	—	भव्यानां	क्षपकसयोगिवर्जशेषाणां	अभव्यानां	स्वस्वक्षपककालात् सयोगिगुणपर्यन्तं वर्त्तमानानां	,,	—	—
वज्रर्ष०–औदा० ७ नाम्	,,	,,	—	—	,,	,,	—	—	उ०संक्रमास्पतितानां	,,	साद्यप्राप्तस्य	,,	अतिविशुद्धसम्य० देवानां	,,	—	—
उद्योतस्य	,,	,,	—	—	,,	,,	—	—	,,	,,	,,	,,	सम्य०अभिमुखसप्तमनारकाणां	,,	—	—
वै० ७–देव २–उच्चैः–आत०–जिन–आहा० ७–मनु० २–शुभायु ३ नाम् (२४)	,,	,,	—	—	,,	,,	—	—	,,	,,	—	—	विशुद्धपर्या०संज्ञिपंचेन्द्रियाणां	,,	—	—
स्त्यानर्द्धित्रिकादि ५६ अशुभानामुक्तशेषाणां	,,	,,	—	—	,,	,,	—	—	,,	,,	—	—	संक्लिष्टपर्या०संज्ञिपंचेन्द्रिया०	,,	—	—

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri
Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अथ स्वामित्वमुच्यते—तदपि द्विविधं, तद्यथा—उत्कृष्टानुभागसङ्क्रमस्वामित्वं जघन्यानुभागसंक्रमस्वामित्वं च। तत्र पूर्वमुत्कृष्टानुभागसंक्रमस्वामित्वकालप्रमाणनियमः प्रतिपाद्यते—तत्र मिथ्यादृष्टिरुत्कृष्टसंक्लेशे वर्तमान उत्कृष्टानुभागं बद्ध्वा बन्धावलिकामतिक्रम्योत्कृष्टानुभागं तावत्संक्रमयति यावदन्तर्मुहूर्तं कालं तं न विनाशयति अन्तर्मुहूर्तात्परतस्त्ववश्यं मिथ्यादृष्टिः शुभप्रकृतीनां संक्लेशेन विशुद्ध्या त्वशुभप्रकृतीनामनुभागं विनाशयति, तदुक्तं—"उक्कोसगं पबंधिय आवलियमइच्छिऊण उक्कस्सं। जाव ण घाएइ तयं संकमइ आमुहुत्तंता" ॥ १ ॥ इति। अपवादमाह—आयुर्वर्जानां शुभानां षट्षष्टिप्रकृतीनां सम्यग्दृष्टिः, तथा सम्यक्त्वमिश्रयोर्मिथ्यादृष्टिः, क्षपणकालं वर्जयित्वा सम्यग्दृष्टिरपि न विनाशयति, तदुक्तं—"सम्मद्दिट्ठी ण हणइ सुहाणुभागं असम्मदिट्ठी वि। सम्मत्तमीसगाणं उक्कसं वज्जिया खवणं ॥२॥" इति। अतः स्वामित्वमुच्यते तत्र ज्ञानावरणपञ्चकदर्शनावरणनवकासातवेदनीमोहनीयाष्टाविंशतिनरकद्विकतिर्यग्द्विकाद्यजातिचतुष्टयानाद्यसंस्थानपञ्चकानाद्यसंहननपञ्चकाशुभवर्णादिनवकोपघाताप्रशस्तखगतिस्थावरदशकनीचैर्गोत्रान्तरायपञ्चकलक्षणानामष्टाशीतिसंख्याकानां प्रकृतीनामुत्कृष्टानुभागसंक्रमस्यासंख्येयवर्षायुष्कतिर्यङ्मनुजान् आनतादिदेवांश्च वर्जयित्वा सूक्ष्माऽपर्याप्तादयश्चतुर्गतिका अपि मिथ्यादृष्टयः स्वामिनो भवन्ति। असंख्येयवर्षायुषामानतादिदेवानां चोत्कृष्टसंक्लेशाभावेनोत्कृष्टानुभागबन्धाभावात् उत्कृष्टसंक्रमोऽपि न भवतीति तद्वर्जनम्। तथातपोद्योतमनुजद्विकौदारिकसप्तकप्रथमसंहननरूपाणां द्वादशसंख्याकानां प्रकृतीनां चतुर्गतिकाः सर्वेऽपि सूक्ष्मापर्याप्तादयोऽसंख्येयवर्षायुस्तिर्यग्मनुष्यमनुष्योपपातदेवसहिता मिथ्यादृष्टयः सम्यग्दृष्टयो वा स्वामिनो भवन्ति। तथाहि—सम्यग्दृष्टय आयुस्त्रिकवर्जसर्वासां शुभप्रकृतीनामुत्कृष्टमनुभागं न विघातयन्ति, किन्तु द्वे षट्षष्टी सागरोपमाणां यावदनुवर्तयन्ति, तत उत्कृष्टतो द्वे षट्षष्टी सागरोपमाणां यावदातपोद्योतवर्जदशानां प्रकृतीनामुत्कृष्टानुभागमविनाश्य पश्चात्सर्वत्र यथायोग्यं समुत्पद्यन्ते, ततो मिथ्यादृष्टिष्वप्येतासामेव दशानां प्रकृतीनामुत्कृष्टतोऽन्तर्मुहूर्तं यावदुत्कृष्टानुभागसंक्रमो लभ्यते। आतपोद्योतौ तु मिथ्यादृष्टिनैव बध्यमानत्वेन तत्र तयोरुत्कृष्टानुभागसंक्रमो नासंभवी, मिथ्यात्वात्प्रतिपत्य सम्यक्त्वं गते सम्यग्दृष्टावपि उत्कृष्टतो द्वे षट्षष्टी सागरोपमाणां यावदुत्कृष्टानुभागसंक्रमो लभ्यते, तयोः शुभप्रकृतित्वेन सम्यग्दृष्टेः सत उत्कृष्टानुभागाविनाशकत्वादिति द्वावप्युत्कृष्टानुभागसंक्रमस्वामिनौ। देवायुषोऽप्रमत्तयतिरुत्कृष्टानुभागं बध्नाति, नरकायुषो मिथ्यादृष्टिः संक्लिष्टाध्यवसाय उत्कृष्टानुभागं बध्नाति, मनुजतिर्यगायुषोः सुविशुद्धमिथ्यादृष्टिरुत्कृष्टानुभागं बध्नाति। बन्धावलिकायामतीतायां सत्यां यावन्निजायुषः समयाधिकावलिका शेषा तावत्संक्रमयति। तत आयुषामुत्कृष्टानुभागसंक्रमस्वामिनः सम्यग्दृष्टयो मिथ्यादृष्टयो वा प्राप्यन्ते। पञ्चसङ्ग्रहबृहद्वृत्तौ कर्मप्रकृतिवृत्तौ च "चतुर्णामप्यायुषामुत्कृष्टानुभागं बध्वा बन्धावलिकायामतीतायां सम्यग्दृष्टयो मिथ्यादृष्टयो वोत्कृष्टानुभागं संक्रमयन्ति" इत्यत्राप्ययमेव तात्पर्यार्थोऽवसीयते। सातवेदनीयदेवद्विकपञ्चेन्द्रियजातिवैक्रि-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

यसप्तकाहारकसप्तकतैजससप्तकसमचतुरस्रसंस्थानशुभवर्णाद्येकादशकप्रशस्तखगतिपराघातो-च्छ्वासागुरुलघुत्रसदशकनिर्माणतीर्थकरोच्चैर्गोत्ररूपाणां चतुःपञ्चाशत्सङ्ख्याकानां प्रकृतीनां स्वस्वबन्धव्यवच्छेदसमये उत्कृष्टानुभागं बद्ध्वा बन्धावलिकायामतीतायामुत्कृष्टानुभागसंक्रमं तावत्करोति यावत्सयोगिचरमसमयः। स्वस्वबन्धव्यवच्छेदस्योपरितनगुणस्थाने वर्तमानाः सर्वेऽपि सयोगिकेवलिपर्यवसाना उत्कृष्टानुभागसंक्रमस्वामिनो भवन्ति। अत्र पतद्ग्रहबन्धसमये प्रकृत्यन्तरनयनानुभागसंक्रमस्तदभावे त्वपवर्त्तनारूप एव, तदेवमुक्तमुत्कृष्टानुभागसंक्रमस्वामित्वम्।

उत्कृष्टानुभागसंक्रमस्वामिनः।

प्रकृतयः	स्वामिनः	उ० संक्रमसततकालः
नरकायुर्वर्जं ८८ अशुभानां	युगलिकानतादिवर्जा मिथ्यादृष्टयः सर्वे जीवभेदाः	अन्तर्मुहूर्तं यावत्
आत० -उद्यो० मनु० २- औदा० ७-वज्रर्ष० (१२)	सम्यग्दृशो मिथ्यादृशो वा सर्वे जीवभेदाः	१३२ सागराणि पर्यन्तं
४ आयुषाम्	उ० अनुभागबन्धकाः सम्यग्दृशो मिथ्यादृशोऽपि.	समयाधिकावलिकाशेषपर्यन्तं
५४ उक्तशेषाणां	क्षपकाः स्वस्वक्षयकालतः	क्षयकालादारभ्य सयोगिपर्यन्तं

अथ जघन्यानुभागसंक्रमस्वामित्वं प्रतिपादयन्नादौ जघन्यानुभागसंक्रमसंभवज्ञानोपायो दर्श्यते—तत्र संभविनीनां सर्वघातिप्रकृतीनां देशघातिप्रकृतीनां वाऽनुभागः क्षपकश्रेण्यामन्तरकरणादर्वाक् सूक्ष्मैकेन्द्रियानुभागसत्कर्मणोऽनन्तगुणो भवति, कृते त्वन्तरकरणे आद्यद्वादशकषायदर्शनमोहनीयत्रिकस्त्यानर्द्धित्रिकमित्यष्टादशवर्जैकोनत्रिंशत्प्रकृतीनां सूक्ष्मैकेन्द्रियसम्बन्धिनोऽप्यनुभागसत्कर्मणो हीनो भवति । तथाऽसातवेदनीयप्रथमवर्जसंहननपञ्चकप्रथमवर्जसंस्थानपञ्चकाशुभवर्णादिनवकोपघाताप्रशस्तखगत्यपर्याप्तास्थिराशुभदुर्भगदुःस्वरानादेयायशःकीर्तिनीचैर्गोत्ररूपाणां त्रिंशत्संख्याकानां प्रकृतीनामनुभागसत्कर्मासंज्ञिपञ्चेन्द्रियसम्बन्धिनोऽनुभागसत्कर्मणोऽनन्तगुणमनुभागसत्कर्म केवलिनो विद्यते। तथा च सति ज्ञानावरणपञ्चकदर्शनावरणषट्कान्तरायपञ्चकसंज्वलनचतुष्कनोकषायनवकरूपाणामेकोनत्रिंशत्प्रकृतीनामन्तरकरणे कृते सति क्षपकस्यैव जघन्यानुभागसङ्क्रमसंभवः। अनन्तानुबन्धिचतुष्कस्य विसंयोजनां कृत्वा मिथ्यात्वं गतस्य द्वितीयावलिकाप्रथमसमये जघन्यानुभागसंक्रमसंभवः। उक्तरूपाणां त्रिंशदशुभप्रकृतीनां जघन्यानुभागसंक्रमसंभवो न सयोगिकेवलिनि, किन्तु केवल्यपेक्षयाऽनन्तभागकल्पतदनुभागस्य हतप्रभूतानुभागसत्कर्मणः सूक्ष्मैकेन्द्रियादेर्द्रष्टव्य इति। अधुना जघन्यानुभागसंक्रमस्वामिन उच्यन्ते—ज्ञानावरणपञ्चकान्तरायपञ्चकनिद्रापञ्चकवर्जदर्शनावरणचतुष्करूपाणां चतुर्दशप्रकृतीनां क्षीणकषायः समयाधिकावलिकाशेषायां स्थितौ वर्तमानो जघन्यानुभागं संक्रमयति । निद्राद्विकस्य

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

त्वावलिकासंख्येयभागाधिकावलिकाद्विकशेषायां वर्तमानः क्षीणकषायो जघन्यानुभागं संक्रामति । सम्यक्त्वमिश्रयोः स्वस्वचरमानुभागखण्डसंक्रमणकाले जघन्यानुभागसंक्रमो भवति। नवानां नोकषायाणां संज्वलनचतुष्कस्य च क्षपकश्रेण्यां वर्तमानोऽन्तरकरणे कृते सति क्षपकक्रमेण जघन्यस्थितिसंक्रमणकाले जघन्यानुभागं संक्रमयति । चतुर्णामप्यायुषां जघन्यां स्थितिं बद्ध्वा बन्धावलिकायाः परतो यावत्समयाधिकावलिकाशेषा भवति तावज्जघन्यानुभागसंक्रमो लभ्यते, जघन्यां स्थितिं बध्नन् जघन्यमनुभागं बध्नातीति ज्ञापनार्थं जघन्यस्थितिबन्धग्रहणं कृतम् । नरकद्विकमनुजद्विकदेवद्विकवैक्रियसप्तकाहारकसप्तकोच्चैर्गोत्रलक्षणानामेकविंशत्युद्वलनप्रकृतीनां तीर्थकरनाम्नः संयोजनानां च जघन्यानुभागं बद्ध्वा बन्धावलिकायामतीतायां जघन्यानुभागं संक्रमयति । तत्र वैक्रियसप्तकदेवद्विकनरकद्विकानामसंज्ञिपञ्चेन्द्रियः, मनुजद्विकोच्चैर्गोत्रयोः सूक्ष्मनिगोदः, आहारकसप्तकस्याप्रमत्तः, तीर्थकरस्याविरतसम्यग्दृष्टिः, अनन्तानुबन्धिनां पश्चात्कृतसम्यक्त्वो मिथ्यादृष्टिः । शेषाणां शुभानामशुभानां च सप्तनवतिसंख्याकानां वायुकायिकोऽग्निकायिको वा सूक्ष्मैकेन्द्रियः प्रभूतविनाशितानुभागसत्कर्मा स्वसम्बन्ध्यनुभागसत्कर्मणो न्यूनतरमनुभागं यावत् बध्नाति तावदेकेन्द्रियभवे द्वीन्द्रियादिभवे वा वर्तमानो जघन्यमनुभागं संक्रमयन् जघन्यानुभागसङ्क्रमस्वामी भवतीति । तदेवमुक्तं जघन्यानुभागसंक्रमस्वामित्वम् । तदेवमभिहितोऽनुभागसंक्रम इति ।

जघन्यानुभागसंक्रमस्वामिनः ।

१ क्षपकस्यान्तरकरणादर्वाग् घात्यनुभागः सूक्ष्मैकेन्द्रियादनन्तगुणः

२ क्षपकस्यान्तरकरणे कृते घात्यनुभागः सूक्ष्मैकेन्द्रियाद्धीनः

३ ३० अघात्यशुभानुभागः केवलिनोऽसंज्ञिपञ्चेन्द्रियादनन्तगुणः

प्रकृतयः	स्वामिनः
घातिनः	ज० स्थि० संक्रमका अन्तरकरणादूर्ध्वं
९ नोक० ४ संज्व०	क्षपकाः ज० स्थि० संक्रमकाः ९ माः
ज्ञा०५–वि०५–दर्श० ४	क्षीणमोहाः समयाधिकाव० शेषे
निद्रा २	क्षी० आ० २ आ० असं० शेषे
सम्य० मिश्रयोः	क्षयकालेऽन्त्यखण्डसंक्रमकाः
आयु ४ र्णाम्	ज० स्थि० बन्धकाः
नरक २–देव २–वै० ७	ज० अनु० बन्धकाः असं० पञ्चें०
मनु० २–उच्चैः०	सूक्ष्मनिगोदाः
आहा० ७	अप्रमत्ताः
जिननाम्नः	अविरतसम्यग्दृशः
अनन्ता० ४	पश्चात्कृतसम्यक्त्वाः मिथ्यादृशः
९७ उक्तशेषाणां	हतप्रभूतानुभागसत्ताकावग्निवायुकायिकौ, अन्यभवेऽपि तावेव यावत् बृहदनुभागं न बध्नतः

समासोऽनुभागसङ्क्रमः ॥

१–१–पञ्चसंग्रहवृत्त्यादौ यादृशं दृष्टं तादृशं लिखितम्।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri



अथ प्रदेशसंक्रम उच्यते—तत्र च पञ्चार्थाधिकाराः, तद्यथा—सामान्यलक्षणम्, भेदः, साद्यनादिप्ररूपणा, उत्कृष्टप्रदेशसंक्रमस्वामी, जघन्यप्रदेशसंक्रमस्वामी च। तत्र भेदः पञ्चप्रकारः; तद्यथा—उद्वलनासंक्रमः, विध्यातसंक्रमः, यथाप्रवृत्तसंक्रमः, गुणसंक्रमः, सर्वसंक्रमश्चेति । एभिः पञ्चभिः संक्रमैः कर्मदलस्य स्वभिन्नप्रतिग्रहप्रकृतित्वेन परिणमनं प्रदेशसंक्रम इति सामान्यलक्षणं, उक्तो भेदः।

अथ पञ्चानामपि संक्रमाणां विशेषलक्षणमुच्यते, तत्राप्यादावुद्वलनासंक्रमो लक्ष्यते—तत्रोद्वलनयोग्यानां प्रकृतीनां प्रथमतः पल्योपमासङ्ख्येयभागमात्रमन्तर्मुहूर्तेन कालेन स्थितिखण्डमुत्कीर्यते, स्थित्यग्रभागवर्तिघनदलिकमध्यादल्पदलस्योत्तारणमुत्किरणं, तदेव चोद्वलनं व्यपदिश्यते। ततो द्वितीयं स्थितिखण्डं पल्योपमासङ्ख्येयभागमात्रमन्तर्मुहूर्तेन काले-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

नोत्कीर्यते, एवमन्तर्मुहूर्तेन कालेन तृतीयं स्थितिखण्डं पल्योपमासङ्ख्येयभागमात्रमुत्कीर्यते, एवमुपान्त्यस्थितिखण्डं यावद्वाच्यम् । प्रथमस्थितिखण्डाद्द्वितीयस्थितिखण्डं स्थित्यपेक्षया विशेषहीनं, ततोऽपि तृतीयस्थितिखण्डं द्वितीयस्थितिखण्डापेक्षया विशेषहीनं, ततोऽपि चतुर्थं स्थितिखण्डं पल्योपमासंख्येयभागमात्रं तृतीयात् स्थितिखण्डात् विशेषहीनमन्तर्मुहूर्तेन कालेनोत्कीर्यते । एवं प्रत्येकमन्तर्मुहूर्तेन कालेनोत्कीर्यमाणानि पल्योपमासंख्येयभागमात्राणि स्थितिखण्डानि पूर्वपूर्वस्थितिखण्डापेक्षया विशेषहीनानि विशेषहीनानि तावद्वाच्यानि यावत् द्विचरमस्थितिखण्डम् । एतानि च सर्वाण्यनन्तरोपनिधया स्थित्यपेक्षया पूर्वपूर्वस्थितिखण्डात् यथोत्तरमुत्तराणि स्थितिखण्डानि विशेषहीनानि विशेषहीनानि । परम्परोपनिधया तु प्रथमस्थितिखण्डापेक्षया कानिचित् स्थितिखण्डान्यसंख्येयभागहीनानि, कानिचित् संख्येयभागहीनानि, कानिचित् संख्येयगुणहीनानि, कानिचिदसंख्येयगुणहीनानीत्येवं चतुःस्थानपतितानि । प्रथमस्थितिखण्डं तु केषाञ्चित् खण्डानां स्थित्यपेक्षयाऽसंख्येयभागाधिकं, केषाञ्चिदपेक्षया संख्येयभागाधिकं, केषाञ्चिदपेक्षया संख्येयगुणाधिकं, केषाञ्चिदपेक्षयाऽसंख्येयगुणाधिकमिति । प्रदेशपरिमाणचिन्तायां तु प्रथमस्थितिखण्डगतप्रदेशापेक्षया द्वितीयस्थितिखण्डगतप्रदेशा विशेषाधिकाः, द्वितीयस्थितिखण्डगतप्रदेशापेक्षया तृतीयस्थितिखण्डगतप्रदेशा विशेषाधिकाः, एवमुपान्त्यस्थितिखण्डं यावद्वाच्यमित्युक्ताऽनन्तरोपनिधा । परम्परया तु प्रथमस्थितिखण्डगतप्रदेशापेक्षया किञ्चित् स्थितिखण्डं प्रदेशापेक्षयाऽसंख्येयभागाधिकं, किञ्चित्स्थितिखण्डं संख्येयभागाधिकं, किञ्चित्संख्येयगुणाधिकं, किञ्चिदसंख्येयगुणाधिकमिति चतुःस्थानपतितानि । स्थितिखण्डानामुत्करणविधिश्चायम्—उत्कीर्यमाणस्थितिखण्डान्तर्गतसर्वसमयेभ्यः प्रथमसमये स्तोकं दलिकमुत्कीर्यते, द्वितीयसमये ततोऽसंख्येयगुणं, तृतीयसमये ततोऽप्यसंख्येयगुणमेवमसंख्येयगुणं २ दलिकं तावदुत्कीर्यते यावत्स्वस्वान्तर्मुहूर्तचरमसमयः । गुणकारश्चात्र पल्योपमासंख्येयभागलक्षणो वाच्यः । उत्कीर्यमाणं च दलिकं किञ्चित्स्वस्थाने किञ्चिच्च परस्थाने प्रक्षिप्यते । उत्कीर्यमाणानां क्व कियान् प्रक्षेप इति चेदुच्यते—स्वस्थाने परस्थाने च । तत्र स्वस्थाने प्रतिसमयमसंख्येयगुणश्रेण्या प्रक्षिपति, परस्थाने प्रतिसमयं विशेषहीनं विशेषहीनं प्रक्षिपति । तथाहि—प्रथमे स्थितिखण्डे उत्कीर्यमाणे प्रथमसमये यत्परस्थाने प्रक्षिपति तत्सर्वस्तोकम्, ततोऽपि प्रथमसमये एव स्वस्थाने यत्प्रक्षिपति तत्प्रथमसमयपरस्थानप्रक्षिप्तादसंख्येयगुणं, ततोऽपि यद् द्वितीयसमये स्वस्थाने प्रक्षिपति तत्प्रथमसमयस्वस्थानप्रक्षिप्तादसंख्येयगुणं, द्वितीयसमये यत्परस्थाने प्रक्षिपति तत्प्रथमसमयपरस्थानप्रक्षिप्ताद्विशेषहीनं, ततोऽपि तृतीयसमये यत्स्वस्थाने प्रक्षिपति तद्द्वितीयसमयस्वस्थानप्रक्षिप्तादसंख्येयगुणं, यत्पुनः तृतीयसमये परस्थाने प्रक्षिपति तद्द्वितीयसमयपरस्थानप्रक्षेपात् विशेषहीनम्, एवं तावद्वाच्यं यावदन्तर्मुहूर्तचरमसमयः । एवं सर्वेष्वपि स्थितिखण्डेषूपान्त्यस्थितिखण्डपर्यवसानेषु वाच्यमिति । चरमस्थितिखण्डमुपान्त्यस्थितिखण्डात् स्थित्यपेक्षयाऽसंख्येयगुणं, प्रथमस्थितिखण्डाच्च दलिकापेक्षया चरमस्थितिखण्डम-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सङ्ख्येयगुणं स्थित्यपेक्षया चासंख्येयभागकल्पमिति । चरमस्थितिखण्डमप्यन्तर्मुहूर्तेन कालेनोद्वलयति । तस्य च यत्प्रदेशाग्रं तदुदयावलिकागतं मुक्त्वा शेषं सर्वमपि परस्थाने सङ्क्रामति, न स्वस्थाने, आवलिकागतं तूदयवतिषु स्तिबुकेन संक्रामति । तदपि प्रथमसमये स्तोकं द्वितीयसमयेऽसंख्येयगुणं ततोऽपि तृतीयसमयेऽसंख्येयगुणमेवं यावच्चरमसमयः । चरमसमये तु यद्दलिकं परप्रकृतिषु संक्रामति स सर्वसंक्रमः, संक्रमार्हस्य सर्वस्यापि दलिकस्य निर्लेपनात् । अथ चरमखण्डस्य प्रदेशपरिमाणमुच्यते—तत्र द्विधा मार्गणा, क्षेत्रतः कालतश्च । यावत्प्रमाणं द्विचरमस्थितिखण्डसत्कं दलिकं चरमसमये परप्रकृतिषु प्रक्षिप्यते तावत्प्रमाणं यदि चरमस्थितिखण्डस्य दलिकं प्रतिसमयमपह्रीयते तदा चरमस्थितिखण्डमसंख्येयाभिरुत्सर्पिण्यवसर्पिणीभिर्निर्लिप्यते, उपान्त्यस्थितिखण्डस्यान्तिमसमये यावन्तः प्रदेशाः स्वकीयान्तिमस्थितिखण्डरूपे स्वस्थाने प्रक्षिप्यन्ते, तावन्त एवान्तिमस्थितिखण्डस्य प्रदेशाः प्रतिसमयमपह्रीयमाणा अपह्रीयमाणाः पल्योपमासंख्येयभागमात्रेण कालेन निश्शेषा अपहृता भवन्ति इति कालतो मार्गणा । उपान्त्यखण्डस्य चान्तसमये यावन्तः प्रदेशाः परस्थाने प्रक्षिप्यन्ते तावत्प्रमाणेन मानेनैकत्र चरमस्थितिखण्डस्य कर्मदलिकमपह्रीयते अन्यत्रैकाकाशप्रदेश इत्येवमपहारे क्रियमाणे चरमस्थितिखण्डमङ्गुलमात्रक्षेत्रगताकाशप्रदेशराशेरसंख्येयतमेन भागेनापहृतं भवति । द्विचरमस्थितिसत्कपरस्थानप्रक्षिप्यमाणप्रदेशसमूहपरिमितानि चरमस्थितिखण्डे खण्डुकानि अङ्गुलासंख्येयतमभागगतप्रदेशप्रमाणानि भवन्तीत्यर्थः, एषा क्षेत्रतो मार्गणा । तदुक्तं पञ्चसङ्ग्रहे—"पलियस्ससंखभागं अन्तमुहुत्तेण ठिईए उव्वलइ । एवं पलियासंखियभागेण कुणइ निल्लेवं ॥ १ ॥ पढमाओ बीयखण्डं विसेसहीणं ठिईए अवणेइ । एवं जाव दुचरिमं असंखगुणियं तु अन्तिमयं ॥ २ ॥ खण्डं दलं सट्ठाणे समए समए असंखगुणणाए । सेढीए परट्ठाणे विसेसहीणाए संछुभइ ॥ ३ ॥ दुचरिमखंडस्स दलं चरिमे जं एइ सपरट्ठाणंमि । तम्माणेणस्स दलं पल्लंगुलसंखभागेहिं ॥ ४ ॥" इति । आहारकसप्तकदेवद्विकवैक्रियसप्तकनरकद्विकमनुजद्विकोच्चैर्गोत्रसम्यक्त्वमिथ्यात्वमिश्रानन्तानुबन्धिचतुष्कमध्यमकषायाष्टकनवनोकषायस्त्यानर्द्धित्रिकनामत्रयोदशकसंज्वलनक्रोधमानमायारूपाणां चतुःषष्टिप्रकृतीनामुद्वलनासंक्रमो भवति । तत्राहारकसप्तकसत्कर्माविरतिभावगमनादारभ्यान्तर्मुहूर्तात्परत आहारकसप्तकमुद्वलयति, तच्च सर्वथा पल्योपमासंख्येयतमेन भागेन निर्लेपीभवति, तदुक्तं—"आहारतणू भिन्नमुहुत्ता अविरइगओ पउव्वलए । जा अविरओ त्ति उव्वलइ पल्लभागेऽसंखतमे" ॥ १ ॥ इति । पूर्वोक्तविधिनाहारकसप्तकस्यान्तर्मुहूर्तेनान्तर्मुहूर्तेन कालेन पल्योपमासंख्येयभागमात्रं पल्योपमासंख्येयभागमात्रं स्थितिखण्डमुत्किरति, पूर्वपूर्वस्थितिखण्डादुत्तरोत्तरस्थितिखण्डमूनमूनतरं द्विचरमस्थितिखण्डं यावदुत्किरति । प्रथमस्थितिखण्डापेक्षयोपान्त्यस्थितिखण्डमसङ्ख्येयगुणहीनम् । प्रक्षेपविधिस्तु द्विचरमस्थितिखण्डं यावत् स्वस्थाने प्रतिसमयमसंख्येयगुणं, परस्थाने विशेषहीनं विशेषहीनं दलं प्रक्षिपतीति । आहारकसप्तकस्य चरमस्थितिखण्डसत्कदलिकप्रक्षेपविधिरपि प्राग्वत् वाच्यः । अष्टाविंशतिसत्कर्मा मिथ्यादृष्टिः पूर्वं सम्य-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri



॥ उद्वलनासंक्रमस्य चित्रम् ॥

क्त्वमोहनीयं ततो मिश्रमोहनीयं पूर्वोक्तविधिनोद्वलयति। एवमेकेन्द्रियः पञ्चनवतिसत्कर्मा पूर्वं देवद्विकं, ततोऽनन्तरं वैक्रियसप्तकं नरकद्विकं च युगपदुद्वलयति। तथा सूक्ष्मत्रसस्तेजस्कायिको वायुकायिको वा पूर्वमुच्चैर्गोत्रं, ततः पश्चात् मनुजद्विकमुद्वलयति। एषा पल्योपमासंख्येयभागमात्रकालभाविनी मिथ्यादृष्टिकर्तृकोद्वलनोक्ता। अथ सम्यग्दृष्टिसत्कोच्यते—तत्रानन्तानुबन्धिचतुष्कमिथ्यात्वमिश्राणामन्तर्मुहूर्त्तेन कालेन स्वस्वक्षपकोऽविरतसम्यग्दृष्टिर्देशविरतः प्रमत्तसंयतोऽप्रमत्तसंयतो वोद्वलको वाच्यः। मध्यमकषायाष्टकादीनां षट्त्रिंशत्प्रकृतीनां स्वस्वक्षपणकालेऽनिवृत्तिबादरोऽन्तर्मुहूर्तकालेनोद्वलयति। एषाऽन्तर्मुहूर्तकालभाविनी सम्यग्दृष्टिकर्तृकोद्वलनेति उक्त उद्वलनासंक्रमः।

अथ विध्यातसंक्रमलक्षणमुच्यते—यासां प्रकृतीनां भवप्रत्ययतो गुणप्रत्ययतो वा बन्धो न भवति तासां विध्यातसंक्रमो भवति। कासां प्रकृतीनां भवतो गुणतो वा

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

उद्वलनासंक्रमस्य यन्त्रम् ।

प्रकृतीनाम्	उद्वलनस्वामिनः	उद्वलनकालः
(मिथ्यादृशां २३ तीनां) आहा० ७ नां	अविरताः	पल्यासंख्येयभागः
सम्यक्त्वस्य	२८ मोहसत्ताकमिथ्यादृशः	,,
मिश्रस्य	,,	,,
देव २ कस्य (युगपत्)	आहा० जिनवर्ज ९५ नामसत्ताका एकेन्द्रियाः	,,
वैक्रिय ७ } नरक २ } युगपत्	,,	,,
उच्चैर्गोत्रस्य	अग्निवायुकायिकौ	,,
नरद्विकस्य	,,	,,
(सम्यग्दृशांतां ४२) स्त्यानर्द्धि ३	९ मे क्षपकाः	अन्तर्मुहूर्त्तं
स्था०–सू०–तिर्य० २ नरक २–आतप–उद्योत–एके०–विकल३ –साधा० (१३)	,,	,,
मध्यकषाय ८	,,	,,
नोकषाय ९	,,	,,
सं०क्रो०–मान–माया	,,	,,
मिथ्यात्वस्य	४–५–६–७गुणस्थाः	,,
मिश्रस्य	,,	,,
अनन्ता० ४ णाम्	,,	,,

सर्वत्र दलिकनिक्षेपः स्वस्मिन् परस्मिन् च, तत्रापि स्वस्मिन् प्रतिसमयमसंख्येयगुणनया परस्मिन् च विशेषहान्या उपान्त्यस्थितिखण्डं यावत्, अन्त्यस्थितिखण्डस्य दलिकमसं० गुणनया परस्मिन्नेव, एकस्य स्थितिखण्डस्योत्किरणकालोऽन्तर्मुहूर्त्तम्, अस्य बाधकः सर्वसंक्रमः सर्वान्त्यसमये भवति ।

बन्धो न भवतीति चेत्? उच्यते–नरकत्रिकाद्यजातिस्थावरचतुष्कहुण्डातपसेवार्तसंहननमिथ्यात्वनपुंसकवेदरूपाः षोडशप्रकृतीः सास्वादनाः गुणप्रत्ययतो न बध्नन्ति, अत एतासां सास्वादनादिषु विध्यातसंक्रमो भवति । तत्रापि नरकायुषः संक्रम एव न भवति, आयुषां प्रकृत्यन्तरनयनरूपसंक्रमस्य प्रागेव प्रतिषेधात्, नापि मिथ्यात्वस्य, "दुइय तइया न दंसणतिगंपि" इत्यनेन द्वितीये तृतीये च प्राक् प्रतिषेधात्, चतुर्दशानामेव विध्यातसंक्रमो भवति । सम्यग्दृष्ट्यादौ तु मिथ्यात्वस्याऽपि विध्यातसंक्रमो भवति । स्त्यानर्द्धित्रिकतिर्यक्त्रिकदौर्भाग्यत्रिकानन्तानुबन्धिचतुष्कमध्यमसंस्थानमध्यमसंहननोद्योताशुभविहायोगतिस्त्रीवेदनीचैर्गोत्ररूपाः पञ्चविंशतिः प्रकृतयो मिश्रादौ बन्धं नायान्ति, विध्यातसंक्रमे तु तिर्यगायुर्वर्जाश्चतुर्विंशतिः प्रकृतयः, सास्वादनोक्ताश्चतुर्दश प्रकृतय उभयमिलनेऽष्टात्रिंशत् मिश्रे प्राप्यन्ते । अविरतसम्यग्दृष्टौ तु मिथ्यात्वमिश्रयुताश्चत्वारिंशद् विध्यातसंक्रमे प्राप्यन्ते । प्रथमसंहननौदारिकद्विकमनुजत्रिकाप्रत्याख्यानकषायचतुष्करूपा दश प्रकृतयो देशविरतादौ बन्धं नायान्ति, विध्यातसंक्रमे तु मनुष्यायुर्वर्जा नव, प्रागुक्ताश्चत्वारिंशत्, उभय-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मिलने एकोनपञ्चाशत्प्रकृतयो देशविरते प्राप्यन्ते, औदारिकसप्तकग्रहणे तु चतुःपञ्चाशदिति। प्रत्याख्यानावरणचतुष्कं प्रमत्तादौ न बन्धमायाति, अतस्तद्युता विध्यातसंक्रमेऽष्टपञ्चाशत् प्रकृतयः प्रमत्ते प्राप्यन्ते। अरतिशोकासातवेदनीयास्थिरद्विकायशःकीर्तिदेवायूरूपाः सप्त देवायुर्वर्जा वा षट् प्रकृतयोऽप्रमत्तादौ बन्धं नायान्ति, विध्यातसंक्रमे तु षड् विद्यन्ते, अतोऽप्रमत्ते चतुःषष्टिः प्राप्यते। अपूर्वकरणे निद्राद्विकबन्धव्यवच्छेदादर्वाक् मिथ्यात्वमिश्रानन्तानुबन्धिचतुष्कातपोद्योतमनुजद्विकौदारिकसप्तकप्रथमसंहननरूपाष्टादशवर्जशेषषट्चत्वारिंशत्प्रकृतीनां गुणसंक्रमत्वेन न विध्यातसंक्रमः, अनन्तानुबन्धिनां क्षीणत्वेनोपशान्तत्वेन वा संक्रमाभावः, शेषचतुर्दशप्रकृतीनां विध्यातसंक्रमः, सातोच्चैर्गोत्रवर्जशेषबध्यमानानां तु वक्ष्यमाणो यथाप्रवृत्तसंक्रमः, एवं सर्वत्र बन्धव्यवच्छेदादर्वाग् बन्धेऽबन्धे वा यथाप्रवृत्तसंक्रमो द्रष्टव्यः। सातोच्चैर्गोत्रयोः प्रतिग्रहाभावान्न संक्रमः। सम्यक्त्वस्य तु सम्यग्दृष्टेः परप्रकृतिनयनरूपसंक्रम एव न भवति। आयुषां संक्रमाभावः प्राक् प्रतिपादित एव। निद्राद्विकबन्धव्यवच्छेदे तु गुणसंक्रमे तद्द्विकं प्रक्षेपणीयम्, यथाप्रवृत्तसंक्रमे च द्विकोनं कर्तव्यम्। त्रिंशद्बन्धव्यवच्छेदे तु गुणसंक्रमे उपघाताशुभवर्णादिनवकं प्रक्षिप्यते, वैक्रियसप्तकाहारकसप्तकतैजससप्तकशुभवर्णाद्येकादशकदेवद्विकागुरुलघुपराघातोच्छ्वासनिर्माणतीर्थकरशुभविहायोगतित्रसनवकप्रथमसंस्थानपञ्चेन्द्रियजातिरूपैकपञ्चाशत् प्रागुक्ता च चतुर्दशोभयमिलने पञ्चषष्टिप्रकृतीनां विध्यातसंक्रमो यद्यपि अपूर्वकरणे नोक्तः, तथापि एकस्यां यशःकीर्तौ व्युत्तरशतसत्स्थानस्य संक्रम्यमाणत्वेनैतासां संक्रमस्तु संभवत्येव, स च न यथाप्रवृत्तसंक्रमः, गुणप्रत्ययतो भवप्रत्ययतो वा बन्धाभावात्, नापि गुणसंक्रमः, प्रशस्तत्वात्, आसां नाप्युद्वलनासंक्रमः, श्रेणौ तु एतासामुद्वलनासंक्रमेऽनुक्तत्वात्, यद्यप्यातपोद्योतयोरुद्वलनासंक्रम उक्तः, तथापि तत्स्वामी अनिवृत्तिकरणः, नापूर्वकरणः, नापि सर्वसंक्रमः, उद्वलनासंक्रमचरमप्रक्षेपे तस्याऽभिधानात्, ततः परिशेषात् विध्यातसंक्रमः संभाव्यते। सातवेदनीयोच्चैर्गोत्रयशःकीर्तिवर्जशेषबध्यमानानां यथाप्रवृत्तसंक्रमः। अनिवृत्तिकरणेऽप्येवमेव, नवरमातपोद्योतयोः क्षपकश्रेण्यामुद्वलनासंक्रमोऽपि वक्तव्यः। हास्यादीनां तु गुणसंक्रम उद्वलनासंक्रमश्च। एवं पुंवेदसंज्वलनत्रिकयोर्बन्धव्यवच्छेदात्पूर्वं यथाप्रवृत्तसंक्रमः उद्वलनासंक्रमश्च, बन्धव्यवच्छेदानन्तरं तु क्षपकश्रेण्यां गुणसंक्रमोऽपि भवति, उपशमश्रेण्यां बन्धव्यवच्छेदानन्तरं समयोनावलिकाद्विकबद्धं यथाप्रवृत्तसंक्रमेण परप्रकृतिषु संक्रमयति, तदुक्तं पञ्चसंग्रहमूलवृत्तौ—"यथाप्रवृत्तसंक्रमेणान्यासु च प्रकृतिषु संक्रमयति" इति। यत्तु वाचकवरैः—"आतपोद्योतयोश्च शुभत्वान्न गुणसंक्रमः, अशुभप्रकृतीनामेव तत्संभवात्" इति संक्रमकरणे गा. ६९ वृत्तौ गुणसंक्रमलक्षणाधिकारे गुणसंक्रमं प्रतिषिध्य क्षपकश्रेणौ—"षोडशापि कर्माणि गुणसंक्रमेण प्रतिसमयं प्रक्षिप्यमाणानि निःशेषतोऽपि क्षीणानि भवन्ति" इत्यत्रातपोद्योतयोर्गुणसंक्रम उक्तः, स उद्वलनासंक्रमस्य चरमस्थितिखण्डसत्कं दलं प्रतिसमयं परप्रकृतिषु असंख्येयगुणश्रेण्या संक्रम्यमाणत्वेन गुणसंक्रमशब्देनाभिधीयमानोऽपि वस्तुतः उद्वलनासंक्रम एव

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

संभाव्यते । अन्तरकरणे च कृते संज्वलनलोभस्यापि न संक्रमः । सूक्ष्मसम्पराये यशः-कीर्तिसातवेदनीयोच्चैर्गोत्रवर्जबध्यमानानां यथाप्रवृत्तसंक्रमः, अबध्यमानानामशुभानां गुणसंक्रमः, अबध्यमानशुभानां विध्यातसंक्रमः । सप्तमं गुणस्थानकं यावत् विध्यातसंक्रम-स्वीकारे तु यथा पुंवेदादीनामुपशमश्रेण्यां बन्धव्यवच्छेदेऽपि यथाप्रवृत्तसंक्रमः स्वीकृतः, तद्वदपूर्वकरणादावपि विध्यातसंक्रमस्वीकारेऽपि न क्षतिः, परं तादृक् विधिवाक्यं प्रतिषे-धवाक्यं वा गोमटसारं विहायान्यत्र न दृष्टम्, अत एवास्माभिर्विध्यातसंक्रमोऽपूर्वकरणादौ संभावितः । तथा वैक्रियसप्तकदेवद्विकनरकद्विकैकेन्द्रियादिजातिचतुष्कस्थावरचतुष्कात-पलक्षणानां विंशतिप्रकृतीनां नैरयिकाः सनत्कुमारादयो देवाश्च भवप्रत्ययतो बन्धका न भवन्ति । देवनारकाणां देवनारकायुषोः बन्धाभावेऽपि संक्रमाभावेन प्रयोजनाभावात् ग्रहणं न कृतमेवमग्रेऽपि द्रष्टव्यमिति । एकेन्द्रियजात्यातपस्थावरनामवर्जानां सप्तदशप्र-कृतीनामीशानान्ता देवा बन्धका न भवन्ति । तिर्यग्द्विकोद्योतयोरप्यानतादयो बन्धका न भवन्ति । संहननषट्कप्रथमवर्जसंस्थानपञ्चकनपुंसकवेदमनुजद्विकौदारिकसप्तकैकान्ततिर्यक्-प्रायोग्यप्रकृतिदशकापर्याप्तनरकद्विकदुर्भगादित्रिकनीचैर्गोत्राप्रशस्तखगतिरूपाणां प्रकृतीनां त्वसंख्येयवर्षायुषो बन्धका न भवन्ति । अत्र पर्याप्ता युगलिनो द्रष्टव्याः, अपर्याप्त-कानामन्यथा बन्धसम्भवात् । आहारकद्विकस्याविरतिप्रत्ययत उद्वलनभावात् न विध्यात-संक्रमः, जिननाम्नस्तु यत्र सद्भावः सम्यक्त्वाभावश्च तत्र शेषसंक्रमाभावेन विध्यातसंक्रमः संभाव्यते । एवं यस्य यस्य यत् यत् कर्म गुणप्रत्ययतो भवप्रत्ययतो वा बन्धं नायाति, तस्य तस्य तत्तत् विध्यातसंक्रमयोग्यं भवति । अथ दलिकप्रमाणमुच्यते—यावत्प्रमाणं कर्मदलिकं विध्यातसंक्रमेण प्रथमसमये परप्रकृतिषु क्षिप्यते, तावत्प्रमाणैर्दलिकैः संक्रम्यमाणप्रकृतिगतं शेषं सर्वमपि दलिकमङ्गुलमात्रक्षेत्रस्यासङ्ख्येयतमे भागे यावन्त आकाशप्रदेशास्तावत्संख्यकैः खण्डैर्निखिलमपहृतं भवति । एतदुक्तं भवति—यावत्प्रमाणं प्रथमसमये कर्मदलिकं विध्यात-संक्रमेण प्रकृत्यन्तरे प्रक्षिप्यते, तावत्प्रमाणैः खण्डैः शेषं सर्वमपि तत्प्रकृतिगतं दलिकमपह्रि-यमाणमेकतस्तदेकखण्डदलिकराशिः, अन्यतश्चैकाकाशप्रदेश इत्यङ्गुलमात्रक्षेत्रासंख्येयतम-भागवर्त्याकाशप्रदेशैरपह्रियत इति क्षेत्रतो मार्गणा । कालतस्त्वसंख्याताभिरुत्सर्पिण्यवसर्पि-णीभिरपहृतं भवति । अयं च विध्यातसंक्रमः प्रायो यथाप्रवृत्तसंक्रमावसाने वेदितव्यः ।

विध्यातसंक्रमस्य यन्त्रम् । (गुणप्र० भवप्र० वाऽबध्यमानानां)

मि० नरकायुर्वर्जाः १४ मिथ्यात्वांतानाम्	सास्वादनादयः	गुणप्रत्ययतः
तिर्यगायुर्वर्जाः २४ सास्वादनान्ता०	मिश्राद्यः	,,
(२) मिथ्यात्वमिश्रयोः	अविरतादयः	,,

गुणस्थाने	सर्वाग्रं
मिथ्यात्वे	०–१
सासादने	१४

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

४ र्थान्तानाम् मनुष्यायुर्वर्जाः ९	देशविरतादयः	,,
(४) ५ मान्तानाम्	प्रमत्तादयः	,,
(६) प्रमत्तान्तानाम्	अप्रमत्तादयः	,,
वै०७–देव२–नरक२–कुजाति ४–स्था०–सू०–साधा०–अपर्या०–आतपानां (२०)	सर्वे नारकाः सनत्कुमारादयो देवाश्च	भवप्रत्ययतः
नरक२–देव२–वै०७–विकल३–सू०-अपर्या०–साधा० (१७)	ईशानान्ता देवाः	,,
तिर्य० २– उद्यो० पूर्वोक्तानां (२०) च	आनतादयो देवाः	,,
संघ० ६–कुसंस्था० ५–नपुं०–मनु०२–औदा०७–ति० प्रा०१०–अप०–नरक २–दुर्भ० ३–नी० गो०–अप्र० खग० (३९)	युगलिकतिर्यङ्नराः	,,

मिश्रे	३८	
अविरते	४०	
देशविरते	४९	५४
प्रमत्ते	५३	५८
अप्रमत्ते	५९	६४
अपूर्वक. प्र. ६	१४	
अपूर्वक. ७	२९	६५
अनिवृ.	२९	६५
सूक्ष्मसं.	२९	६५

साम्प्रतं यथाप्रवृत्तसंक्रमलक्षणमुच्यते–यथाप्रवृत्तसंक्रमेण यथा यथा जघन्यमध्यमोत्कृष्टानां योगानां प्रवृत्तिस्तथा तथा संक्रमयति। इदमत्र हृदयं–जघन्ययोगे वर्तमानो जघन्यं कर्मदलं मध्यमे मध्यममुत्कृष्टे उत्कृष्टं संक्रमयति। अयं च संक्रमः संसारान्तर्वर्तिनां सर्वेषां प्राणिनां ध्रुवबन्धिनीनां बन्धे, परावर्तमानानां तु स्वस्वबन्धयोग्यानां बन्धेऽबन्धे वा भवति। तत्र ध्रुवबन्धिनीनामध्रुवबन्धिनीनां वा यदि तत्काले प्रभूतं दलं बध्यते तदा प्रभूतं संक्रमयति, स्तोकं बध्यते चेत् स्तोकं संक्रमयति, यद्वा कासाञ्चिदध्रुवबन्धिनीनां तद्भवबन्धयोग्यानां तदानीमबन्धेऽपि प्राग्बद्धं दलिकं प्रभूतमास्ते तर्हि प्रभूतं स्तोकं चेत् स्तोकं संक्रमयति। तदुक्तम्–"संसारत्था जीवा सबन्धजोगाण तद्दलपमाणा। संकामे तणुरूवं अहापवत्तीए तो नामं ॥ १ ॥" इति लक्षितो यथाप्रवृत्तसंक्रमः।

यथाप्रवृत्तसंक्रमः।

ध्रुवबन्धिनीनाम्	तद्बन्धकाः
तद्भवयोग्यपरावर्त्तमानानां	तद्बन्धका अबन्धका वा
अयं योगानुरूपः संक्रमः स्यात्, अस्य बाधको विध्यातो गुणसंक्रमो वा भवति	

अथ गुणसंक्रमो लक्ष्यते–अपूर्वकरणादिगुणस्थानवर्तिनः प्राणिनः प्रतिसमयमबध्यमानाशुभप्रकृतीनां सम्बन्धि कर्मदलिकमसंख्येयगुणश्रेण्या बध्यमानासु परप्रकृतिषु प्रक्षिपन्ति स गुणसंक्रमः, गुणेन प्रतिसमयमसङ्ख्येयगुणलक्षणेन गुणकारेण संक्रमो गुणसंक्रमः। कासां प्रकृतीनां गुणसंक्रमो भवतीत्युच्यते–नरकद्विकाद्यजातिचतुष्कस्थावरचतुष्कहुण्डसंस्थानसेवार्तसंहनननपुंसकवेदरूपाणां मिथ्यात्वयोग्यानां त्रयोदशप्रकृतीनां तिर्यग्द्विकस्त्यानर्द्धित्रि-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

कदौर्भाग्यत्रिकैकमध्यमसंस्थानचतुष्कमध्यमसंहननचतुष्काशुभखगतिनीचैर्गोत्रस्त्रीवेदरूपाणां सास्वादनयोग्यानामेकोनविंशतिप्रकृतीनां तथाऽप्रत्याख्यानप्रत्याख्यानावरणकषायाष्टकास्थिराशुभायशःकीर्तिशोकारत्यसातवेदनीयरूपाणां सर्वसंख्यया षट्चत्वारिंशत्प्रकृतीनामशुभानामबध्यमानानामपूर्वकरणगुणस्थानाद्यसमयादारभ्य गुणसंक्रमो भवति । तथा निद्राद्विकोपघाताशुभवर्णादिनवकहास्यरतिभयजुगुप्सानां त्वपूर्वकरणे स्वस्वबन्धव्यवच्छेदादारभ्य गुणसंक्रमो भवति । यद्यपि गुणसंक्रमाधिकारे न कुत्रापि पुंवेदसंज्वलनत्रिकयोर्गुणसंक्रम उक्तस्तथापि क्षपकश्रेण्यां—"पुंवेदमपि समयोनद्व्यावलिकारूपेण कालेन क्रोधे गुणसंक्रमेण संक्रमयन् चरमसमये सर्वसंक्रमेण संक्रमयति" इत्युक्तं, तत्र गुणसंक्रमानुविद्धोद्वलनासंक्रमः संभाव्यते, उद्वलनासंक्रमान्ते सर्वसंक्रमस्य प्रतिपादितत्वात् गुणसंक्रमाधिकारे पुंवेदस्याप्रतिपादनाच्च । एवं संज्वलनत्रिकस्यापि द्रष्टव्यम् । यत्तु—"तिसृष्वपि चामूषु किट्टिवेदनाद्धासूपरितनस्थितिगतं दलिकं गुणसंक्रमेणापि प्रतिसमयमसंख्येयगुणवृद्धिलक्षणेन संज्वलनमाने प्रक्षिपति" इत्यत्र संज्वलनक्रोधस्य बध्यमानत्वेन गुणसंक्रमाभावात् चरमस्थितिखण्डस्योद्वलनासंक्रमः संभाव्यते, तत्रापि प्रतिसमयं गुणसंक्रमापहारप्रमाणासंख्येयगुणश्रेण्या कर्मदलिकं परप्रकृतिषु संक्रम्यमाणत्वेन गुणसंक्रमाभिधानं कल्प्यते । यद्वाऽपूर्वकरणप्रवृत्तप्रभृतयोऽशुभप्रकृतीनामबध्यमानानां दलिकमसङ्ख्येयगुणश्रेण्या बध्यमानासु प्रकृतिषु यत्प्रक्षिपति स गुणसंक्रमः, तेन विसंयोजनाकालेऽपूर्वकरणेऽनन्तानुबन्धिनामुद्वलनानुविद्धगुणसंक्रमोऽनिवृत्तिकरणे गुणसंक्रमानुविद्धोद्वलनासंक्रमः, दर्शनमोहक्षपणकाले चानुदितयोः मिथ्यात्वमिश्रयोः अपूर्वकरणप्रथमसमयादारभ्य गुणसंक्रमः, दर्शनमोहोपशमनायां चौपशमिकसम्यक्त्वलाभप्रथमसमयादारभ्य मिथ्यात्वस्यावलिकायाः परतो मिश्रस्य चान्तर्मुहूर्तं यावत् गुणसंक्रमः, परतो विध्यातसंक्रमः, तथा—"श्रेणिगतौपशमिकसम्यक्त्वलाभप्रथमसमयादारभ्य मिथ्यात्वमिश्रयोः गुणसंक्रम" इत्यादिकं न विरुध्यते । ननु मिथ्यादृष्टेर्मिथ्यात्वस्यापूर्वकरणादारभ्य गुणसंक्रमः कथं न भवतीति चेत्? न, तदानीं मिथ्यात्वस्य बध्यमानत्वात् । ननु यदा वेदकसम्यग्दृष्टिर्दर्शनमोहमुपशमयति तदाऽपूर्वकरणे मिथ्यात्वमिश्रयोः कथं न गुणसंक्रमो भवतीति चेत्? सत्यम्, किन्तु पञ्चसंग्रहेऽन्तरकरणप्रथमसमये उक्तत्वेनास्माभिरपि तथैवोक्तं, तथा च तत्पाठः—"पढमगुवसमंव सेसं अन्तमुहुत्ताउ तस्स विज्झाओ"—व्याख्या—"शेषं प्रथमोपशमवत्, प्रथमौपशमिकसम्यक्त्ववद्वेदितव्यम् । अन्तरकरणप्रवेशप्रथमसमयादारभ्यान्तर्मुहूर्तेऽतिक्रान्ते गुणसंक्रमावसाने विध्यातसंक्रमस्तस्य सम्यक्त्वस्य भवति । किमुक्तं भवति ? विध्यातसंक्रमेण मिथ्यात्वसम्यग्मिथ्यात्वयोर्दलिकं सम्यक्त्वे प्रविशती"ति । नन्वौपशमिकसम्यक्त्वे मिथ्यात्वस्य गुणसंक्रम उक्तः, न मिश्रस्य, तदुक्तं—"इहौपशमिकसम्यक्त्वलाभप्रथमसमयादेवारभ्य मिथ्यात्वस्य सम्यक्त्वे सम्यग्मिथ्यात्वे च गुणसंक्रमः प्रवर्तते" इति चेत्? सत्यम्, किन्तु मिथ्यात्वमिश्रयोरौपशमिक-

---

१. कर्मप्रकृतिकाराभिप्रायेण समयोनावलिकायाः परतः कार्मग्रन्थिकाभिप्रायेणावलिकायाः परतः प्राथमिकौपशमिकसम्यक्त्वे मिश्रस्य गुणसंक्रमो द्रष्टव्यः ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सम्यक्त्वलाभप्रथमसमयादारभ्यान्तर्मुहूर्तात्परतः गुणसंक्रमावसाने विध्यातसंक्रमस्योक्तत्वादन्तर्मुहूर्ताभ्यन्तरे मिश्रस्यापि गुणसंक्रमः सुस्पष्ट एव । ननु द्वितीयौपशमिकसम्यक्त्वे एवमुक्तं, न तु प्राथमिकौपशमिकसम्यक्त्व इति चेत्? सत्यम्, एकत्रोक्तमन्यत्रापि संभावितमिति लक्षितो गुणसंक्रमः । उद्वलनासंक्रमं कुर्वतां स्वस्थानप्रक्षेपेण चरमस्थितिखण्डे यत्प्रदेशाग्रं तदन्यप्रकृतौ प्रतिसमयमसंख्येयगुणं तावत् संक्रमयति यावद् द्विचरमः प्रक्षेपः । यस्तु चरमप्रक्षेपः स सर्वसंक्रम इति प्रागुक्तमेव ।

गुणसंक्रमः ।

(अबध्यमानाशुभानामेव स्यात्)

मिथ्यात्वान्तानां १३ अनं० ४–तिर्यगायु–उद्योतवर्जं १९-सास्वादनान्तानां	८ माद्यः
(८) मध्यकषायानाम्, अस्थिराशुभायशःशोकारत्यसातानां च	,,
निद्रा२–उप०–कुवर्णादि ९-हास्यरतिभयकुत्सानाम्	,,
मिथ्या०–मिश्रानन्तानुबन्धि ४ णाम्	४ र्थतः ७ मान्ताः अपूर्वकरणतः

अथ कः संक्रमः कं बाधित्वा प्रवर्तत इत्युच्यते—यथाप्रवृत्तसंक्रमं प्रवर्तमानं स्वहेतुसामर्थ्येन बाधित्वा विध्यातसंक्रमो गुणसंक्रमो वा प्रवर्तते, तथोद्वलनासंक्रमं बाधित्वा सर्वसंक्रमः प्रवर्तते, तदुक्तं—"बाहिय अहापवत्तं सहेउणाहो गुणो व विज्झाओ । उव्वलणसंकमस्सवि कसिणो चरमंमि खंडंमि ॥ १ ॥" इति ।

इहान्योऽपि षष्ठः स्तिबुकसंक्रमो विद्यते, स च न संक्रमकरणे सम्बध्यते, करणलक्षणायोगात्, करणं हि सलेश्यं वीर्यमुच्यते, स्तिबुकसंक्रमस्त्वयोगिनोऽपि द्वासप्ततिप्रकृतीनामुपान्त्यसमये उदयवतिषु भवति । ननूदयसत्तयोः करणत्वमिव स्तिबुकसंक्रमस्यापि कथं न करणत्वमिति चेत्? न, उदयसत्तयोरपि करणत्वास्वीकारात् । ननु "बन्धुक्कट्टणकरणं संकममोकट्टुदीरणा सत्तं । उदयुवसामणिधत्ती णिकाचणा होदि पडिपयडी ॥ १॥" व्याख्या—"बन्धः उत्कर्षणं संक्रमोऽपकर्षणमुदीरणा सत्त्वमुदयः उपशमो निधत्तिर्निकाचनेति दश करणानि प्रतिप्रकृतिः प्रकृतिं प्रकृतिं भवन्ति" इति चेत्? नेयं गाथा प्रमाणपथमवतरति, कुमतिप्रणीतत्वात्, किञ्चोदयसत्तयोः करणत्वस्वीकारेऽयोग्यवस्थायामपि ते प्राप्नुयातां, नन्वयोग्यवस्थायां स्वीक्रियेते एवेति चेत्?, अयोग्यवस्थायां बन्धापत्तिः, ननु कथं बन्धापत्तिरिति चेत्?, यतः सलेश्यं वीर्यं हि करणमुच्यते, यावत्करणं तावद्बन्धः तथा च सत्ययोग्यवस्थाचरमसमये यद् बद्धं तत् किं मुक्तावस्थायां वेद्यते? ननु बन्धप्रयोजकं सलेश्यं वीर्यं, सलेश्यलेश्यन्यतरत्तु करणमिति चेत्?, तव मते स्तिबुकसंक्रमस्यातिरिक्तकरणत्वापत्तिरुदयसत्तयोरिव, तथा च सति दशैव करणानीति सूत्रं विशीर्येत । न च संक्रमकरणाभ्यन्तरीभूतः स्तिबुकसंक्रम इति वाच्यम्, "संकमकरणूणा नवकरणा होंति सव्वआऊणं । सेसाणं दस करणा अपुव्वकरणो त्ति दस करणा ॥ १ ॥ [1]आदिमसत्तेव तदो सुहुमकसाओत्ति संकमेण विणा । छच्च सजोगित्ति तदो

---

१ अपूर्वकरणादारभ्य सूक्ष्मसम्परायपर्यन्तं संक्रमं विना सप्त करणानीति ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सत्तं उदयं अजोगित्ति ॥ २ ॥ णवरि विसेसं जाणे संकममवि होदि सन्तमोहम्मि । मिच्छस्स य मिस्सस्स य सेसाणं णत्थि संकमणं ॥ ३ ॥" इति सूत्रेणैकादशगुणस्थानं यावदेव त्वया संक्रमस्य स्वीकारात्, स्तिबुकसंक्रमस्त्वयोगिन्यपि भवतीति तस्यातिरिक्तकरणत्वापत्तिः । ननु भवन्मतेऽप्युपशान्तं यावदेव संक्रमकरणप्रवृत्तिरयोग्युपान्तसमयं यावत् स्तिबुकसंक्रमप्रवृत्तिरिति स्तिबुकसंक्रमस्यातिरिक्तकरणत्वापत्तिरिति चेत्? न, अस्मन्मते उदयसत्तयोरिव स्तिबुकसंक्रमस्यापि करणत्वं न स्वीक्रियते, तव मते तूदयसत्तयोरिव तस्य करणत्वापत्तिर्दुर्निवारा । न चोदये सत्तायां वाऽन्तर्भाव इति वाच्यम्, त्रयाणामपि पृथग् लक्षणत्वात्, तथाहि–उदयसमयप्राप्तानां कर्मपुद्गलानामनुभवनमुदयः, बन्धसंक्रमाभ्यां लब्धात्मलाभानां निर्जरणसंक्रमणकृतस्वरूपप्रच्युत्यभावः सत्ता, अनुदयप्राप्तायाः सत्कं यत्कर्मदलिकं सजातीयप्रकृतावुदयप्राप्तायां समानकालस्थितौ संक्रमयति संक्रमयित्वा चानुभवति स स्तिबुकः, यथा मनुजगतावुदयप्राप्तायां शेषगतित्रयमेकेन्द्रियजातौ शेषजातिचतुष्कमित्यादि, तदुक्तं पञ्चसङ्ग्रहे–"पिंडपगईण जा उदयसंगया तीए अणुदयगयाओ । संकामिऊण वेयइ जं एसो थिवुगसंकमो ॥ १ ॥" इति, अन्यत्रापि "अनुदीर्णमुदीरणान्तस्तुल्यकालं प्रतिक्षणम् । दलिकं संक्रमं याति, येन स स्तिबुको मतः ॥ १ ॥" इति । एष एव प्रदेशोदय उच्यते । अयं स्तिबुकसंक्रमो न केवलमयोगिपर्यन्ते एव, सर्वासां प्रकृतीनां मिथ्यात्वादिगुणस्थानेऽपि विपाकोदयादन्यकाले भवत्येव, ततश्चायोगिपर्यन्ते यासां स्तिबुकेनैव क्षयस्तासामेवानुदयवतीनां स्तिबुकस्तत्र व्यपदिष्टः स अविरोध्येव ।

अथोद्वलनाप्रसङ्गे यत् चरमस्थितिखण्डमुक्तं तस्य सर्वसंक्रमवर्जचतुर्भिः संक्रमैरपहारकालस्याल्पबहुत्वमुच्यते–चरमस्थितिखण्डस्य गुणसंक्रमेणापहारकालः सर्वस्तोकोऽन्तर्मुहूर्तमात्रेण कालेन सर्वस्याप्यपहरणात्, ततो यथाप्रवृत्तसंक्रमापहारकालोऽसंख्येयगुणो यतो यथाप्रवृत्तसंक्रमेण चरमस्थितिखण्डं पल्योपमासंख्येयभागमात्रेण कालेन सर्वमप्यपहृतं भवति, ततो विध्यातसंक्रमेणापहारकालोऽसंख्येयगुणो यतस्तदेव चरमस्थितिखण्डं विध्यातसंक्रमेणापह्रियमाणमसंख्याताभिरुत्सर्पिण्यवसर्पिणीभिरपहृतं भवति, तत उद्वलनासंक्रमेणापहारकालोऽसंख्येयगुणो यतस्तदेव चरमस्थितिखण्डं द्विचरमस्थितिखण्डस्य चरमसमये यत्परप्रकृतौ प्रक्षिप्यते तेन मानेनोद्वलनासंक्रमेणापह्रियमाणमपि प्रभूताभिरसंख्येयोत्सर्पिण्यवसर्पिणीभिरपहृतं भवति । विध्यातसंक्रमेणोद्वलनासंक्रमेण चापहारः क्षेत्रतोऽङ्गुलासंख्ये-

शेषस्यापहारकालाल्पबहुत्वम् ।

गुणसंक्रमेण	अन्तर्मुहूर्त्त	सर्वाल्पः
यथाप्रवृत्तेन	पल्यासं० भा०	ततोऽसंख्येयगुणः
विध्यातेन	असं० कालचक्राणि	,,
परस्थानान्त्योद्वलनया (उपान्त्यखण्डस्य)	बह्वसं० कालचक्राणि	,,
स्वस्थानोपान्त्योद्वलनया	पल्यासं० भा०	यथा० कालतुल्यः
उद्वलनायां योऽन्त्यखण्डः सः शेष इति		

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

यभागेन द्रष्टव्यः, केवलमुद्वलनासंक्रमेणापहारः बृहत्तमेनाङ्गुलासंख्येयभागेन वाच्यः। उद्वलनासंक्रमे द्विचरमस्थितिखण्डस्य चरमप्रक्षेपे यत्स्वस्थाने कर्मदलिकं प्रक्षिप्यते तावत्प्रमाणं कर्मदलिकं यथाप्रवृत्तसंक्रमेणापह्रियमाणं चरमस्थितिखण्डस्य निखिलं कर्मदलं पल्योपमासंख्येयभागेनापहृतं भवति, तावत्प्रमाणमेवोद्वलनासंक्रमेणाप्यपह्रियमाणं चरमस्थितिखण्डं पल्योपमासंख्येयभागेनापहृतं भवतीति द्वावपि स्वस्थानप्रक्षेपरूपेण तुल्यौ भवतः, तदुक्तं—“जं दुचरिमस्स चरिमे सपरट्ठाणेसु देइ समयम्मि। ते भागे जह कमसो अहापवत्तुवलणमाणे ॥ १ ॥” इति लक्षणं लक्षितम्।

अत्र कुमतिभिरुद्वलनाप्रकृतयः त्रयोदश, सर्वत्र चरमस्थितिखण्डे गुणसंक्रमः, आहारकादिशुभप्रकृतीनामपि गुणसंक्रमः, सर्वसंक्रमयोग्या द्वापञ्चाशत्प्रकृतय इत्यादिकं यद्विपरीतं प्रलपितं तद् ज्ञापनार्थं गोम्मटसारान्तर्भूतपञ्चभागहारचूलिकायाः कियन्त्यः गाथा सवृत्तिका उपन्यस्यन्ते। तथाहि—

“मिच्छे सम्मिस्साणं अधापवत्तो मुहुत्तअंतोत्ति। उव्वेलणं तु तत्तो दुचरिमकंडोत्ति णियमेण ॥ १ ॥ व्याख्या—मिथ्यात्वे प्राप्ते सम्यक्त्वमिश्रप्रकृत्योरधः प्रवृत्तसंक्रमोऽन्तर्मुहूर्तपर्यन्ते वर्तते। तु पुनरुद्वलनभागहारसंक्रमो द्विचरमकाण्डपर्यन्तं वर्तते नियमेन। तत्राधःप्रवृत्तसंक्रमः फालिरूपेण उद्वलनसंक्रमः काण्डरूपेण वर्तते ॥ १ ॥ उव्वेलण पयडीणं गुणं तु चरिमम्मि कंडये णियमा। चरमे फालिम्मि पुणो सव्वं चय होदि संकमणं ॥ २ ॥ व्याख्या—उद्वलनप्रकृतीनां द्विचरमकाण्डकपर्यन्तमुद्वलनसंक्रमणं, चरमकाण्डे तु पुनः नियमेन गुणसंक्रमणम्। चरमफालौ पुनः सर्वसंक्रमणं चास्ति तेन सम्यक्त्वमिश्रप्रकृत्योरुद्वलनप्रकृतित्वाच्चरमकाण्डके गुणसंक्रमणं चरमफाले सर्वसंक्रमणं च सिद्धम्। करणपरिणामेन विना सर्वपरमाणूनां परप्रकृतिरूपेण निक्षेपणमुद्वलनसंक्रमणं नाम। विध्यातविशुद्धिकस्य जीवस्य स्थित्यनुभागकाण्डकगुणश्रेण्यादिपरिणामेष्वतीतेषु प्रवर्तनात् विध्यातसंक्रमणं नाम। बन्धप्रकृतीनां स्वबन्धसंभवविषये यः प्रदेशसंक्रमस्तदधःप्रवृत्तसंक्रमणं नाम। प्रतिसमयमसंख्येयगुणश्रेणिक्रमेण यत्प्रदेशसंक्रमणं तत् गुणसंक्रमणं नाम। चरमकाण्डचरमफालेः सर्वप्रदेशाग्रस्य यत्संक्रमणं तत्सर्वसंक्रमणं नाम ॥ ३ ॥ सर्वसंक्रमणप्रकृतिस्थतिर्यगेकादशमाह—तिरियदुगाइचउक्कं आदावुज्जोव थावरं सुहुमं। साधारणं च एदे तिरिये यारं मुणेयव्वा ॥ ४ ॥ व्याख्या—तिर्यग्द्वयमाद्यजातिचतुष्कातपः उद्योतः स्थावरः सूक्ष्मं साधारणं चेत्येता एकादश तिर्यक्ष्वेवोदयात्तिर्यगेकादश इति संज्ञा स्युः ॥ ४ ॥ अथोद्वलनप्रकृतयः का इति चेदाह—आहारदुगं सम्मं मिस्सं देवदुगणारयचउक्कं। उच्चं मणुदुगमेदे तेरस उव्वलणा पयडी ॥ ५ ॥ व्याख्या—आहारकद्विकं सम्यक्त्वं मिश्रं देवद्विकं नारकचतुष्कमुच्चैर्गोत्रं मनुजद्विकं चेत्येतास्त्रयोदश उद्वलना नाम प्रकृतयः स्युः ॥ ५ ॥ बन्धे अधापवत्तो विज्झादं सत्तमो त्ति हु अबन्धे। एत्तो गुणो अबन्धे पयडीणं अपसत्थाणं ॥ ६ ॥ व्याख्या—प्रकृतीनां बन्धे सति स्वस्वबन्धव्युच्छित्तिपर्यन्तमधःप्रवृत्तसंक्रमणं स्यात्, मिथ्यात्वस्य 'सम्मं मिच्छं मिस्सं सगुणट्ठाणम्मि णेव संकमदी'ति निषेधात्। बन्धव्युच्छित्तौ सत्यामसंयताद्यप्रमत्तपर्यन्तं विध्यातसंक्रमणं स्यात्। इतोऽप्रमत्तगुणस्थानादुपर्युपशान्तकषायपर्यन्तं बन्धरहिताप्रशस्तप्रकृतीनां गुणसंक्रमणं स्यात्।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ततोऽन्यत्रापि प्रथमोपशमसम्यक्त्वग्रहणप्रथमसमयादन्तर्मुहूर्तपर्यन्तं पुनः मिश्रसम्यक्त्वप्रकृत्योः पूरण-काले मिथ्यात्वक्षपणायामपूर्वकरणपरिणामान्मिथ्यात्वचरमकाण्डकद्विचरमफालिपर्यन्तं च गुणसंक्रमणं स्यात् । चरमफाल्यां सर्वसंक्रमणं स्यात् ॥ ६ ॥ ताः सर्वसंक्रमणप्रकृतीराह—तिरियेयारुव्वेल्लणयपयडी संजलणलोहसम्ममिस्सूणा । मोहा थीणतिगं च य बावण्णे सव्वसंकमणं ॥ ७ ॥ व्याख्या—प्रागुक्त-तिर्यगेकादशोद्वलनत्रयोदशसंज्वलनलोभसम्यक्त्वमिश्रवर्जितमोहनीयानि स्त्यानगृद्धित्रयं चेति द्वापञ्चा-शत्प्रकृतिषु सर्वसंक्रमणं स्यात् ॥ ७ ॥ अथ प्रकृतीनां संक्रमनियममाह—उगुदालतीससत्तयवीसे एक्केक्क-बारतिचउक्के । इगि चदुदुगतिगतिग चदु पण दुगदुगतिण्णि संकमणा ॥ ८ ॥ व्याख्या—एकोनचत्वा-रिंशत् त्रिंशत्सप्तविंशत्येकैकद्वादशत्रिचतुष्केषु क्रमेणैकचतुर्द्वित्रित्रिचतुःपञ्चद्विद्वित्रिसंक्रमा भवन्ति ॥ ८ ॥ ताः प्रकृतयः तासां संक्रमणानि च क्रमशो गाथासप्तकेनाह—सुहुमस्स बन्ध घादी सादं संजलणलोह-पंचिंदी । तेजदुसमवण्णचऊअगुरुगपरघादउस्सासं ॥ ९ ॥ सत्थगदी तसदसयं णिमिणुगुदाले अधा-पवत्तदु । थीणतिबारकसाया संढित्थी अरइ सोगो य ॥ १० ॥ व्याख्या—पञ्चचतुर्ज्ञानदर्शनावरण-पञ्चान्तरायाः सातं संज्वलनलोभः पञ्चेन्द्रियं तैजसकार्मणे समचतुरस्रवर्णचतुष्कमगुरुलघुकं पराघातः उच्छ्वासः प्रशस्तविहायोगतिस्त्रसबादरपर्याप्तप्रत्येकस्थिरशुभसुभगसुस्वरोदययशस्कीर्तयो निर्माणं चेत्येकोन-चत्वारिंशत्प्रकृतिष्वनुद्वेल्लनप्रकृतित्वात् नोद्वलनसंक्रमणम् । 'विज्झादं सत्तमो त्ति हु अबन्धे' इत्यप्रमत्त-गुणाभ्यन्तरे बन्धच्छेदाभावात् न विध्यातसंक्रमणम् । 'एत्तो गुणो अबन्धे' इति न गुणसंक्रमणम् । प्रागुक्ते बावन्ने पाठाभावात् न सर्वसंक्रमणम्, तेनाधःप्रवृत्तसंक्रमणमेकमेव स्यात्, एवं सर्वप्रकृतीनां व्यतिरेकं विचारयेत् । मिथ्यात्वे बध्यमाने मिथ्यादृष्टावधःप्रवृत्तसंक्रमणं न, कुतः, 'सगुणट्ठाणम्मि णेव संकमदी'ति निषेधात् । पुनः स्त्यानगृद्धित्रयं द्वादश कषायाः षण्ढस्त्रीवेदौ अरतिः शोकः ॥ ९ ॥ १० ॥ तिरियेयारं तीसे उव्वेलणहीणचारि संकमणा । णिद्दा पयला असुहं वण्णचउक्कं च उपघादे ॥ ११ ॥ सत्तण्हं गुणसंकममधापवत्तो य दुक्खमसुहगदी । संहदिसंठाणदसं णीचा पुण्णऽथिरछक्कं च ॥ १२ ॥ व्याख्या—तिर्यगेकादशं चेति त्रिंशत्प्रकृतिषूद्वेल्लनवर्जितचत्वारि संक्रमणानि स्युः । पुनर्निद्रा प्रचला अशुभवर्णचतुष्कमुपघातश्चेति सप्तसु गुणसंक्रमणमधःप्रवृत्तसंक्रमणं च । असातवेदनीयमप्रशस्तविहा-योगतिराद्यं विना पञ्च पञ्च संहननसंस्थानानि, नीचैर्गोत्रमपर्याप्तमस्थिराशुभदुर्भगदुस्वरानादेयायशः-कीर्तय इति ॥ ११ ॥ १२ ॥ वीसण्हं विज्झादं अधापवत्तो गुणो य मिच्छत्ते । विज्झादगुणे सव्वं सम्मे विज्झादपरिहीणा ॥ १३ ॥ सम्मविहिणुव्वेल्ले पंचेव य तत्थ होन्ति संकमणा । संजलणतिये पुरिसे अधावपत्तो य सव्वो य ॥ १४ ॥ ओदालदुगे वज्जे तित्थे विज्झादधावपत्तो य । हस्सरदिभय-जुगुच्छे अधाववत्तो गुणो सव्वो ॥ १५ ॥ सम्मत्तूणुव्वेलणथीणतितीसं च दुक्खवीसं च । वज्जोरा-लदुतित्थं मिच्छं विज्झाद सत्तसट्ठी ॥ १६ ॥ मिच्छूणिगिवीससयं अधापवत्तस्स होंति पयडीओ । सुहुमस्स बन्धघादिप्पहुदी उगुदालुरालदुगतित्थं ॥ १७ ॥ वज्जं पुंसंजलणतिऊणा गुणसंकमस्स पय-डीओ । पणहत्तरि संखाओ पयडीणियमं विजाणाहि ॥ १८ ॥

अत्र किञ्चिद्विचार्यते—प्रथमगाथायां सम्यक्त्वमिश्रयोः मिथ्यात्वे बन्धयोग्यताभावेऽपि अधःप्रवृत्तसंक्रमः स्वीकृतः, द्वितीयगाथावृत्तौ बन्धप्रकृतीनां स्वबन्धसंभवविषये यः प्रदेश-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

संक्रमः तदधःप्रवृत्तसंक्रमणमुक्तम्, तेन षष्ठगाथायां 'बन्धे अधावक्तो' इत्यनेन च विरोधः। द्वितीयगाथायामुद्वलनप्रकृतीनां चरमस्थितिखण्डे नियमात् गुणसंक्रमस्वीकारे आहारकादिशुभप्रकृतीनामपि गुणसंक्रमः स्यात्, तथा च सति षष्ठगाथायामबध्यमानाप्रशस्तप्रकृतीनामपूर्वकरणादौ गुणसंक्रमो भवतीति स्ववचनविरोधः स्यात्। ननु चरमस्थितिखण्डे परप्रकृतिषु प्रतिसमयमसंख्येयगुणश्रेण्या संक्रम्यमाणत्वेनोद्वलनासंक्रमस्य वक्तुमशक्यत्वेन भवतामपि गुणसंक्रमो वक्तव्यः स्यादिति चेत्, न, यथोद्वलनायां प्रथमादिस्थितिखण्डे प्रतिसमयमसंख्येयगुणं दलमुत्कीर्यमाणं स्वस्थाने प्रतिसमयमसंख्येयगुणं संक्रमयति तद्वदुद्वलनासंक्रमप्रकृतीनामपि चरमस्थितिखण्डसत्ककर्मदलस्य प्रतिसमयमसंख्येयतयोद्वलनासंक्रमेण संक्रम्यमाणत्वेनास्मन्मते न कोऽपि विरोधः। द्वितीयगाथावृत्तौ 'करणपरिणामेन विना कर्मपरमाणूनां परप्रकृतिरूपेण निक्षेपणमुद्वलनासंक्रमण' मित्यत्र करणपरिणामेन विना इति वक्तुं न युक्तं, संक्रमकरणस्य प्रवर्तमानत्वात्। न च यथाप्रवृत्त्यादिकरणपरिणामं विना इति वाच्यम्, विध्यातसंक्रमादौ व्यभिचारात्। विध्यातसंक्रमस्य 'भवप्रत्ययतो गुणप्रत्ययतो वा बन्धे विध्याते सति बन्धव्यवच्छेदे सति संक्रमो विध्यातसंक्रम' इत्येव लक्षणं युक्तं न पुनः "विध्यातविशुद्धिकस्य जीवस्य स्थित्यनुभागकाण्डकगुणश्रेण्यादिपरिणामेष्वतीतेषु प्रवर्तनात् विध्यातसंक्रम" इति, अन्यथा अजातयथाप्रवृत्तादिकरणपरिणामे जीवे विध्यातसंक्रमो न स्यात्, स्याच्च भवप्रत्ययतो गुणप्रत्ययतो वा बन्धे सत्यपि विध्यातसंक्रमस्तादृक् परिणामातीतजीवानामिति। तथा 'बन्धप्रकृतीनां स्वबन्धसंभवविषये यः प्रदेशसंक्रमः तदधःप्रवृत्तसंक्रमण' मिति वक्तव्ये भवन्मते मिश्रसम्यक्त्वयोर्मिथ्यात्वगुणस्थानेऽधःप्रवृत्तसंक्रमस्योक्तत्वेन तत्राव्याप्तिः स्यादिति। 'प्रतिसमयमसंख्येयगुणश्रेणिक्रमेण यत् प्रदेशसंक्रमणं तद्गुणसंक्रमण' मिति लक्षणस्योद्वलनासंक्रमेऽतिव्याप्तिः, तत्रापि स्वस्थाने प्रतिसमयमसंख्येयगुणश्रेण्या संक्रम्यमाणत्वादिति। अन्यासूपन्यस्तासु गाथासु यद्वैपरीत्यं तद्बुद्धिमद्भिः स्वयमेवावलोकनीयम्, सुगमत्वान्नोच्यते। एवमन्यदपि पञ्चभागहारचूलिकायां दशकरणचूलिकायां च बहुविचारणीयं विद्यते, तथापि ग्रन्थभूयस्त्वभयात् नोच्यते।

अथ प्रदेशसंक्रमस्य साद्यादिनिरूपणं क्रियते, तत्र मूलप्रकृतीनां परस्परं संक्रमाभावेन साद्यादिप्ररूपणा न वाच्या, उत्तरप्रकृतीनां तु साद्यादिप्ररूपणा वाच्या, तथाहि-नीचैर्गोत्रवेदनीयद्विकमिथ्यात्ववर्जशेषषड्विंशत्युत्तरशतसंख्यानां ध्रुवसत्त्वप्रकृतीनामजघन्यप्रदेशसंक्रमश्चतुर्धा, तद्यथा--सादिरनादिर्ध्रुवोऽध्रुवश्च। तत्र वक्ष्यमाणः क्षपणार्थमभ्युद्यतः क्षपितकर्मांशः सर्वासामपि प्रकृतीनां जघन्यप्रदेशसंक्रमं करोति, स च सादिरध्रुवश्च। ततोऽन्यः सर्वोऽप्यजघन्यः प्रदेशसंक्रमो भवति। स चोपशमश्रेण्यां बन्धव्यवच्छेदे न भवति, ततः प्रतिपाते च भवतीति सादिः, तत्स्थानमप्राप्तस्यानादिः, ध्रुवाध्रुवावभव्यभव्यापेक्षया। ज्ञानावरणान्तरायदशकदर्शनावरणचतुष्कौदारिकसप्तकवर्जपञ्चोत्तरशतप्रकृतीनामनुत्कृष्टप्रदेशसंक्रमः चतुष्प्रकारो भवति, तद्यथा—सादिरनादिर्ध्रुवोऽध्रुवश्चेति। तत्र सर्वासामपि प्रकृतीनां गुणित-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

प्रदेशसंक्रमस्य साद्यादिभंगयन्त्रम् ।

प्रकृतयः	अजघन्यः				जघन्यः				अनुत्कृष्टः				उत्कृष्टः			
	सादिः	अध्रुवः	अना०	ध्रुवः	सादिः	अध्रुवः	अना०	ध्रुवः	सादिः	अध्रुवः	अना०	ध्रुव०	सादिः	अध्रु०	अना०	ध्रुवः
अनन्तरोक्त २१ वर्जे १०५ ध्रुवसत्ताकानां	उप० श्रे० तः पतितानाम्	भव्यानाम्	साद्यप्राप्तानां	अभव्यानाम्	क्षपणोद्यतक्षपितकर्मांशानाम्	सादित्वात्	—	—	उप० श्रे० तः पतितानाम्	भव्यानाम्	साद्यप्राप्तानाम्	अभव्यानाम्	क्षपणोद्यतगुणितकर्मांशानाम्	सादित्वात्	—	—
ज्ञाना० ५-दर्श० ४-वि० ५-औदा० ७ (२१) ध्रु० सत्ताकानां	,,	,,	,,	,,	,,	,,	—	—	गुणितकर्मांशमिथ्यादृशाम् कादाचित्कत्वात्	सादित्वात्	—	—	गुणितकर्मांशमिथ्यादृशां कादाचित्कत्वात्	,,	—	—
शेषाणाम् (२८)	अध्रुवसत्ताकत्वात्	अध्रु०	—	—	अध्रुवसत्ता०	अध्रु०	—	—	अध्रु० सत्ताकत्वात्	अध्रु०	—	—	अध्रुवसत्ताकत्वात्	अध्रुव०	—	—
मिथ्यात्वस्य	पतद्ग्रहाध्रौव्यत्वात्	पतद्ग०	—	—	पतद्ग०	पतद्ग०	—	—	पतद्ग०	पतद्ग०	—	—	पतद्ग०	पतद्ग०	—	—
नीचैः-सातासातानाम्	परावर्त्तमानत्वात्	परा०	—	—	परा०	परा०	—	—	परा०	परा०	—	—	परा०	परा०	—	—

कर्मांशे क्षपणार्थमभ्युद्यते उत्कृष्टप्रदेशसंक्रमः प्राप्यते इत्युत्कृष्टप्रदेशसंक्रमः सादिरध्रुवश्च । ततोऽन्यत्र सर्वोऽप्यनुत्कृष्टः, स चोपशमश्रेण्यां व्यवच्छिद्यते, ततः प्रतिपाते च पुनरपि भवतीति सादिः, तत्स्थानमप्राप्तस्यानादिः, ध्रुवाऽध्रुवावभव्यभव्यापेक्षया । पञ्चोत्तरशतस्य जघन्य उत्कृष्टश्च, ज्ञानावरणाद्येकविंशतिप्रकृतीनां च जघन्योत्कृष्टानुत्कृष्टा विकल्पाः सादयोऽध्रुवाश्च । तत्र पञ्चोत्तरशतप्रकृतीनां जघन्य उत्कृष्टश्च साद्यध्रुवतया भावित एव । ज्ञानावरणादीनां चोत्कृष्टप्रदेशसंक्रमो गुणितकर्मांशे मिथ्यादृष्टौ कदाचिदेव भवति, शेषकालं त्वनुत्कृष्ट इत्येतौ द्वावपि साद्यध्रुवौ । जघन्यस्तु साद्यध्रुवतया भावित एव । मिथ्यात्वस्य ध्रुवसत्कर्मत्वेऽपि प्रतिग्रहप्राप्तेरध्रौव्यात् नीचैर्गोत्रस्य वेदनीयद्विकस्य च परावर्तमानत्वात् शेषप्रकृतीनां चाध्रुवसत्कर्मत्वाच्च चत्वारोऽपि विकल्पाः सादयोऽध्रुवाश्च भवन्तीति कृता साद्यादिप्ररूपणा ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अथ स्वामित्वमुच्यते—तद्द्विविधमुत्कृष्टप्रदेशसंक्रमस्वामित्वं जघन्यप्रदेशसंक्रमस्वामित्वं च। उत्कृष्टप्रदेशसंक्रमस्वामित्वं च गुणितकर्मांशे प्राप्यत इति गुणितकर्मांशस्यैवादौ स्वरूपमुच्यते। य उत्कटयोगकाषायिक आयुर्बन्धकाले नित्यं जघन्ययोगेनायुर्बध्नन् बादरत्रसकायिककायस्थितिकालन्यूनां सप्ततिसागरोपमकोटाकोटिं यावत् बादरपृथिव्यां तत्रापि पर्याप्तेषु दीर्घकालमपर्याप्तेषु स्तोककालमुषित्वोपरितनीषु स्थितिषु प्रभूतं निषेकं कृत्वा च ततो निर्गत्य त्रसेषु निजकायस्थितिं यावत् प्राग्वदुषित्वा तत्रापि यावतो वारान् सप्तमीं नरकावनिं गन्तुमर्हस्तावतो वारान् तत्र गत्वान्तिमे भवे सप्तमपृथ्वीनारकत्वेन वर्तमानः सर्वलघुपर्याप्तकोऽनेकशः प्राप्तोत्कटयोगकषायोऽन्तिमान्तर्मुहूर्ते यवमध्यमयोगस्थानानामुपरि वर्तमानः त्रिचरमद्विचरमसमये उत्कटकाषायिकः चरमद्विचरमसमये उत्कटयोगी स गुणितकर्मांशो भवति। तदुक्तं कर्मप्रकृतौ—"जो बायरतसकालेणूणं कम्मट्ठिइं तु पुढवीए। बायरपज्जत्तापज्जत्तगदीहेयरद्धासु ॥ १ ॥ जोगकसायउक्कस्सो बहुसो निच्चमवि आउबन्धं च। जोगजहण्णेणुवरिल्लठिइणिसेगं बहुं किच्चा ॥ २ ॥ बायरतसेसु तक्कालमेवमंते य सत्तमखिईए। सव्वलहुं पज्जत्तो जोगकसायाहिओ बहुसो ॥ ३ ॥ जोगजवमज्झउवरिं मुहुत्तमच्छित्तु जीवियवसाणे। तिचरमविचरिमसमए पूरित्तु कसायउक्कस्सं ॥ ४ ॥ जोगुक्कस्सं चरमदुचरिमे समए य चरिमसमयम्मि। संपुन्नगुणियकम्मो पगयं तेणेह सामित्ते ॥ ५ ॥" व्याख्या—"यो बादरत्रसानां द्वीन्द्रियादीनां, तेजोवायुकायिकरूपसूक्ष्मत्रसव्यवच्छेदार्थं बादरग्रहणम्, कालेन पूर्वकोटिपृथक्त्वाभ्यधिकसागरोपमसहस्रद्वयप्रमाणेन कायस्थितिकालेनोनां कर्मस्थितिं मोहनीयकर्मस्थितिं सप्ततिसागरोपमकोटाकोटिप्रमाणां यावत् पृथिव्यां बादरे बादरपृथिवीकायभवेषु स्थित्वा। कथं स्थित्वेत्याह—पर्याप्तापर्याप्तयोर्दीर्घेतराद्धे, सप्तमी द्वितीयार्थे, दीर्घाद्धां पर्याप्तभवेषु इतराद्धां स्तोकाद्धामपर्याप्तभवेषु प्रभूतेषु पर्याप्तभवेषु स्तोकेषु चापर्याप्तभवेषु स्थित्वेत्यर्थः। तथा बहुशोऽनेकवारं योगकषायोत्कृष्ट उत्कृष्टेषु योगस्थानेषु उत्कृष्टेषु च काषायिकेषु संक्लेशपरिणामेषूषित्वेत्यर्थः। इह शेषैकेन्द्रियेभ्यो बादरपृथिवीकायिकः प्रभूतायुष्कस्तेनाव्यवच्छिन्नं तस्य प्रभूतकर्म पुद्गलोपादानं बलवत्तयाऽतीव वेदना सहिष्णुतया च तस्य प्रभूतकर्मपुद्गलपरिशाटाभावः, असहिष्णुरेव वेदनाकरालितस्तदा तथा प्रयोगेण प्रभूतकर्मपुद्गलान् परिशाटयतीत्येवमालोच्य बादरपृथिवीकायिकग्रहणं कृतम्। अपर्याप्तभवग्रहणं च परिपूर्णकायस्थितिपरिग्रहाय, तेषां चापर्याप्तकभवानां स्तोकानां पर्याप्तकभवानां च प्रभूतानां ग्रहणं प्रभूतकर्मपुद्गलपरिशाटाभावज्ञापनाय, अन्यथा हि निरन्तरोत्पद्यमानम्रियमाणेषु बहुपुद्गलपरिशाटो लभ्यते, न च तेनेह प्रयोजनम्। उत्कृष्टेषु योगस्थानेषु च वर्तमानः प्रभूतं कर्मदलिकमादत्ते, उत्कृष्टसंक्लेशपरिणामश्चोत्कृष्टां स्थितिं बध्नाति, प्रभूतमुद्वर्तयति, स्तोकं चापवर्तयतीति योगकषायोत्कृष्टग्रहणम्। तथा नित्यं सर्वकालं भवे भवे जघन्ययोगे वर्तमानः, तेनायुर्बन्धं कृत्वा, उत्कृष्टे ह्यायुःप्रायोग्ये योगे वर्तमानः प्रभूतायुःपुद्गलानादत्ते, उत्कृष्टेन योगेन प्रभूतानायुःपुद्गलानाददानश्च तथास्वाभाव्यात् ज्ञानावरणीयस्य प्रभूतान् पुद्गलान् परिशाटयति, न च तेनेह प्रयोजनमिति जघन्ययोगग्रहणम्। तथोपरितनीषु स्थितिषु निषेकं कर्मदलिकन्यासं बहु स्वभूमिकानुसारेणातिप्रभूतं कृत्वा एवं बादरपृथ्वीकायिकेषु बादरत्रसकायिकस्थितिन्यूनाः सप्ततिसाग-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

रोपमकोटाकोटीः संसृत्य ततो निर्गच्छति, निर्गत्य च बादरत्रसकायेषु द्वीन्द्रियादिषु समुत्पद्यते बादरत्रसेषु चैवं प्रभूतस्तोकपर्याप्तापर्याप्तभवावस्थानाद्युपरितना स्थितिबहुनिषेककरणान्ते पूर्वोक्तेन तत्कालं बादरत्रसकायस्थितिकालं पूर्वकोटिपृथक्त्वाभ्यधिकसागरोपमसहस्रद्वयप्रमाणं परिभ्रमणेन संपूर्य यावतो वारान् सप्तमीं नरकावनिं गन्तुमर्हस्तावतो वारांस्तत्र गत्वान्तिमे भवे सप्तमपृथ्वीनारकत्वेन वर्तमान इह दीर्घजीवित्वं योगकषायोत्कटता च लभ्यत इति यावत्संभवं सप्तमनरकपृथ्वीगमनग्रहणम् । तथा सप्तमक्षितौ नारकभवे सर्वेभ्योऽप्यन्येभ्यो नारकेभ्यो लघु शीघ्रं पर्याप्तः पर्याप्तभावमुपगतः । इहापर्याप्तापेक्षया पर्याप्तोऽसंख्येयगुणयोगो लभ्यते । तथा च तस्यातिप्रभूतः कर्मपुद्गलोपादानसंभवः, तेन चेह प्रयोजनमिति सर्वलघुपर्याप्त इत्युक्तम् । बहुशोऽनेकवारं तस्मिन्नन्त्यसप्तमनरकपृथ्वीनारकभवेऽपि योगकषायाधिको भूत्वा उत्कृष्टानि योगस्थानान्युत्कृष्टांश्च काषायिकान् परिणामविशेषान् गच्छन्नित्यर्थः । योगयवमध्यस्याष्टसामायिकानां योगस्थानानामुपरि अन्तर्मुहूर्तं जीवितावसाने स्थित्वाऽन्तर्मुहूर्तावशेषे आयुषि योगयवमध्यस्योपरि असंख्येयगुणवृद्ध्याऽन्तर्मुहूर्तं यावत्प्रवर्धमानो भूत्वेत्यर्थः । भवस्य त्रिचरमे द्विचरमे च समये वर्तमान उत्कृष्टं काषायिकसंक्लेशस्थानं पूरयित्वा त्रयः समयाश्चरमा यस्मात् यत आरभ्यान्तिमः समयस्तृतीयो भवतीति यावत् स त्रिचरमः । एवं द्वौ चरमौ यस्मात् स द्विचरम इति व्युत्पत्तिः । चरमे द्विचरमे च समये योगस्थानमपि चोत्कृष्टं पूरयित्वा इहोत्कृष्टो योग उत्कृष्टश्च संक्लेशो युगपदेकमेव समयं यावत् प्राप्यते नाधिकमिति विषमसमयोद्भवोत्कृष्टयोगोत्कृष्टकषायस्थानग्रहणम् । त्रिचरमे द्विचरमे च समये उत्कृष्टसंक्लेशग्रहणं प्रभूतोद्वर्तनास्वल्पापवर्तनासम्पत्तये । द्विचरमे चरमे च समये उत्कृष्टयोगग्रहणं सम्पूर्णप्रदेशोपचयसंभवाय । एवं कृत्वा नारकभवस्य चरमसमये संपूर्णगुणितकर्मांशः सम्पद्यते, तेन च सम्पूर्णगुणितकर्मांशेनेहोत्कृष्टप्रदेशसंक्रमस्वामित्वे प्रकृतमधिकृतम्" इत्यभिहितो गुणितकर्मांशः ।

अधुनोत्कृष्टप्रदेशसंक्रमस्वामित्वमुच्यते–तत्र ज्ञानावरणपञ्चकदर्शनावरणचतुष्कान्तरायपञ्चकौदारिकसप्तकरूपाणामेकविंशतिप्रकृतीनां गुणितकर्मांशः सप्तमनरकादुद्वृत्य पञ्चेन्द्रियतिर्यक्षु मध्ये समुत्पन्नः तिर्यग्भवसत्कप्रथमावलिकाचरमसमये उत्कृष्टप्रदेशसंक्रमं करोति, यत एतासां प्रकृतीनां नारकभवचरमसमये उत्कृष्टयोगेनातिप्रभूतं कर्मदलिकं गृहीतं तदावलिकातिक्रान्तं संक्रम्यते, अन्यत्रोक्तप्रक्रियालभ्यं न लभ्यत इति । निद्राद्विकासातवेदनीयप्रथमवर्जसंहनननपञ्चकप्रथमवर्जसंस्थानपञ्चकाशुभवर्णादिनवकोपघाताप्रशस्तखगत्यपर्याप्तास्थिराशुभदुर्भगदुःस्वरानादेयायशःकीर्तिनीचैर्गोत्ररूपाणां द्वात्रिंशत्प्रकृतीनां गुणितकर्मांशः क्षपकश्रेण्यामारूढः सूक्ष्मसम्परायचरमसमये उत्कृष्टप्रदेशसंक्रमं करोति । मध्यमकषायाष्टकस्त्यानर्द्धित्रिकतिर्यग्द्विकविकलेन्द्रियजातिसूक्ष्मसाधारणनोकषायषट्करूपाणां चतुर्विंशतिप्रकृतीनां स्वस्वचरमप्रक्षेपेऽनिवृत्तिबादरः क्षपकः गुणितकर्मांश उत्कृष्टप्रदेशसंक्रमं करोति । तथा नरकादुद्वृत्यानन्तरभवे समागतः तत्प्रथमसमयादारभ्योत्कृष्टबन्धकालं यावत्सातवेदनीयं बद्ध्वा ततोऽसातवेदनीयं बध्नाति, असातवेदनीयबन्धावलिकाचरमसमये सातवेदनीयं सकलमपि बन्धावलिकातीतं भवतीति

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

बध्यमानेऽसातवेदनीये यथाप्रवृत्तसंक्रमेण सातस्योत्कृष्टप्रदेशसंक्रमं करोति । मिथ्यात्वमिश्रयोः क्षपकः स्वस्वचरमप्रक्षेपे सर्वसंक्रमेणोत्कृष्टप्रदेशसंक्रमं करोति । सप्तमपृथिव्यामन्तर्मुहूर्तावशेषे आयुषि वर्तमानमौपशमिकं सम्यक्त्वं समुत्पाद्य मिथ्यात्वमिश्राभ्यां दीर्घेण गुणसंक्रमकालेन सम्यक्त्वमोहनीयं समापूर्य ततः पतित्वा मिथ्यात्वं गतः प्रथमसमये एव सम्यक्त्वमोहस्य मिथ्यात्वे उत्कृष्टप्रदेशसंक्रमं करोति । अनन्तानुबन्धिनां तु गुणितकर्मांशः सप्तमक्षितितो निर्गत्य तिर्यक्षु समुत्पन्नस्तत्रापि प्राप्तवेदकसम्यक्त्वः विसंयोजकः चरमप्रक्षेपे सर्वसंक्रमेणोत्कृष्टप्रदेशसंक्रमं करोति । गुणितकर्मांश ईशानदेवः संक्लेशे वर्तमान एकेन्द्रियप्रायोग्यं बध्नन् पुनः पुनर्नपुंसकवेदं बद्ध्वा ततश्च्युतः सन् स्त्री वा पुरुषो वा जातः, तत्राष्टवर्षमासपृथक्त्वाभ्यधिके वर्तमानो वर्षवरं क्षपयन् निजचरमप्रक्षेपे सर्वसंक्रमेण संक्रमयन् गुणितकर्मांशे वर्षवरस्योत्कृष्टप्रदेशसंक्रमस्वामी भवति । अयमेव स्थावरैकेन्द्रियातपोद्योतानामपि संक्रमस्वामी । तथा भोगभूमिषु असंख्येयवर्षाणि यावत् भूयो भूयः स्त्रीवेदं बद्ध्वा प्रकृत्यन्तरदलिकसंक्रमेण चापूर्य पल्योपमासंख्येयभागातिक्रान्ते सत्यकालमृत्युना मृत्वा दशवर्षस्थितिको देवो जातस्तत्रापि स्त्रीवेदं बन्धेन संक्रमेण चापूर्य ततश्च्युत्वा मनुजेषु मध्येऽन्यतरवेदयुतः समुत्पन्नः, तत्र शीघ्रं क्षपणायोत्थितः स्त्रीवेदक्षपणचरमसमये सर्वसंक्रमेण स्त्रीवेदं संक्रमयन् गुणितकर्मांशः स्त्रीवेदस्योत्कृष्टप्रदेशसंक्रमस्वामी भवति । अत्र नान्या युक्तिरन्वेषणीया, केवलवेधसस्तथैवोपलम्भात्, एवमन्यत्रापि यथायोगं वाच्यम् । तथा कश्चित् गुणितकर्मांश ईशानदेवलोके संक्लेशपरिणामेन प्रभूतं कालं यावत् नपुंसकवेदं बन्धेन संक्रमेण चापूर्य ततश्च्युत्वा संख्येयवर्षायुष्केषु समुत्पन्नस्ततो निर्गत्यासंख्येयवर्षायुष्केषु समुत्पद्यासंख्येयानि वर्षाणि यावत् तथाविधसंक्लेशवशात् स्त्रीवेदं बन्धेन संक्रमेण चापूर्य ततः विशुद्धपरिणामेन सम्यक्त्वं समुत्पाद्यासंख्येयानि वर्षाणि यावत् बन्धेन संक्रमेण च पुरुषवेदं समापूर्य ततः पल्योपमासंख्येयभागमात्रं सर्वायुष्ककालं जीवित्वा पर्यन्ते च मिथ्यात्वं गत्वा दशवर्षसहस्रपरिमितं देवायुष्कं बद्ध्वा देवेषु समुत्पन्नः सन्नन्तर्मुहूर्तेन कालेन सम्यक्त्वं प्रतिपद्यते । तत्रापि पुरुषवेदं बन्धेन संक्रमेण च समापूर्य ततश्च्युत्वा मनुजेषु समागत्य सप्तमासाभ्यधिको वर्षाष्टकेऽतिक्रान्ते शीघ्रं क्षपणाय समुत्थितः गुणसंक्रमेण चोपचितं पुरुषवेदं क्षपयन् चरमसमये सर्वसंक्रमेण संक्रमयन् पुरुषवेदस्योत्कृष्टप्रदेशसंक्रमस्वामी भवति, नावलिकाद्विकबद्धस्यान्ते, यतस्तत्र स्तोकमिति हेतोः । तथा पुरुषवेदोत्कृष्टप्रदेशसंक्रमस्वामी एव संज्वलनक्रोधमानमायानामुत्कृष्टप्रदेशसंक्रमस्वामी स्वस्वचरमप्रक्षेपे वाच्यः, शेषं सर्वं पुरुषवेदवद्वाच्यम् । तथा गुणितकर्मांशोऽनेकभवभ्रमणेन चतुरो वारान् मोहनीयमुपशमय्य ततः शीघ्रं क्षपकश्रेणिं प्रतिपन्नः संज्वलनलोभस्यान्तरकरणादारत उत्कृष्टप्रदेशसंक्रमं करोति, न परतः, तदुक्तं पञ्चसङ्ग्रहवृत्तौ—"लोभस्यान्तरकरणादारतः संक्रमो, न परतोऽस्ति" इति, परतः चारित्रमोहप्रकृतीनामानुपूर्व्या सङ्क्रमात् । यत्तु—"लोभसंजलणाए अन्तरकरणस्स चरिमसमए, परतो संकमो णत्थि त्ति कच उक्कोसो पदेससंकमो

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

भवति" इति कर्मप्रकृतिचूर्णावुक्तं तत्रान्तरकरणस्य चरमसमयेऽन्तरकरणप्राक्कालचरमसमय इत्यर्थोऽवसीयते, 'अन्यथाऽन्तरकरणंमि कए चरित्तमोहेणुपुव्विसंकमण'मिति विरोधापत्तेः। एवं वृत्तिद्वये पञ्चसङ्ग्रहबृहद्वृत्तौ च वाच्यम् । यशःकीर्तेरपूर्वकरणगुणस्थानके त्रिंशत्प्रकृतिबन्धव्यवच्छेदसमये उत्कृष्टप्रदेशसंक्रमस्वामी भवति, परतो यशःकीर्तेः संक्रमाभावात् । अत्रोपशमश्रेणिग्रहणं द्वयोरपि गुणसंक्रमेण प्रभूतदललाभार्थम् । आसंसारं परिभ्रमता चतुरो वारानेव मोहमुपशमयति, न पञ्चममपि वारमत उक्तं चतुरो वारान्मोहनीयमुपशमय्येति । तैजससप्तकशुक्ललोहितहारिद्रसुरभिगन्धकषायाम्लमधुरमृदुलघुस्निग्धोष्णागुरुलघुनिर्माणरूपाणां विंशतिप्रकृतीनां चतुःकृत्वो मोहनीयोपशमनानन्तरं बन्धव्यवच्छेदादूर्ध्वमावलिकायाः परतः यशःकीर्त्तौ क्षिप्यमाणानामुत्कृष्टप्रदेशसंक्रमो भवति । आवलिकाया अभ्यन्तरे तु बन्धान्तसमये गुणसंक्रमेण संक्रान्तस्य प्रकृत्यन्तरदलिकस्यावलिकानतिक्रमेणोत्कृष्टप्रदेशसंक्रमो न भवति । एवमेवाध्रुवबन्धिन्योः स्थिरशुभयोरपि वाच्यम् । सम्यग्दृष्टिशुभध्रुवबन्धिन्यः पञ्चेन्द्रियजात्याद्यसंस्थानपराघातोच्छ्वासप्रशस्तविहायोगतित्रसचतुष्कसुभगत्रिकरूपा द्वादश प्रथमसंहननयुता द्वात्रिंशदधिकसागरोपमशतोपचिता उत्कृष्टप्रदेशसंक्रमयोग्या भवन्ति । तथाहि–षट्षष्टिसागरोपमाणि यावत् सम्यक्त्वमनुपालयन्नेता बध्नाति, ततोऽन्तर्मुहूर्तं मिश्रभावमनुभूय भूयोऽपि सम्यक्त्वं प्रतिपद्य तदनुभवन् द्वितीयवारं षट्षष्टिसागरोपमाणि यावदेताः प्रकृतीर्बध्नाति, तदेवं द्वात्रिंशदधिकशतसागरोपमं यावत् सम्यग्दृष्टिरेता द्वादश बन्धेन संक्रमेण चापूर्य प्रथमसंहननं तु मनुजभवहीनं यथासंभवमुत्कृष्टकालमापूर्यापूर्वकरणे बन्धव्यवच्छेदादूर्ध्वमावलिकामात्रं कालमतिक्रम्य यशःकीर्त्तौ संक्रमयन् एतासामुत्कृष्टप्रदेशसंक्रमस्वामी भवति; तदानीं गुणसंक्रमेण लब्धदलिकस्यापि संक्रमावलिकान्तत्वेन संक्रमभावात् । आद्यसंहननस्य तु गुणसंक्रमाभावेन देवभवात् च्युतः सन् सम्यग्दृष्टिर्देवगतिप्रायोग्यं बध्नन् आवलिकामात्रं कालमतिक्रम्योत्कृष्टप्रदेशसंक्रमस्वामी भवति । तथा सप्तसु पूर्वकोट्यायुष्केषु तिर्यग्भवेषु पुनः पुनर्नरकद्विकं बध्नाति, ततोऽष्टमे भवे मनुजो भूत्वा क्षपकश्रेणिमारूढः नरकद्विकं संक्रमयन् चरमप्रक्षेपे सर्वसंक्रमेणोत्कृष्टप्रदेशसंक्रमो भवति । कर्मप्रकृतिचूर्णौ तु–"णिरयदुगंति णिरयगतिणिरयाणुपुव्वीणं उक्कोसो पदेससंकमो भवति, कहं भं०, कम्मभूमिं मोत्तूणं अण्णहिं एतेसिं बन्धो णत्थि संकिलेसेण पुव्वकोडिपुहुत्तं पूरेत्तु खवेन्तस्स" इत्येवमुक्तम् । देवद्विकं वैक्रियसप्तकं च पूर्वकोटिसप्तकं यावत् बन्धेन संक्रमेण चापूर्याष्टमे भवे क्षपकश्रेणिमारूढः स्वबन्धव्यवच्छेदानन्तरमावलिकामतिक्रम्य यदा यशःकीर्तौ संक्रामति तदोत्कृष्टप्रदेशसंक्रमो भवति । गुणसंक्रमेण लब्धकर्मदलसंक्रमलाभार्थं संक्रमावलिकामतिक्रम्येत्युक्तम् । कर्मप्रकृति चूर्णौ पूर्वकोटिपृथक्त्वं सामान्येनोक्तं, पञ्चसंग्रहमूलवृत्तौ तु "तीर्थकराहारकाणां देवद्विकस्य वैक्रियसप्तकस्य स्थिरशुभयोश्च शुभध्रुवबन्धिनीनां च तैजससप्तकशुभवर्णैकादशकागुरुलघुनिर्माणाख्यानां तथेति मह-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

णाच्चतुरुपशामकस्य स्वबन्धावलिकापरतः आसां यशःकीर्त्यामुत्कृष्टप्रदेशसंक्रमो भवती" त्युक्तम् । तथा सप्तमपृथिव्यां वर्तमानश्चतुर्थगुणस्थाने अपर्याप्तान्तर्मुहूर्तन्यूनं त्रयस्त्रिंशत्सागरोपमं यावत् मनुजद्विकं बद्ध्वा चरमेऽन्तर्मुहूर्ते मिथ्यात्वं गतस्तन्निमित्तं तिर्यग्द्विकं बध्नाति । ततो निर्गत्य तिर्यक्षूत्पत्तिप्रथमसमये गुणितकर्मांशो यथाप्रवृत्तसंक्रमेण बध्यमाने तिर्यग्द्विके मनुजद्विकस्योत्कृष्टप्रदेशसंक्रमं करोति । ननु मिथ्यात्वगमनानन्तरमावलिकाचरमसमये मनुजद्विकस्योत्कृष्टप्रदेशसंक्रमं कथं न करोति? न च मिथ्यात्वभवनप्रथमसमये कथमुत्कृष्टप्रदेशसंक्रमं न करोतीति वाच्यम्, चरमसमयबद्धदलिकस्यावलिकानतिक्रमेण संक्रमाभावात् नोत्कृष्टसंक्रमः प्राप्यत इति चेत्, अत्रोच्यते, सप्तमपृथिव्यां मिथ्यात्वे वर्तमानो विध्यातसंक्रमेण मनुजद्विकं संक्रामति न यथाप्रवृत्तसंक्रमेण, यथाप्रवृत्तसंक्रमापहारकालात् विध्यातसंक्रमापहारकालोऽसंख्येयगुणः, तदुक्तं—"सेसस्स दलियस्स (उद्वलनसंक्रमोक्तचरमखण्डदलस्य) अहापवत्तेण अवहारकालो असंखेज्जगुणो अंगुलसेढीए पदेसअसंखेज्जतिभागोत्ति काउं" इति । ननु मिथ्यात्वेऽपि नरद्विकस्य बध्यमानत्वेन कथं न यथाप्रवृत्तसंक्रम इति चेत्? सत्यम्, नवरं सप्तमपृथिव्यां मिथ्यात्वे वर्तमानस्तथास्वाभाव्यात् मिथ्यात्वप्रत्ययेन तिर्यग्द्विकमेव बध्नाति, न मनुजद्विकमिति । तथाहारकसप्तकं तीर्थकरनाम च स्थिरसमं वाच्यम्, केवलं स्वोत्कृष्टबन्धकालं यावदुपचयं कृत्वेति । तत्राहारकसप्तकस्य देशोनपूर्वकोटिं यावत्संयममनुपालयतो यावानप्रमत्तकालस्तावत्सर्वोऽपि बन्धकालोऽवसेयः । जिननाम्नो देशोनपूर्वकोटिद्वयाधिकत्रयस्त्रिंशत्सागरोपमं यावत् बन्धकालो वाच्यः । तथा यः कश्चिद् भवद्वयेन चतुष्कृत्वो मोहनीयमुपशमयन् तत्र चोच्चैर्गोत्रं बध्नन् नीचैर्गोत्रं गुणसंक्रमेण संक्रमयति, तृतीयभवे च मिथ्यात्वं गतः सन् नीचैर्गोत्रं बध्नन् तत्रोच्चैर्गोत्रं संक्रमयति, भूयः सम्यक्त्वं समासाद्योच्चैर्गोत्रं बध्नन् तत्र नीचैर्गोत्रं संक्रमयति, एवं भूयो भूयः परावृत्योच्चैर्गोत्रं नीचैर्गोत्रं च बध्नन् लघु सिद्धिं गन्तुकामो नीचैर्गोत्रबन्धान्तसमये उच्चैर्गोत्रस्य बन्धेन गुणसंक्रमेण चोपचितीकृतस्योत्कृष्टप्रदेशसंक्रमं करोतीत्युक्तमुत्कृष्टप्रदेशसंक्रमस्वामित्वम् ।

उत्कृष्टप्रदेशसंक्रमस्वामिनः ।

ज्ञाना० ५–दर्श० ४–विघ्न ५–औदा० ७ (२१)	सप्तम्या उद्धृत्य पर्या० पञ्चें० प्राप्ततिर्यग्भवो गुणितकर्मांशः प्रथमावलिकान्त्यसमये (नारकभवान्त्यसमयबद्धमप्यत्र संक्रामतीति)
निद्रा २–असात–अनाद्यसंस्थानसंहननानि १०–कुवर्णादि ९–उपघा०–कुखग०–अपर्या०–अस्थिरादि ६–नी० (३२)	१० मान्ते गुणितक्षपकाः
मध्यकसाय ८–स्त्यान० ३–तिर्य०२–विकल ३–सू०–साधा०–६ नोक०(२४)	९ मे गुणितक्षपकाः स्वस्वचरमप्रक्षेपे

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सातस्य	नरकादागत्य प्रथमसमयादुत्कृष्टबन्धकालेन सातं बद्ध्वा असातं बध्नन् असातस्य बन्धाव० अन्त्यसमये
मिथ्यात्वमिश्रयोः	क्षपकः स्वचरिमप्रक्षेपे (सर्वसंक्रमेण)
सम्यक्त्वस्य	सप्तम्यामन्तर्मु० शेषे औप० सम्य० लब्ध्वा दीर्घगुणसंक्रमेण सम्यक्त्वमापूर्य पुनर्मिथ्यात्वं प्राप्तानां प्रथमसमये
अनंतानुबन्धि ४ णाम्	सप्तम्यामन्तर्मु० शेषे चरमावश्यकानि कृत्वाऽनंतरभवे सम्यक्त्वं प्राप्य अनंता० नाम् विसंयोजकाः चरमप्रक्षेपे (सर्वसंक्रमेण)
स्था० आत० उद्यो० ए० नपुंसकनाम्	गुणितेशानः एकें० प्रायो० नपुंसकं भूयोभूयो बध्वाऽनंतरभवे जातः स्त्री पुरुषो वा शीघ्रक्षपणोद्यतः चरमप्रक्षेपे (सर्वसं०)
स्त्रीवेदस्य	पुनः पुनर्युगलिकभवेन स्त्रीवेदं बद्ध्वाऽऽपूर्य च पल्यासं० भागे व्यतिक्रान्ते अकालेन मृत्वा जघ० स्थितिकदेवो भूत्वा तत्रापि तमापूर्यान्यतरवेदेन मनुष्यत्वं लब्ध्वा शीघ्रक्षपणायोद्यतस्य चरमप्रक्षेपे (सर्वसंक्रमेण)
पुरुषवेदस्य	ईशाने नपुंसकमापूर्य संख्येयायुषि गत्वा असंख्येयायुषि गत्वा च स्त्रीमापूर्यासंख्येयवर्षाणि प्राप्तसम्यक्त्वेन पुंवेदमापूर्य पुनर्मिथ्यात्वं प्राप्य जघ० स्थितिदेवत्वेनोत्पद्यान्तर्मुहूर्त्तेन सम्यक्त्वं प्राप्य नृगतावागत्य शीघ्रक्षपणायोद्यतस्य (च० प्र० सर्वसं०)
संज्वलनक्रोधमानमायानाम्	क्षपणकाले पुंवेदोत्कृ० प्र० सं० स्वामिनाम्
सं० लोभयशसोः	चतुर्मोहोपशमं कृत्वा शीघ्रक्षपकाणां (च० प्र० स० सं०)
तै० ७–अगु०–निर्माण–शुभवर्णादि ११ (२०) स्थिर–शुभयोश्च	चतुर्मोहोपशमं कृत्वा बन्धविच्छेदादावलिकापरतः यशसि प्रक्षेपकानां
पंचें०–समच०–परा०–उच्छ्वास–सुखग०–त्रसादि ४–सुभगादि ३ (१२)	१३२ सागराणि यावत् सम्य० कालेनापूर्य ८ मे बन्धविच्छेदानन्तरमावलिकापरतः यशसि प्रक्षेपकः
वज्रर्षभस्य	मनुष्यभवहीनं १३२ सागरं यावदापूर्य सुरभवाच्च्युतः सम्यग्दृष्टिः सन् देवप्रा० बध्नन्नावलिकापरतो देवप्रायोग्ये प्रक्षेपकः
नरक २ कस्य	सप्तवारानुत्कृष्टायुषाऽऽपूर्याष्टमे भवे मनुष्यत्वं प्राप्य जातक्षपकः (च० प्र० स० सं०)
देव २–वै० ७ कयोः	बन्धान्तावलिकापरतः नरक २ कस्योत्कृ० प्र० संक्रमकविधिवत्
मनुष्य २ कस्य	अन्तर्मु० हीन ३३ सा० यावत् सम्यक्त्वेन सह सप्तमनारकत्वेनापूर्यान्तिमान्तर्मुहूर्त्ते मिथ्यात्वं प्राप्तस्तन्निमित्तं तिर्यग्द्विकं बध्नन् गुणितकर्मांशः सप्तम्या निर्गत्य प्रथमे समये यथाप्रवृत्तेन तिर्यग्द्विके संक्रमकः
आहा० ७ कस्य	समुदितोत्कृष्टाप्रमत्तकालं यावत् आपूरकाः (शेषं स्थिरसमं)
जिननाम्नः	स्थिरसमं (परं स पूर्वकोटिद्वयाधिक ३३ सागरमापूर्य जातक्षपकाणां बन्धान्तादावलिकापरतः यशसि संक्रमकः)
उच्चैर्गोत्रस्य	चतुर्मोहोपशमं कृत्वा पुनः पुनः उच्चैर्नीचैश्च परस्परं संक्रमयन् नीचैर्बन्धविच्छेदसमये नीचैर्गोत्रे संक्रमकः

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

साम्प्रतं जघन्यप्रदेशसंक्रमस्वामित्वमभिधानीयम्, तच्च प्रायः क्षपितकर्मांशे प्राप्यत इति क्षपितकर्मांशस्य स्वरूपं कर्मप्रकृतित एवात्र समुद्ध्रियते, तथा च तद्ग्रन्थः—"पल्लासंखिय भागूण कम्मट्ठिइमत्थिओ णिगोएसु। सुहुमेसु भवियजोगं जहन्नगं कट्टु निग्गम्म ॥ १ ॥ जोग्गेसुऽसंखवारे सम्मत्तं लभिय देसविरइं च। अट्ठक्खुत्तो विरइं संजोअणहा तइयवारे ॥ २ ॥ चउरुवसमित्तु मोहं लहु खवन्तो भवे खवियकम्मो। पाएण तहिं पगयं पडुच्च काओवि सविसेसं ॥ ३ ॥" व्याख्या—"यो जीवः पल्योपमासंख्येयभागेनोनां कर्मस्थितिं सप्ततिसागरोपमकोटाकोटिप्रमाणां यावत्पल्योपमासंख्येयभागोनसप्ततिसागरोपमकोटाकोटिप्रमाणं कालं यावदित्यर्थः, सूक्ष्मानन्तकायिकेषु मध्ये स्थित्वा, सूक्ष्मनिगोदा हि स्वल्पायुषो भवन्ति, ततस्तेषां निरन्तरप्रभूतजन्ममरणवेदनार्तत्वेन प्रभूतपुद्गलपरिशाटः स्यादिति सूक्ष्मनिगोदग्रहणम्। सोऽपि शेषनिगोदजीवानपेक्ष्यात्यल्पकषायोऽत्यल्पयोगश्च गृह्यते, मन्दकषायतायां स्वल्पतरां स्थितिं बध्नाति स्तोकां चोद्वर्तयति। मन्दयोगतायां च नवकर्मपुद्गलोपादानमतिस्तोकं भवतीति कृत्वा। ईदृशः सूक्ष्मनिगोदो भूत्वाऽभव्यप्रायोग्यजघन्यकल्पं प्रदेशसञ्चयं कृत्वा ततः सूक्ष्मनिगोदेभ्यो निर्गत्य योग्येषु सम्यक्त्वदेशविरतिसर्वविरतियोग्येषु त्रसेषु मध्ये समुत्पद्य पल्योपमासंख्येयभागमध्येऽसंख्यवारान् यावत् सम्यक्त्वं तावत एव वारान् किञ्चिदूनां देशविरतिं च लब्ध्वा, कथं लब्ध्वेति चेदुच्यते—सूक्ष्मनिगोदेभ्यो निर्गत्य बादरपृथ्वीकायिकेषु मध्ये समुत्पन्नस्ततोऽन्तर्मुहूर्तेन कालेन निर्गत्य मनुष्येषु पूर्वकोट्यायुष्केषु मध्ये समुत्पन्नः, तत्रापि शीघ्रमेव माससप्तकानन्तरं योनिनिर्गमनेन जातोऽष्टवार्षिकः सन् संयमं प्रतिपन्नः। ततो देशोनां पूर्वकोटिं यावत् संयममनुपाल्य स्तोकशेषे जीविते मिथ्यात्वं प्राप्तः। ततो मिथ्यात्वसहित एव मृत्वा दशवर्षसहस्रप्रमाणस्थितिषु देवेषु मध्ये देवत्वेनोत्पन्नः। ततोऽन्तर्मुहूर्तमात्रे गते सम्यक्त्वं प्राप्नोति। ततो दशवर्षसहस्राणि जीवित्वा तावन्तं च कालं सम्यक्त्वमनुपाल्यान्ते मिथ्यात्वेन कालं गतः सन् बादरपृथ्वीकायिकेषु समुत्पन्नः। ततोऽन्तर्मुहूर्तेन ततोऽप्युद्धृत्य मनुष्येषु समुत्पद्यते। ततः पुनरपि सम्यक्त्वं देशविरतिं वा प्रतिपद्यते। एवं देवमनुष्यभवेषु सम्यक्त्वादि गृह्णन् मुञ्चंश्च तावद्वाच्यो यावत्पल्योपमासंख्येयभागमात्रकालमध्ये संख्यातीतान् यावत्सम्यक्त्वलाभः स्वल्पकालिकश्च देशविरतिलाभो भवति। सम्यक्त्वादिप्रतिपत्तिकाले बहुप्रदेशाः प्रकृतीरल्पप्रदेशाः करोतीति बहुशः सम्यक्त्वादिप्रतिपत्तिग्रहणम्। एतेषु च सम्यक्त्वादियोग्येषु भवेष्वष्टकृत्वा अष्टौ वारान् यावद्विरतिं सर्वविरतिं लभते। "तइयवारे" त्ति तावत एव वारानष्टौ वारानित्यर्थः। "संयोजणहा" उद्वलनेनानन्तानुबन्धिविघातको भूत्वा, उक्तं च—"अणउव्वलणं च अडवारा" इति। तथा चतुरो वारान् मोहनीयमुपशमय्य ततोऽस्मिन् भवे लघु शीघ्रं कर्माणि क्षपयन् क्षपितकर्मांश उच्यते, तेन च क्षपितकर्मांशेनेह जघन्यप्रदेशसंक्रमस्वामित्वचिन्तायां प्रायेण बाहुल्येन प्रकृतमधिकारः, काश्चित्पुनः प्रकृतीरधिकृत्य सविशेषं भणिष्यामि ॥१॥२॥३॥" इति।

अथ जघन्यप्रदेशसंक्रमस्वामित्वं पृथक्त्वेनोच्यते—तत्र ज्ञानावरणपञ्चकदर्शनावरणषट्कान्तरायपञ्चकहास्यरतिभयजुगुप्सारूपाणां विंशतिप्रकृतीनां स्वस्वबन्धचरमसमये यथाप्रवृत्तसंक्रमेण जघन्यप्रदेशसंक्रमो भवति। तत्राप्यवधिज्ञानावरणवर्जज्ञानावरणचतुष्कावधिदर्शनावरणवर्जदर्शनावरणत्रयरूपावरणसप्तकस्यावधिज्ञानयुतो जघन्यप्रदेशसंक्रम-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

स्वामी भवति, यतोऽवधिज्ञानमुत्पादयता प्रभूताः कर्मपुद्गलाः परिशाटिता भवन्तीति। तथाऽवधिद्विकावरणयोस्त्वनवधिको वाच्यः, यतोऽवधिद्विकमुत्पादयतस्तीव्रक्षयोपशमभावतस्तयोरतीव रूक्षाः कर्मपुद्गला जायन्ते, ततः स्वबन्धचरमसमयेऽपि प्रभूताः पुद्गलाः परिशटन्ति संक्रमयन्ति चेति जघन्यप्रदेशसंक्रमो न लभ्यते। निद्राद्विकहास्यचतुष्कयोस्तु स्वस्वबन्धव्यवच्छेदानन्तरं गुणसंक्रमसद्भावेन जघन्यसंक्रमो न लभ्यत इति स्वबन्धचरमसमयो गृहीतः। अन्तरायपञ्चकस्य बन्धोपरमे प्रतिग्रहाभावात् संक्रमाभावोऽतो बन्धचरमसमय इत्युक्तम्। स्त्यानर्द्धित्रिकस्त्रीवेदयोरन्तर्मुहूर्तमिश्रान्तरितं द्वात्रिंशच्छतसागरोपमं यावत् सम्यक्त्वप्रत्ययतः प्रभूतं कर्मदलं परिशाट्य क्षपणायोद्युक्तो यथाप्रवृत्तकरणान्तिमसमये विध्यातसंक्रमेण जघन्यप्रदेशसंक्रमं करोति। अपूर्वकरणादौ गुणसंक्रमादिसद्भावेन जघन्यसंक्रमाभावः। पञ्चसंग्रहमूलवृत्तौ तु यथाप्रवृत्तसंक्रमेण जघन्यसंक्रम इत्युक्तं परं तदशुद्धं प्रतिभाति, यतो बन्धयोग्यतायां सत्यां यथाप्रवृत्तसंक्रमप्रवृत्तेः, अत्र तु बन्धाभावात् जघन्यसंक्रमप्रसङ्गाच्च विध्यातसंक्रम एव संभवति, कर्मप्रकृतिचूर्णौ तु अभिधानपुरस्सरं नोक्तमिति। तथा सातवेदनीयस्याकृतमोहोपशमश्चरमासातबन्धस्यान्तिमसमये वर्तमानः क्षपणायोद्यतो जघन्यप्रदेशसंक्रमं करोति, परतो हि सातस्य प्रतिग्रहतैव भवति, न संक्रमः। कृतमोहोपशमो हि गुणसंक्रमेणोपचितस्य सातस्य प्रभूतं दलं संक्रामति, न च तेनेह प्रयोजनमित्यकृतमोहोपशम इत्युक्तम्। तथाऽकृतमोहोपशमः क्षपकश्रेण्यामारूढोऽपूर्वकरणाद्धायाः प्रथमावलिकायाश्चरमसमये संज्वलनलोभस्य जघन्यप्रदेशसंक्रमं करोति, परतस्तु गुणसंक्रमेण संक्रान्तदलिकस्य संक्रमावलिकातिक्रान्तत्वेन संक्रमसंभवात् जघन्यप्रदेशसंक्रमो न प्राप्यते। तथा मिथ्यात्वस्यान्तर्मुहूर्तमिश्रान्तरितं द्वात्रिंशदुत्तरशतसागरोपमं यावत्सम्यक्त्वानुपालनेन क्षपयित्वा किञ्चिच्छेषीकृतस्य क्षपकारूढः स्वकीययथाप्रवृत्तकरणचरमसमये विध्यातसंक्रमेण जघन्यप्रदेशसंक्रमं करोति, परतो गुणसंक्रमसंभवेन जघन्यसंक्रमो न प्राप्यत इति। तथा सम्यक्त्वमिश्रयोः स्तोककालिकगुणसंक्रमेण मिथ्यात्वदलोपचितीकृतयोः द्वे षट्षष्टी सागरोपमाणां सम्यक्त्वमनुभूय मिथ्यात्वं गतः पल्योपमासंख्येयभागमात्रेण कालेन सम्यक्त्वमिश्रे उद्वलयन् स्तोके चोद्वलनासंक्रमे द्विचरमस्थितिखण्डस्य चरमसमये मिथ्यात्वरूपे परस्थाने दलिकप्रक्षेपरूपं जघन्यप्रदेशसंक्रमं करोति। तथा चतुष्कृत्वो मोहनीयोपशमं चारित्रमोहप्रकृतीनां दलिकं प्रभूतं स्थितिघातरसघातगुणश्रेणिगुणसंक्रमैः क्षपयति, ततो मिथ्यात्वं गत्वा विसंयोजकः पुनः स्तोककालमनन्तानुबन्धिनो बद्ध्वा चारित्रमोहसत्कं स्तोकं दलिकं बध्यमानेषु तेषु संक्रमयति। ततोऽन्तर्मुहूर्ते गते सति पुनः सम्यक्त्वं समासाद्य द्वात्रिंशदुत्तरशतसागरोपमं यावदनुपाल्य च क्षपणायोत्थितः सन् स्वकीययथाप्रवृत्तकरणचरमसमयेऽनन्तानुबन्धिनां विध्यातसंक्रमेण जघन्यप्रदेशसंक्रमं करोति, परतः गुणसंक्रमसंभवेन जघन्यप्रदेशसंक्रमो न प्राप्यत इति। तथाऽरतिशोकमध्य-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मकषायाष्टककुवर्णादिनवकोपघातास्थिराशुभायशःकीर्त्यसातवेदनीयरूपाणां चतुर्विंशतिप्रकृतीनां देशोनपूर्वकोटिं यावत् संयममनुपाल्य पर्यन्ते तीव्रक्षपकश्रेण्यामारूढो यथाप्रवृत्तकरणचरमसमये यथाप्रवृत्तसंक्रमेण जघन्यप्रदेशसंक्रमं करोतीति पञ्चसङ्ग्रहमूलवृत्तिकाराः, तथा चाहुः—"अरईसोगट्ठकसायअसुभधुवबन्धिअथिरतियगाणं । अस्सायस्स य चरिमे अहापवत्तस्स लहु खवगे ॥ १ ॥" व्याख्या—"अरतिशोकमध्यमाष्टकषायाशुभध्रुवबन्धिकुवर्णादिनवकोपघातास्थिराशुभायशःकीर्त्यसातानां देशोनपूर्वकोटिकृततीव्रसंयमस्य क्षपकश्रेण्यां यथाप्रवृत्तकरणान्तसमये यथाप्रवृत्तसंक्रमेण जघन्यः प्रदेशसंक्रमो भवति, अपूर्वकरणे गुणसंक्रमसंभवात् स न लभ्यते इति गाथार्थः" इति । मलयगिरिचरणास्तु कषायाष्टकरहितानां षोडशप्रकृतीनां मासपृथक्त्वाभ्यधिकाष्टसु वर्षेष्वतिक्रान्तेषु शीघ्रमेव क्षपणायोत्थितो यथाप्रवृत्तकरणचरमसमये यथाप्रवृत्तसंक्रमेण जघन्यप्रदेशसंक्रमं करोति । मध्यमकषायाष्टकस्य तु देशोनपूर्वकोटिं यावत् संयमं परिपाल्य क्षपणायोत्थितो यथाप्रवृत्तिकरणचरमसमये विध्यातसंक्रमेण जघन्यप्रदेशसंक्रमं करोति । तथा चोक्तगाथायाः मलयगिरिकृतवृत्तिः—"अरतिशोकयोरष्टानामप्रत्याख्यानप्रत्याख्यानावरणसंज्ञितानां कषायाणामशुभध्रुवबन्धिनीनां कुवर्णादिनवकोपघातरूपाणां अस्थिरत्रिकस्यास्थिराशुभायशःकीर्तिरूपस्यासातवेदनीयस्य सर्वसंख्यया चतुर्विंशतिप्रकृतीनां, तत्रापि कषायाष्टकरहितानां लघुक्षपके सर्वेभ्योऽप्यन्येभ्यः शीघ्रमेव क्षपणायोत्थितस्य मासपृथक्त्वाभ्यधिकेष्वष्टसु वर्षेष्वतिक्रान्तेषु क्षपणाय समुद्यतस्येत्यर्थः । अष्टौ कषायान् प्रति देशोनां पूर्वकोटिं यावत् संयममनुपाल्य मूलटीकायां पुनः सर्वा अप्येताः प्रकृतीरधिकृत्य देशोनां पूर्वकोटिं यावत् संयममनुपाल्येत्युक्तम् । क्षपकश्रेणिं प्रतिपन्नस्य यथाप्रवृत्तकरणचरमसमये कषायाष्टकस्य विध्यातसंक्रमेण शेषाणां यथाप्रवृत्तसंक्रमेण जघन्यप्रदेशसंक्रमो भवति" इति । न्यायाचार्याणामप्ययमेवाभिप्रायः । कर्मप्रकृतिचूर्णिकृद्भिस्तु चतुर्विंशतिप्रकृतीनां विध्यातसंक्रमेण जघन्यप्रदेशसंक्रमो भवतीत्युक्तं, तथा च त आहुः—"अपच्चक्खाणावरणपच्चक्खाणावरणासाता, कुवन्नन-वगं उवघातं च एता दस असुभधुवा, अथिरं असुभं अजसं च एतं अथिरतिगं भण्णइ, एतासिं बावीसाए पगतीणं अट्ठकसायवज्जाणं सव्वलहुंति लहुमेव सेढिं पडिवन्नस्स खवणान्ते अब्भुट्ठियस्स अहापवत्तस्स चरिमंमित्ति अप्पणो अहापवत्तकरणस्स चरिमसमए विज्झायसंकमेणं जहन्नओ पदेससंकमो परतो गुणसंकमो होतित्ति जहन्नओ पदेससंकमो ण होति। अट्ठण्हं कसायाणं देसूणं पूव्वकोडिं संजमं अणुपालेऊण अन्ते खवगसेढिं पडिवन्नस्स जहन्नगं भाणियव्वं । अरतिसोगाणं जहा असायस्स जहन्नतो पदेससंकमो तहेव सामी वि सो चेव" इति । अरतिशोकास्थिराशुभायशःकीर्त्यसातमध्यमकषायाष्टकरूपाणां चतुर्दशप्रकृतीनामप्रमत्ते बन्धाभावेन विध्यातसंक्रमेण जघन्यप्रदेशसंक्रमो भवति, अप्रमत्तगुणस्थाने चारित्रमोहसत्कस्य यथाप्रवृत्तिकरणस्याभिधानात्, शेषाणां बध्यमानत्वेन यथाप्रवृत्तसंक्रमेण जघन्यप्रदेशसंक्रमो भवतीत्यस्मदभिप्रायः, तत्त्वं पुनः तद्विदो विदन्ति । तथा पुंवेदस्य लोभवर्जसंज्वलनत्रिकस्य च क्षपकश्रेण्यामारूढो घोलमानेन जघन्ययोगिना सता स्वस्वबन्धव्यवच्छेदसमये यद्दलं बद्धं तस्य चरमप्रक्षेपे जघन्यप्रदेशसंक्रमो

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

भवति । एतासां चतसृणामपि प्रकृतीनां स्वस्वबन्धचरमसमये समयोनावलिकाद्विकबद्धं मुक्त्वाऽन्यत् संक्रमयोग्यं प्रदेशसत्कर्म न विद्यते । समयोनावलिकाद्विकबद्धमपि प्रतिसमयं गुणसंक्रमेण समयोनावलिकाद्विकमात्रेण कालेन क्षयमुपयाति तावत् यावत् चरमसमयबद्धदलिकस्यासंख्येयभागः शेषोऽवतिष्ठते । ततस्तं सर्वसंक्रमेण संक्रमयतो जघन्यप्रदेशसंक्रमो भवति । देवद्विकनरकद्विकवैक्रियसप्तकरूपवैक्रियैकादशकमेकेन्द्रियभवे उद्वलय्य यः पञ्चेन्द्रियत्वं प्राप्तः तत्र पुनरप्येकादशकमन्तर्मुहूर्तं यावत् बद्ध्वा ततस्त्रयस्त्रिंशत्सागरोपमायुष्को नारको जातः तत्र च यथासंभवमनुभूय तत उद्धृत्य पञ्चेन्द्रियतिर्यक्षु मध्ये समुत्पन्नः तत्र वैक्रियैकादशकमबद्ध्वैकेन्द्रियो जातस्तस्य तत्र पल्योपमासंख्येयभागमात्रकालप्रमाणया चिरोद्वलनयोद्वलयतो द्विचरमस्थितिखण्डस्य चरमसमये यः परप्रकृतौ दलिकप्रक्षेपः स वैक्रियैकादशकस्य जघन्यप्रदेशसंक्रमो भवति । तथा तेजोवायुभवेषु वर्तमानेन मनुजद्विकमुच्चैर्गोत्रं चोद्वलितं भूयः सूक्ष्मैकेन्द्रियभवप्राप्तेनान्तर्मुहूर्तकालं यावद् बद्धं ततो निर्गत्य यः पञ्चेन्द्रियत्वं प्राप्तः, ततो मृत्वा सप्तमपृथिव्यां ज्येष्ठस्थितिको नारको जातः, ततः पुनरुद्धृत्य पञ्चेन्द्रियतिर्यक्त्वेन समुत्पन्नः, एतावत्कालमुच्चैर्गोत्रं मनुजद्विकमबद्ध्वा प्रदेशसंक्रमेण चानुभूय तेजोवायुषु मध्ये समुत्पन्नः, तत्र तस्य मनुजद्विकमुच्चैर्गोत्रं च चिरोद्वलनयोद्वलयतो द्विचरमस्थितिखण्डस्य चरमसमये यः परप्रकृतौ दलिकप्रक्षेपः स मनुजद्विकस्योच्चैर्गोत्रस्य च जघन्यप्रदेशसंक्रमो भवति । तथाऽऽहारकसप्तकमप्रमत्ते स्तोककालं बद्ध्वा कर्मवैचित्र्यादविरतिभावं गतस्ततोऽन्तर्मुहूर्तात्परतो दीर्घपल्योपमासंख्येयभागमात्रप्रमाणया महोद्वलनयोद्वलयतो द्विचरमस्थितिखण्डचरमसमये परप्रकृतौ यत्प्रदेशाग्रं प्रक्षिपति तत् तस्य जघन्यप्रदेशसंक्रमो भवति । तथा कश्चित्क्षपितकर्मांशः सर्वजघन्यतिर्यग्द्विकोद्योतसत्कर्मा त्रिषष्ट्यधिकं सागरोपमाणां शतं पल्योपमचतुष्कं च यावत् तिर्यग्द्विकमुद्योतं चाबद्ध्वा यथाप्रवृत्तकरणचरमसमये तयोर्विध्यातसंक्रमेण जघन्यप्रदेशसंक्रमं करोति । कथमुक्तकालं यावदबन्ध इति चेदित्थं—कश्चित्क्षपितकर्मांशस्त्रिपल्योपमायुष्केषु देवकुर्वादिषु युगलिकधार्मिकेषु मनुजेषु समुत्पन्नः, तत्रैतत्प्रकृतित्रिकस्य तिर्यग्प्रायोग्यत्वेन बन्धाभावः, युगलिकास्तु देवप्रायोग्यमेव कर्म बध्नन्ति, न शेषगतिप्रायोग्यं, तत्र चान्तिमेऽन्तर्मुहूर्ते सम्यक्त्वं समासाद्याप्रतिपतितसम्यक्त्वो मृत्वा पल्योपमस्थितिकदेवत्वेन समुत्पन्नः । तत्र च सम्यक्त्वप्रत्ययात् एतत्त्रिकं न बध्नाति, ततोऽप्यप्रतिपतितसम्यक्त्वो मनुजेषूत्पद्य चारित्रं च परिपाल्याप्रतिपतितसम्यक्त्वो ग्रैवेयके त्रिदश एकत्रिंशत्सागरोपमस्थितिको जातस्तत्र चान्तर्मुहूर्तादूर्ध्वं मिथ्याभावं प्राप्तः, तत्र भवप्रत्ययत एवैतदबन्धः, ततो भूयोऽप्यन्तिमेऽन्तर्मुहूर्ते सम्यग्दर्शनं समासाद्याप्रतिपतितसम्यक्त्वो मनुजेषु समुत्पन्नः, तत्र च सर्वविरतिं प्रतिपाल्य तथैव ससम्यक्त्वो विजयादिषु देवत्वेन समुत्पन्नः, ततश्च्युत्वा ससम्यक्त्वो मनुष्येषु समुत्पन्नः तत्रापि चारित्रमाराध्य भूयो विजयादित्रिदशेषु समुत्पन्नः, ततोऽपि निर्गत्य मनुष्येषु ससम्यक्त्वः समुत्पन्नः, तत्रान्तर्मुहूर्तादूर्ध्वं मिश्रं गच्छति, पुनः सम्यक्त्वं समासाद्य वारत्रयमच्युतगमनेन षट्षष्टिसागरोपम-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0. In Public Domain. Digitized by Sarayu Trust/eGangotri

प्रमाणं सम्यक्त्वकालं पूरयति, अत्र सम्यक्त्वात् प्रच्युतस्य मिश्रगमनमुक्तं तत्कार्मग्रन्थिकमतेन, सैद्धान्तिकानां तु नैतत्सम्मतं, तथा चोक्तं कल्पभाष्ये—"मिच्छत्ता संकंती अविरुद्धा होइ सम्ममीसे तु । मीसातो वा दुण्णिवि ण उ सम्मा परिणमे मीसं ॥९॥"—मिथ्यात्वात् मिथ्यात्वगुणस्थानात् सम्यक्त्वमिश्रयोरविरतसम्यग्दृष्टिमिश्रदृष्टिगुणस्थानकयोः संक्रान्तिरविरुद्धा भवति, मिश्रतो वा द्वयोर्मिथ्यात्वगुणस्थानाविरतसम्यग्दृष्टिगुणस्थानयोः संक्रान्तिरविरुद्धा भवतीति योज्यम्, सम्यक्त्वात् अविरतसम्यग्दृष्टेः मिथ्यात्वे संक्रान्तिः, न पुनर्मिश्रगुणस्थानके इत्येवमर्थे क्रियमाणे सम्यक्त्वात् मिश्रगमनं सैद्धान्तिकाभिप्रायेण न संभवतीति । कल्पभाष्यवृत्तौ तु मलयगिरिभिः मिथ्यात्वमिश्रसम्यक्त्वपुद्गलानां संक्रमपरत्वेनेयं गाथा व्याख्याता । संक्रमे च कर्मप्रकृतिकृतां सैद्धान्तिकानां च न विरोधः संभाव्यते, यतः सम्यक्त्वपुद्गला न कस्यापि मते सम्यग्मिथ्यात्वे संक्रामन्ति । मिथ्यादृष्टौ दर्शनमोहनीयस्य संक्रमः बध्यमाने मिथ्यात्वे एव भवति, सम्यग्दृष्टौ तु सम्यक्त्वपुद्गलाः अन्यप्रकृतिरूपेण न संक्रामन्ति, द्वितीये तृतीये गुणस्थानके च दर्शनमोहस्य संक्रम एव निषिद्ध इत्यादिकं प्राक्प्रकृतिसंक्रमेऽभिहितं तदेव कर्मप्रकृतिकृतामप्याशयः । सैद्धान्तिकाभिप्रायप्रदर्शनार्थं तु दर्शनमोहसंक्रमसंबन्धवत्सवृत्तिकं कल्पभाष्यमेवोपन्यस्यते, तथा च तद्ग्रन्थः—"सोऊण अहिसमेचा करेइ सो वड्ढमाणपरिणामो । मिच्छे सम्मामिच्छे सम्मे विय पोग्गले समयं ॥ १० ॥" व्याख्या—"श्रुत्वा केवलिप्रभृतीनां वचः अभिसमेत्य वा जातिस्मरणादिना सम्यक्त्वमवगम्य, सोऽपूर्वकरणे वर्तमानो वर्धमानपरिणामः समकमेककालं मिथ्यात्वपुद्गलान् त्रिधा करोति, तद्यथा—'मिच्छे' इति मिथ्यात्वपुद्गलान् सम्यग्मिथ्यात्वपुद्गलान् सम्यक्त्वपुद्गलानिति" । अथैषां पुद्गलानां परस्परं संक्रमो भवति किंवा नेति उच्यते—भवतीति ब्रूमः, तथा चाह—"मिच्छत्ताओ मीसे मीसस्स उ होज्ज संकमो दोसुं । सम्मे वा मिच्छे वा सम्मा मिच्छे न पुण मीसं ॥ ११ ॥" व्याख्या—"मिथ्यात्वान्मिथ्यात्वदलिकात्सम्यग्दृष्टिः प्रवर्धमानपरिणामः पुद्गलानाकृष्य मिश्रे, उपलक्षणमेतत् सम्यक्त्वे च संक्रमयति, मिश्रस्य पुद्गलानां संक्रमो द्वयोर्भवति, तद्यथा—सम्यक्त्वे मिथ्यात्वे च, तत्र सम्यग्दृष्टिः सम्यक्त्वे संक्रमयति मिथ्यादृष्टिर्मिथ्यात्वे, सम्यक्त्वात् सम्यक्त्वदलिकात् पुनः पुद्गलान् मिथ्यात्वे संक्रमयति न पुनर्मिश्रमिति" । साम्प्रतममुमेवार्थं प्रकारान्तरेणाह—"मिच्छत्ताओ अहवा मीसं सम्मं व कोइ संकमइ । मीसाओ वा सम्मं गुणवुड्ढी हायतो मिच्छं ॥ १२ ॥" व्याख्या—"अथवेत्युक्तस्यैवार्थस्य भणनप्रकारान्तरद्योतने, मिथ्यात्वान्मिथ्यात्वदलिकात् पुद्गलानाकृष्य कश्चिन्मिश्रं सम्यक्त्वं च संक्रमयति । यदि वा कश्चिद् गुणैर्वृद्धिर्यस्य स गुणवृद्धिः प्रवर्धमानपरिणामः सम्यग्दृष्टिरित्यर्थः, मिश्रान्मिश्रदलिकात् पुद्गलानादाय सम्यक्त्वं संक्रमयति । हायको हीनपरिणामो मिथ्यादृष्टिरित्यर्थः, मिश्रात् पुद्गलानाकृष्य मिथ्यात्वं संक्रमयतीति" । "मिच्छत्ता संकंती अविरुद्धा होइ सम्ममीसे तु । मीसातो वा दुण्णि वि ण उ सम्मा परिणमे मीसं ॥ १३ ॥" व्याख्या—"मिथ्यात्वात् पुद्गलसंक्रान्तिः सम्यक्त्वमिश्रयोरविरुद्धा, मिश्रतो वा सम्यग्मिथ्यात्वतो वा पुद्गलानादाय द्वावपि संक्रमयति, तद्यथा—मिथ्यात्वं सम्यक्त्वं च यथोक्तमनन्तरं, सम्यक्त्वात्

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सम्यक्त्वदलिकात् पुनः पुद्गलानादाय न मिश्रं मिश्रभावं परिणमयति" इति । ननु मलयगिरिपादैः "मिच्छत्ताओ" इतीयं गाथा दर्शनमोहनीयसंक्रमपरत्वेन व्याख्याता, कल्पभाष्यसप्तोत्तरशततमगाथावृत्तौ च स्पष्टतया मिश्रगमनमपि सम्यक्त्वादुक्तं तथा चाहुः–"प्रथमतया क्षायोपशमिकं सम्यक्त्वमासादयति, ततः परिणामवशतः कालान्तरेण मिश्रं मिथ्यात्वं वा गच्छति" इत्युक्तं तथापि किमर्थं भवता मतान्तरत्वेनोपन्यस्यत इति चेत्? सत्यम्, किन्तु देवेन्द्रसूरिभिर्न्यायाचार्यैश्चेयं गाथा सैद्धान्तिकमतत्वेनोपन्यस्ता, तथा च नव्यशतकवृत्तौ–"इह च सम्यक्त्वात् प्रच्युतस्य मिश्रगमनं यदुच्यते तत्कार्मग्रन्थिकाभिप्रायेण संमतमेवेति, सैद्धान्तिकानां तु न संमतमिति । उक्तं च–"मिच्छत्ता संकंती अविरुद्धा होइ सम्ममीसेसु । मीसाओ वा दोसुं सम्मा मिच्छं न उण मीसं ॥ १ ॥" इत्यस्माभिरपि तथैवोपन्यस्तमिति । तदुक्तं–"पलियाइं तिन्नि भोगावणिंमि भवपच्चयं पलियमेगं । सोहम्मे सम्मत्तेण नरभवे सव्वविरईए ॥ १ ॥ मिच्छो भवपच्चयओ गेविज्जे सागराइ इगतीसं । अन्तमुहुत्तुणाइं संमत्तं तम्मि लहिऊणं ॥ २ ॥ विरयनरभवंतरिओ अणुत्तरसुरो उ अयरच्छावट्ठा । मिस्सं मुहुत्तमेगं फासिय मणुओ विरओ ॥ ३ ॥ छावट्ठी अयराणं अच्चुयए विरयनरभवंतरिओ । तिरिनरयतिगुज्जोयाण एस कालो अबन्धम्मि ॥ ४ ॥" इति । यत्त्वत्र विजयादिषु वारद्वयं गतस्यापि अच्युतादिगमनमुक्तं तत्तत्त्वार्थकृतां न सम्मतं, तथा चाहुः तत्त्वार्थसूत्रे–"विजयादिषु द्विचरमाः" इति । पञ्चसंग्रहमूलवृत्तिसत्के द्वे प्रती उपलब्धे । तत्रैकस्यां विध्यातसंक्रमेण जघन्यसंक्रमो भवतीत्युक्तम् । अन्यस्यां तु–"त्रिषष्ट्याभ्यधिकं सागरोपमशतं ग्रैवेयकानुत्तरदेवत्वेष्वबद्ध्वा ततस्तिर्यग्द्विकोद्योतानि यथाप्रवृत्तकरणान्तसमये यथाप्रवृत्तसंक्रमेण संक्रमयति, तदा जघन्यसंक्रमस्तेषां भवति" इत्युक्तं तदशुद्धं प्रतिभाति, यतः त्रिषष्ट्याभ्यधिकसागरोपमशतभावनायामग्रे "तिर्यग्द्विकोद्योतानि यथाप्रवृत्तकरणान्तसमये विध्यातसंक्रमेण संक्रमयति, तदा जघन्यः संक्रमः स्यादिति । स्वबन्धान्तसमये जघन्यसंक्रमेण संक्रामती"त्युक्तम् । तथा सप्तमगुणस्थाने यथाप्रवृत्तकरणान्ते एतत्त्रिकस्य बन्धाभावश्चात एव 'स्वबन्धान्तसमये जघन्यसंक्रमेण संक्रामती' त्यप्यशुद्धम् । एवं जातिचतुष्कस्थावरचतुष्कातपानामपि वाच्यम् । नवरं पञ्चाशीत्यधिकं सागरोपमशतं पल्योपमचतुष्कं चावद्ध्वेति वाच्यम् । तथा हि–क्षपितकर्मांशो द्वाविंशतिसागरोपमस्थितिकः षष्ठपृथिव्यां नारको जातः । तत्र च भवप्रत्ययत एवैतासामबन्धः । पर्यन्तमुहूर्ते सम्यक्त्वं समासाद्य ससम्यक्त्वो मनुजेषूत्पद्य देशविरतिं समासाद्य ततो मृत्वा चतुष्पल्यस्थितिकः सौधर्मदेवो जातः । ततोऽप्यप्रतिपतितसम्यक्त्वो निर्गत्य मनुष्येषु समुत्पन्नः तत्रापि सर्वविरतिं समाराध्य मृत्वा एकत्रिंशत्सागरोपमस्थितिके नवमग्रैवेयके देवो जातः । तत्र चान्तर्मुहूर्तोर्ध्वं मिथ्यात्वं गतोऽपि भवप्रत्ययादेव एताः प्रकृतीर्न बध्नाति । ततश्चान्तिमेऽन्तर्मुहूर्ते सम्यक्त्वं समासाद्याप्रतिपतितसम्यक्त्वस्ततश्च्युत्वा मनुजेषु समजनि । तत्र च चारित्रं परिपाल्य वारद्वयं विजयादिषु गमनेन षट्षष्टिसागरोपमाणि सम्यक्त्वकालं पूरयित्वा, मनुजेष्वन्तर्मुहूर्तं

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मिश्रकालमनुभूय तदन्तरितं द्वितीयं षट्षष्टिसागरोपमं यावत् पुनर्वारत्रयमच्युतगमनेन सम्यक्त्वमनुभूयान्तिमेऽन्तर्मुहूर्ते क्षपणायोद्यतते । सर्वत्रैतासां बन्धाभावः । पञ्चेन्द्रिय-जात्याद्यसंस्थानाद्यसंहननतैजससप्तकप्रशस्तखगतिशुभवर्णाद्येकादशकागुरुलघुपराघातोच्छ्वा-सत्रसंदशकनिर्माणरूपाणां षट्त्रिंशत्प्रकृतीनां जघन्यं प्रदेशाग्रं कृत्वा क्षपितकर्मांशः क्षप-कश्रेण्यामारूढोऽपूर्वकरणसत्कप्रथमावलिकान्तसमये जघन्यप्रदेशसंक्रमं करोति । तत ऊर्ध्वं गुणसंक्रमेण लब्धदलिकस्यापि संक्रमावलिकातिक्रान्तत्वेन संक्रमसंभवात् जघन्यो न प्राप्यते । पञ्चसङ्ग्रहमूलवृत्तौ तु "प्रथमसंहननवर्जपञ्चत्रिंशत्प्रकृतीनामेव प्रथमसंहननस्य स्वबन्धान्तसमये" इति । तथा प्रथमवर्जसंहननपञ्चकप्रथमवर्जसंस्थानपञ्चकाप्रशस्तखगति-दुर्भगदुःस्वरानादेयनपुंसकवेदनीचैर्गोत्ररूपाणां षोडशप्रकृतीनां स्त्रीवेदवद्वाच्यम् । नवर-मेतासां जघन्यप्रदेशसंक्रमस्वामी प्रथमं त्रिपल्योपमायुष्केषु मनुष्येषु मध्ये समुत्पन्नोऽन्तिमे चान्तर्मुहूर्तेऽवाप्तसम्यक्त्वो वाच्यः, शेषं तथैव वाच्यम् । औदारिकसप्तकस्य सर्वजघन्य-प्रदेशसत्कर्मा सन् युगलिकधार्मिकेषु तिर्यङ्मनुष्येषु समुत्पन्नस्तत्र च तमनुभवन् निजायु-षश्चरमसमये तत्परप्रकृतौ संक्रमयतो विध्यातसंक्रमेण जघन्यप्रदेशसंक्रमं करोति । जिनना-म्नस्तु बन्धं कुर्वता प्रथमसमये यद्बद्धं दलिकं बन्धावलिकातिक्रान्तायां सत्यां यथाप्रवृत्त-संक्रमेण यदा संक्रमयति तदा जघन्यसंक्रमो भवति । तदेवमुक्तं जघन्यप्रदेशसंक्रमस्वा-मित्वम् । तत्समाप्तौ च समाप्तः प्रदेशसंक्रमः । तदेवं समर्थितं संक्रमकरणम् ॥

जघन्यप्रदेशसंक्रमस्वामिनः । अयं ज० प्र० संक्रमः प्रायः क्षपितानां (क्षपितकर्मांशानां) संभवेत् ।

ज्ञानाव० ४–दर्शना० ३ अवधि २ कस्य	स्वस्वबन्धविच्छेदसमये अवधिलब्धिमताम् (यथाप्र० सं०) „ अवधिलब्धिरहितानाम्
निद्रा २–विघ्न ५–हास्य–रति–भय–कु-त्सानाम् (११)	„ यथाप्रवृत्तसंक्रमेण
सातस्य	असातस्यान्त्यबन्धसमये वर्त्तमानोऽनुपशमितमोहः क्षपणोद्यतः
सं० लोभस्य	क्षपणोद्यतानुपशमितमोहानामपूर्वकरणप्रथमावलिकान्त्यसमये
स्त्रीवेद–स्त्यानर्द्धित्रिकयोः	क्षपणोद्यतानां परिपालित १३२ सा० सम्यक्त्वानां यथाप्रवृत्तकरणान्ते विध्यातेन
मिथ्यात्वस्य	„ „ „ „
सम्यक्त्व–मिश्रयोः	ह्रस्वगुणसंक्रमेणापूर्य १३२ सा० सम्यक्त्वं धृत्वा मिथ्यात्वप्राप्तानां उद्व-लनेन उपान्त्यखण्डस्यान्तिमसमये परप्रक्षेपेण
अनन्तानुबन्धि ४ र्णाम्	चतुर्मोहोपशमं कृत्वा मिथ्यात्वं प्राप्य पुनः १३२ सा० सम्यक्त्वं प्राप्य क्षपणोद्यतानां यथाप्र० करणान्ते विध्यातेन
असात–कुवर्णादि ९–उपघात–अस्थिर-अशुभ–अयशसां (१४)	देशोनपूर्वकोटिसंयमितानां क्षपकाणां यथाप्र० करणान्त्यसमये यथा-प्रवृत्तसंक्रमेण

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मध्यकषाय ८	शीघ्रक्षपकाणां (पंचसं० मतेन देशोनपू० को० संयमितानां क्षपकाणां) यथाप्र० करणान्ते (विध्यातेन)
संज्व० ३-पुंवेदानाम्	क्षपकाणां स्वस्वबन्धान्तसमये चरमप्रक्षेपे (सर्वसं०)
अरति-शोकयोः	असाताज० प्र० संक्रामकवत्
सुर २-नरक २-वै० ७ कानाम् (११)	पंचेंद्रियत्वे सादिह्रस्वबन्धं कृत्वा उ० स्थि० नारकत्वं प्राप्य पं० तिर्यक्षु उत्पद्यैकेन्द्रियत्वं प्राप्तानां चिरोद्वलनयोपान्त्यखंडान्तिमसमये परप्रक्षेपे.
मनु० २-उच्चैर्गोत्रयोः	पूर्वोक्त (सुरद्विकविधिना) विधिना अग्निवायुमध्ये प्राप्तानां (नवरं सू० एकें० भवे बद्धं इति आदौ वक्तव्यं)
आहा० ७ कस्य	ह्रस्वकालं बध्वा अविरतिं प्राप्तानां चिरोद्वलनयोपान्त्यखंडस्यान्तिमसमये परप्रक्षेपे
तिर्यग् २-उद्योतयोः	१६३ सा० ४ पल्यं यावदबध्वा क्षपितकर्मांशः यथा प्र० करणान्ते
कुजाति ४-स्था०-आत०-सू०-साधा० नाम् अपर्याप्तानां च (९)	१८५ सा० ४ पल्यं ,, ,, ,, ,,
पंचें०-वज्रर्ष०-समच०-तै० ७-सुखगति सुवर्णादि ११-अगु०-परा०-उच्छ्वा०-निर्मा०-त्रस १० (३६)	क्षपितकर्मांशानां क्षपकाणां ८ मे प्रथमावलिकान्ते (पंचसं० मतेन वज्रर्षभस्य स्वबन्धान्ते)
कुसंहननसंस्थान १०-कुखगति-दुर्भग-दुःस्वर-अनादेय-नपुं०-नीचैः (१६)	स्त्रीवेदतुल्यं वाच्यं (नवरं त्रिपल्यायुर्नृगताावुत्पद्यान्तर्मु० शेषे प्राप्तसम्यक्त्वः, शेषं स्त्रीसमं)
औदा० ७ कस्य	सर्वजघन्यौदा० ७ प्रदेशसत्ताकः त्रिपल्यायुर्नरतिर्यक्त्वं प्राप्यायुरन्तसमये विध्यातेन संक्रामकः
जिननाम्नः	प्रथमसमयबद्धदलिकं यथाप्र० संक्रमेण संक्रामकः

संक्रमकरणं समाप्तम् ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अथोद्वर्त्तना–पवर्त्तने ॥

उक्तं संक्रमकरणम्। संक्रमकरणविशेष एवोद्वर्त्तनापवर्तनकरणे। ते च स्थित्यनुभागविषये भवतः। तत्रापि स्थितौ सत्यामनुभागसंभवेन प्रथमतः स्थितेरुद्वर्त्तनापवर्त्तने वक्तव्ये। तत्र चादौ स्थितेरुद्वर्तना लिख्यते–उदयावलिकायाः सकलकरणासाध्यत्वेन तद्बाह्यानां स्थितीनामुद्वर्तना भवति। ननूदयावलिकाबाह्यानां सर्वासां न्यूनानां वा स्थितीनामुद्वर्तना भवतीति चेत्? उच्यते–उत्कृष्टस्थितिबन्धे बन्धावलिकामतीत्थापनावलिकामुत्कृष्टामबाधां चोत्कृष्टस्थित्यग्रस्थामसंख्येयभागाधिकामावलिकां च मुक्त्वोद्वर्तना भवति, यतो बन्धावलिकायामतिक्रान्तायां दलिकं करणगोचरीभवति, उदयावलिकारूपा जघन्यातीत्थापना तु सकलकरणासाध्या, अबाधान्तर्गतं च दलिकं ततो गृहीत्वाऽबाधाया उपरितनीषु स्थितिषु न निक्षिप्यते, जघन्यनिक्षेपविषयकस्थितिस्थानगतं तदधोवर्त्यतीत्थापनावलिकागतं च दलिकं नोद्वर्त्यते, तदुक्तं पञ्चसंग्रहे–"उक्कोसगठिइबन्धे बन्धावलिया अबाहामेत्तं च। निक्खेवं च जहन्नं मोत्तुं उव्वट्टए सेसगं ॥१॥" इति। नन्वबाधान्तर्गतं कथमयोग्यमिति चेत्? उच्यते–बध्यमानप्रकृतेर्यावत्यबाधा तया तुल्या वा हीना वा पूर्वबद्धप्रकृतीनां या स्थितिः सा नोद्वर्त्यते, सोत्पाद्य ततः स्थानादूर्ध्वं बध्यमानप्रकृतेरबाधान्तःप्रविष्टत्वेनाबाधाया उपरि न निक्षिप्यते, मध्ये तु निक्षेपो भवत्येव। याऽबाधाया उपरितनी सा तूद्वर्त्यते। उत्कृष्टाबाधारूपोत्कृष्टातीत्थापनोदयावलिकारूपा तु जघन्या, शेषा तु मध्यमाऽतीत्थापना भवति। तथाहि–यैवोत्कृष्टाऽबाधा सैवोत्कृष्टाऽतीत्थापना, समयोनोत्कृष्टाऽबाधा समयोनोत्कृष्टाऽतीत्थापना, द्विसमयोनोत्कृष्टाऽबाधा द्विसमयोनोत्कृष्टातीत्थापना एवं समयहान्या समयहान्या अतीत्थापना तावद्वक्तव्या यावजघन्याऽबाधाऽन्तर्मुहूर्त्तप्रमाणा। ततोऽपि जघन्याऽतीत्थापनोदयावलिकारूपा वाच्या, तदुक्तं पञ्चसंग्रहे–"उदयावलिवज्झाणं ठिईण उव्वट्टणा उ ठिइविसया। उक्कोस अबाहाओ जावावलि होइ अइत्थवणा ॥१॥" इति। ननु "आबंधा उक्कड्ढइ" इति वचनप्रामाण्यात् यदा तदा बन्धे सत्येवोद्वर्तनाप्रवृत्तेरुदयावलिकागताः स्थितयोऽप्यबाधान्तर्गतत्वेन नोद्वर्त्तिष्यन्त एव, किं पृथगुदयावलिकायाः प्रतिषेधेनेति चेत्? न, अभिप्रायापरिवेदनात्, तथाहि–अबाधान्तर्गतानां स्थितीनां वक्ष्यमाणक्रमेणोद्वर्तनानिक्षेपौ प्रवर्तमानौ न विरुध्येते, तत उदयावलिकान्तर्गता अपि स्थितयः उद्वर्तनां प्राप्नुवन्तीति निषिद्ध्यन्ते।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ननूद्वर्त्यमानं दलिकं क्व प्रक्षिप्यत इति चेत्? उच्यते-ईप्सितस्थितिस्थानात् यत् स्थितिस्थानमुद्वर्त्यते तत ऊर्ध्वमावलिकामतिक्रम्योद्वर्त्यमानदलिकमुपरितनेषु सर्वेषु स्थितिस्थानेषु निक्षिप्यते । तदुक्तं पञ्चसंग्रहे-"इच्छियठिइठाणाओ आवलियं वज्जिऊण तद्दलियं । सव्वेसु वि निक्खिप्पइ ठिइठाणेसु उवरिमेसु ॥१॥" इति ।

ननु को निक्षेपविधिरिति चेत्? उच्यते-अवाधाया उपरि यत् स्थितिस्थानमुद्वर्त्यते तत ऊर्ध्वमतीत्थापनारूपामावलिकामतिक्रम्य तत्स्थितिस्थानगतदलिकमुपरितनेषु सर्वेषु स्थितिस्थानेषु निक्षिप्यते एष निक्षेपविधिः ।

अथ जघन्यनिक्षेपविषयाण्युत्कृष्टनिक्षेपविषयाणि च स्थितिस्थानान्युच्यन्ते-उत्कृष्टस्थित्यग्रादधोऽसंख्येयभागाधिकां सावलिकामवतीर्य ततो यदधस्तनं स्थितिस्थानं तत्सत्कं दलिकमतीत्थापनावलिकामतिक्रम्योपरितनेष्वावलिकाऽसंख्येयभागपरिमितेषु स्थितिस्थानेषु निक्षिप्यते, तथास्वाभाव्यात्, नावलिकाया मध्येऽपि, एतानि स्थितिस्थानानि जघन्यनिक्षेपविषयाणि भवन्ति । ननु स्थित्यनुभागयोरेवोद्वर्त्तना न प्रकृतिदलिकयोः, कथमुच्यते दलिकोद्वर्तनमिति चेत्? अत्रोच्यते-लघुस्थितियुक्तानां दलिकानां यत् बृहत्तरस्थितौ प्रक्षेपणं सा स्थित्युद्वर्तनैव न दलिकोद्वर्तनेति । सर्वोपरितनीष्वसंख्येयभागाधिकास्वावलिकासूद्वर्तनं न भवतीत्यपि प्रागुक्तं सिद्धम् । यदा तूत्कृष्टस्थित्यग्रादधः समयाधिकासंख्येयभागं सावलिकमवतीर्य ततो यदधस्तनं स्थितिस्थानं तत्सत्कं दलिकमतीत्थापनावलिकामतिक्रम्योपरितनेषु समयाधिकेष्वावलिकासंख्येयभागपरिमितेषु स्थितिस्थानेषु निक्षिप्यते तदा निक्षेपविषयाणि स्थितिस्थानान्यपि समयाधिकावलिकासंख्येयभागप्रमाणानि भवन्ति । एवं समयवृद्ध्या समयवृद्ध्या तावत् निक्षेपविषयाणि स्थितिस्थानानि वर्द्धन्ते यावत् समयोत्तरावलिकया साबाधया हीनान्युत्कृष्टकर्मस्थितिस्थानप्रमाणानि भवन्ति । तथाहि-अवाधाया उपरिस्थस्थितीनामुद्वर्तना भवति, यदा चाबाधाया उपरितनी प्रथमा सत्कर्मस्थितिरुद्वर्त्यते तदा तत्सत्कं दलिकं बध्यमानप्रकृतेरबाधाया उपरि प्रथमस्थितिस्थानान्तरमतीत्थापनावलिकामतिक्रम्योपरितनेषु सर्वेषु स्थितिस्थानेषु निक्षिप्यते इति समयाधिकावलिकाबाधावर्जानि शेषाणि सर्वाणि स्थितिस्थानान्युत्कृष्टनिक्षेपविषयाणि भवन्ति । तदेवमबाधाया उपरितनं स्थानमाश्रित्योत्कृष्टो निक्षेपः सर्वोपरितनं स्थानमाश्रित्य च जघन्यो निक्षेपः, तदुक्तं पञ्चसंग्रहे-"अबाहोवरि ठाणगदलं पडुच्चेह परमनिक्खेवो । चरिमुवट्टणं ठाणं पडुच्च इह जायइ जहन्नो ॥५॥" इति । एषो निर्व्याघाते विधिः ॥ स्थापना-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

॥ निर्व्याघातोद्वर्त्तनाविधेश्चित्रम् ॥



* अनुद्वर्तनीयाऽपि अबाधासत्का अबाधायामेव उद्वर्त्यन्ते नाबाधोपरितनासु इति उद्वर्तनव्यपदेशानर्हाऽबाधा ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

व्याघातभाविन्या उद्वर्त्तनाया अयं विधिः—व्याघातो नाम प्राक्तनस्थितिसत्कर्मापेक्षया समयादिनाऽभ्यधिकोऽभिनवस्थितिबन्धः सोऽत्र व्याघातः । प्राक्तनस्थितिसत्कर्मापेक्षया द्वाभ्यां भागाभ्यामभ्यधिकोऽभिनवस्थितिबन्धो न भवति यावत् तावन्निर्व्याघातभाव्येवोद्वर्त्तना प्रवर्त्तते । तत्रापि समयादिनाभ्यधिकेऽभिनवस्थितिबन्धे प्राक्तनकर्मणश्चरमा वा द्विचरमा वा स्थितिर्नोद्वर्त्त्यते । एवं समयद्वयेन समयत्रयेण यावदावलिकाया असंख्येयतमेनापि भागेनाभ्यधिकेऽभिनवकर्मबन्धे द्रष्टव्यम् ।

॥ यावत् भागद्वयाधिको बन्धो न तावदुद्वर्त्तनाविधिः ॥

[व्याघातोद्वर्त्तनायाम्]



यदा तु प्राक्तनस्थित्यपेक्षया द्वाभ्यामावलिकाऽसंख्येयभागाभ्यामभ्यधिकोऽभिनवस्थितिबन्धो जायते तदा प्राक्तनसत्कर्मणोऽन्त्यस्थितिरुद्वर्त्त्यते, उद्वर्त्त्य चावलिकाया आद्यमतीत्थापनारूपमसंख्येयभागमतिक्रम्य द्वितीयेऽसंख्येयतमे भागे निक्षिप्यते । एतावन्तावतीत्थापनानिक्षेपौ जघन्यौ । अत्र स्थापना—

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri



यदा तु समयाधिकाभ्यां द्वाभ्यामावलिकासंख्येयतमाभ्यां भागाभ्यामभ्यधिकोऽभिनवस्थितिबन्धस्तदावलिकायाः प्रथममसंख्येयतमं भागं समयाधिकमतिक्रम्य द्वितीयेऽसंख्येयतमे भागे निक्षिप्यते। अत्र स्थापना-



एवमभिनवकर्मबन्धस्य समयादिवृद्धावतीत्थापना वर्द्धते, सा च तावद्यावदावलिका परिपूर्णा भवति। निक्षेपस्तु सर्वत्र तावन्मात्र एव भवति। अत्रापि स्थापना-



तत ऊर्ध्वं पुनरपि नवकर्मबन्धवृद्धौ निक्षेप एव केवलो वर्द्धते, नातीत्थापना।

तदुक्तं पञ्चसंग्रहे-"निव्वाघाए एवं वाघाओ संतकम्महिगबन्धो। आवलिअसंखभागो जावावलि

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तस्स अइत्थवणा ॥१॥ आवलिदोऽसंखंसो जइ वड्ढइ अहिणवो उ ठितिवन्धो । उव्वट्टति नो चरिमा एवं जावलि अइत्थवणा ॥२॥ अइत्थावणालियाए पुण्णाए वड्ढई तु निक्खेवो" इति अत्र स्थापना-बद्धलता—



वध्यमानसमयाधिकावलिकासंख्येयभागाधिकावलिकाबन्धः।   अतीत्थापना संवावलिकामात्रा। समयाधिक०ज०नि०

अत्राल्पवहुत्वमुच्यते—सर्वस्तोकौ जघन्यातीत्थापनानिक्षेपौ, परस्परं तुल्यौ, यतो द्वावप्यावलिकासंख्येयभागमात्रौ । ततोऽप्युत्कृष्टातीत्थापनाऽसंख्येयगुणा, यतः सोत्कृष्टाबाधा । ततोऽप्युत्कृष्टो निक्षेपोऽसंख्येयगुणः, यतः समयाधिकावलिकया साबाधया न्यून उत्कृष्टस्थितिप्रमाणः, ततोऽपि सर्वा स्थितिर्विशेषाधिका । उक्ता स्थित्युद्वर्त्तना ॥

अथ स्थितेरपवर्त्तनोच्यते—तत्राप्यादौ निर्व्याघातभाविन्यमिधीयते—उदयावलिकबाह्यानि स्थितिस्थानान्यपवर्तयन्ति, नोदयावलिकान्तर्गतान्यपि, उदयावलिकायाः सकलकरणासाध्यत्वात् । अपवर्तयन् तद्दलिकं समयाधिके उदयावलिकात्रिभागे प्रक्षिपति, इदमुक्तं भवति—उदयावलिकाया उपरितनी या समयमात्रा स्थितिः तस्या दलिकमपवर्तयन्नुदयावलिकायाः उपरितनौ द्वौ त्रिभागौ समयोनावतिक्रम्याधस्तने समयाधिके उदयावलिकात्रिभागे प्रक्षिपति । एष जघन्यनिक्षेपो जघन्यातीत्थापना च । उदयावलिकाया उपरितनी द्वितीयास्थितिः यदाऽपवर्त्यते तदाऽतीत्थापना द्विसमयाधिकावलिका त्रिभागप्रमाणा भवति। निक्षेपस्तावन्मात्र एव । यदा तु तृतीयास्थितिरपवर्त्यते तदाऽतीत्थापना त्रिसमयाधिकावलिकात्रिभागप्रमाणा, निक्षेपस्तु तावन्मात्र एव । एवमतीत्थापना प्रतिसमयं तावद्वृद्धिं नेतव्या यावदावलिका परिपूर्णा भवति । यावच्चातीत्थापनावलिका परिपूर्णा न भवति तावन्निक्षेपः समयाधिके आवलिकातृतीयभागे एव भवति नान्यत्र । अतीत्थापनावलिकापरिपूर्णायां तु निक्षेप एव केवलो वर्द्धते, नातीत्थापना । निक्षेपोऽपि तावद्वर्द्धते यावदतीत्थापनावलिकाबन्धावलिकारहिताऽपवर्त्यमानसमयरहिता च सकलाऽपि कर्मस्थितिः, यतो बन्धावलिकायामतीतायां सत्यां कर्मापवर्त्तयितुमारभ्यते, उदयावलिका सकलकरणासाध्येति कृत्वा तद्वर्जनम् , अपवर्त्यमानसमयवर्जनं तु तत्त्वादेवेति । अपवर्त्यमानस्थितिविशेषास्तु बन्धावलिकोदयावलिकारहिता सर्वा कर्मस्थितिः ।

उत्कृष्टनिक्षेपस्तु यदा सर्वान्तिमं स्थितिस्थानमपवर्त्यते तदा भवति, तद्दलिकं तत्स्थानादध आवलिकामात्रमवतीर्याधस्तनेषु सर्वेषु स्थितिस्थानेषु निक्षिपति, अतः सर्वोपरितनं स्थितिस्था-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

नमाश्रित्योत्कृष्टनिक्षेप उक्तः। उदयावलिकाया उपरितनं समयमात्रं स्थितिस्थानमपवर्त्यमानमाश्रित्य जघन्यनिक्षेपः। तदुक्तं पञ्चसंग्रहे—"उदयावलिउवरित्थं ठाणं अहिकिच होइ अइहीणो। निक्खेवो सव्वोवरिठिइठाणवसा भवे परमो॥१॥" इति। एष निर्व्याघातेऽपवर्तनाविधिः। यन्त्रकम्—

॥ निर्व्याघातापवर्त्तनायाश्चित्रम् ॥



अथ व्याघातभाविन्यपवर्त्तनोच्यते—व्याघातो नाम स्थितिघातः, तदुक्तं पञ्चसंग्रहे—"ठिइघाओ एत्थ होइ वाघाओ", तस्मिन् क्रियमाणे सति समयोनं कण्डकमात्रमुत्कृष्टातीत्थापना। ननु कथं समयोनं कण्डकमुत्कृष्टातीत्थापनेति चेत्? उच्यते—सर्वोपरितनेन समयमात्रेण स्थितिस्थानेनापवर्त्यमानेन सहाधस्तात् कण्डकमतिक्रम्यते, ततस्तेन विना समयोनं कण्डकं भवति। तच्च कण्डकं द्विविधम्, जघन्यमुत्कृष्टं च। तत्र किञ्चिदूनडायस्थितिप्रमाणमुत्कृष्टं कण्डकं भवति। तदुक्तं कर्मप्रकृतौ—"डायठिइ किंचूणा ठिइ कंडकुस्सगपमाणं" इति। ननु का डायस्थितिरिति चेत्? उच्यते—यस्याः स्थितेरारभ्य तस्या एव प्रकृतेरुत्कृष्टस्थितिबन्ध उत्प्लुत्य विधीयते ततः प्रभृति सर्वापि स्थितिः डायस्थितिरिति। सा च किञ्चिदूना स्थितिः कण्डकस्योत्कृष्टं प्रमाणं भवति। पञ्चसंग्रहे तु—"उक्कोसं डायठिई किंचूणा कंडगं" मूलवृत्तिः—"यतो यस्याः स्थितेरारभ्योत्कृष्टं स्थितिबन्धं विधत्ते निर्मापयति तस्या आरभ्योपरितनानि सर्वाण्यपि स्थितिस्थानानि डायस्थितिसंज्ञानि भवन्ति। सा चोत्कृष्टतः किञ्चिदूनकर्मस्थितिप्रमाणा भवति, सा चोत्कृष्टं कण्डकमुच्यते" इति। इयमेवोत्कृष्टातीत्थापना, तत उपरि-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तनस्थितिस्थानसत्कं दलमियन्ति स्थितिस्थानान्युल्लङ्घ्याधस्तनासु स्थितिषु निक्षिपति। जघन्यकण्डकं तु समयादिहान्या क्षीयमाणं क्षीयमाणं पल्योपमासंख्येयभागमात्रं जघन्य-कण्डकं भवति। व्याघाते इयं जघन्याऽतीत्थापना, तामुल्लङ्घ्य स्थितिघातकाले उपरितन-स्थितिदलं निक्षिपति। अत्र स्थापना—

॥ व्याघातभाव्यपवर्त्तनाचित्रम् ॥



अत्राल्पबहुत्वमुच्यते—अपवर्त्तनायां सर्वस्तोको जघन्यो निक्षेपः, समयाधिकावलिका-त्रिभागमात्रत्वात्। ततोऽपि जघन्याऽतीत्थापना त्रिसमयोना द्विगुणा। ननु त्रिसमयोनं द्विगुणत्वं कथं भवतीति, चेत्? उच्यते, व्याघातमन्तरेण जघन्यातीत्थापना आवलिका-त्रिभागद्वयं समयोनं भवति, आवलिकाऽसत्कल्पनया नवसमयात्मिका कल्प्यते, समयोनं त्रिभागद्वयं पञ्चसमयप्रमाणमवगन्तव्यम्, निक्षेपोऽपि जघन्यः समयाधिकावलिकात्रिभा-गप्रमाणोऽनयाऽसत्कल्पनया चतुःसमयप्रमाणो द्विगुणीकृतः त्रिसमयोनः सन् एतावा-नेव भवतीति। ततोऽपि व्याघातं विनोत्कृष्टातीत्थापना विशेषाधिका तस्याः परिपूर्णाव-लिकामात्रत्वात्। ततोऽपि व्याघाते उत्कृष्टाऽतीत्थापनाऽसंख्येयगुणा, तस्याः किञ्चिदूनडा-यस्थितिप्रमाणत्वात्। ततोऽप्युत्कृष्टो निक्षेपो विशेषाधिकः, तस्य समयाधिकावलिकाद्वि-कोनसकलकर्मस्थितिप्रमाणत्वात्। ततः सर्वा कर्मस्थितिः विशेषाधिका।

अथोद्वर्त्तनापवर्त्तनयोः संयोगेनाल्पबहुत्वमुच्यते—तत्रोद्वर्तनायां व्याघाते जघन्याती-त्थापनानिक्षेपौ सर्वस्तोकौ स्वस्थाने परस्परं तुल्यौ आवलिकाया असंख्येयभागमात्रत्वात्।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ततोऽप्यपवर्तनायां जघन्यो निक्षेपोऽसंख्येयगुणः, तस्य समयाधिकावलिकायाः त्रिभागमात्रत्वात् । ततोऽप्यपवर्तनायामेव जघन्याऽतीत्थापना त्रिसमयोना द्विगुणा, भावना प्राकृतैव । ततोऽप्यपवर्तनायामेव व्याघाताभावभाविन्युत्कृष्टाऽतीत्थापना विशेषाधिका, तस्याः परिपूर्णावलिकामात्रत्वात् । तत उद्वर्तनायामुत्कृष्टाऽतीत्थापना संख्येयगुणा, तस्या उत्कृष्टाबाधारूपत्वात् । ततो व्याघातेऽपवर्तनायामुत्कृष्टाऽतीत्थापनाऽसंख्येयगुणा, तस्या किञ्चिदूनडायस्थितिप्रमाणत्वात् । तत उद्वर्तनायामुत्कृष्टो निक्षेपो विशेषाधिकः, ततोऽप्यपवर्तनायामुत्कृष्टो निक्षेपो विशेषाधिकः। ततोऽपि सर्वा स्थितिर्विशेषाधिका। उक्ता स्थित्यपवर्तना ॥

अथानुभागोद्वर्त्तना लिख्यते—चरमं स्पर्द्धकं नोद्वर्त्यते, नापि द्विचरमादीनि यावच्चरमात् स्पर्द्धकादधोऽनन्तानि स्पर्द्धकानि, इदमुक्तं भवति—य आवलिकाया असंख्येयभागः सर्वोपरितनो जघन्यो निक्षेपः या च तस्याधः आवलिकामात्राऽतीत्थापना तत्स्थितिस्थानगतानि सर्वाणि स्पर्द्धकानि नोद्वर्त्यन्ते किन्तु तेभ्योऽधस्तादवतीर्य यानि स्पर्द्धकानि समयमात्रस्थितिगतानि लभ्यन्ते तान्युद्वर्तयति । तानि चोद्वर्त्यावलिकामात्रस्थितिगतान्यनन्तानि स्पर्द्धकान्यतिक्रम्योपरितनेष्वेवावलिकासत्कासंख्येयभागमात्रगतेषु स्पर्द्धकेषु निक्षिपति, ततोऽधोऽवतीर्य यदा द्वितीयसमयमात्रस्थितिगतानि स्पर्द्धकान्युद्वर्तयति तदाऽऽवलिकामात्रस्थितिगतानि स्पर्द्धकान्यतिक्रम्योपरितनेषु समयाधिकावलिकासत्कासंख्येयभागमात्रगतेषु स्पर्द्धकेषु निक्षिपति । एवं यथा यथाऽधोऽवतरति तथा तथा निक्षेपो वर्धते, अतीत्थापना तु सर्वत्राप्यावलिकामात्रस्थितिगतानि स्पर्द्धकानि भवन्ति । कियान् पुनरुत्कृष्टो निक्षेपविषय इति चेत्? उच्यते—बन्धावलिकायामतीतायां समयाधिकावलिकामात्रगतानि स्पर्द्धकान्यबाधागतानि च व्यतिरिच्य शेषाणि सर्वाण्यपि निक्षेपविषयः, तथा हि—अबाधागतानि स्पर्द्धकानि नोद्वर्त्यन्ते, उद्वर्त्यमानानि समयमात्रस्थितिगतानि स्पर्द्धकानि न तत्रैव निक्षिपति, आवलिकामात्रगतानि त्वतीत्थापना, ततो बन्धावलिकायामतीतायां समयाधिकावलिकामात्रगतानि व्यतिरिच्य शेषाणि स्पर्द्धकान्युत्कृष्टनिक्षेपविषयः । अत्राल्पबहुत्वमुच्यते—सर्वस्तोको जघन्यो निक्षेपः, तस्यावलिकाऽसंख्येयभागगतस्पर्द्धकप्रमाणत्वात् । ततोऽतीत्थापना अनन्तगुणा, तेभ्य आवलिकामात्रस्थितिगतानां स्पर्द्धकानामनन्तगुणत्वात् । तत उत्कृष्टो निक्षेपोऽनन्तगुणः, ततोऽपि सर्वोऽनुभागो विशेषाधिकः, इत्युक्ताऽनुभागोद्वर्त्तना ॥

अथानुभागापवर्त्तनोच्यते—सा चोदयसमयादारभ्य स्थित्यपवर्त्तनावज्ज्ञेया । तद्यथा—प्रथमं स्पर्द्धकं नापवर्त्यते, नापि द्वितीयं, नापि तृतीयमेवं तावद्वक्तव्यं यावदुदयावलिकास्थितिगतानि स्पर्द्धकान्यनपवर्तनीयानि भवन्ति । तेभ्य उपरितनानि तु स्पर्द्धकान्यपवर्त्यन्ते, तत्र यदोदयावलिकाया उपरि समयमात्रस्थितिगतानि स्पर्द्धकान्यपवर्त्तयति तदा समयोनावलिकात्रिभागद्वयगतानि स्पर्द्धकान्यतिक्रम्याधस्तनेष्वावलिकासत्कसमयाधिकावलिकात्रिभागगतेषु स्पर्द्धकेषु प्रक्षिपति । यदा तूदयावलिकाया उपरि द्वितीयसमयमात्रस्थितिगतानि स्पर्द्धकान्यपवर्त्यन्ते तदा प्रागुक्तातीत्थापना समयमात्रस्थितिगतैः स्पर्द्धकैरधिका भवति, निक्षे-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

परस्तु तावानेव । एवं समयवृद्ध्याऽतीत्थापना तावद्वर्धनीया यावदावलिका परिपूर्णा भवति । ततः परमतीत्थापना सर्वत्रापि तावन्मात्रैव, निक्षेपस्तु वर्धते । एवं निर्व्याघाते द्रष्टव्यम् । व्याघाते त्वनुभागकण्डकं समयमात्रस्थितिगतस्पर्द्धकन्यूनमतीत्थापना द्रष्टव्या ।

अत्राल्पबहुत्वम्–सर्वस्तोको जघन्यो निक्षेपः, ततो जघन्याऽतीत्थापना अनन्तगुणा, ततो व्याघातेऽतीत्थापना अनन्तगुणा, ततोऽप्युत्कृष्टमनुभागकण्डकं विशेषाधिकं, समयगतैः स्पर्द्धकैरतीत्थापनातोऽधिकत्वात्, तत उत्कृष्टो निक्षेपो विशेषाधिकः, ततोऽपि सर्वोऽनुभागो विशेषाधिकः ।

एकस्यां स्थितौ यानि अनुभागस्पर्द्धकानि तानि क्रमेण स्थाप्यन्ते, तद्यथा–सर्वजघन्यमनुभागस्पर्द्धकमादौ ततो विशेषाधिकरसं द्वितीयं ततोऽपि विशेषाधिकरसं तृतीयमेवं सर्वोत्कृष्टं रसमन्ते । प्रथमस्पर्द्धकादारभ्योत्तरोत्तररसस्पर्द्धकानि प्रदेशापेक्षया विशेषहीनानि विशेषहीनानि भवन्ति । अन्तिमस्पर्द्धकादारभ्य पुनः क्रमेण प्रदेशापेक्षया विशेषाधिकानि विशेषाधिकानि भवन्ति । एतेषां मध्ये एकस्मिन् द्विगुणवृद्ध्यन्तरे द्विगुणहान्यन्तरे वा यद्रसस्पर्द्धकपटलं तत्सर्वस्तोकम्, यद्वा बन्धनकरणोक्तस्नेहप्रत्ययस्पर्द्धकस्यानुभागद्विगुणवृद्ध्यन्तरेऽनुभागद्विगुणहान्यन्तरे वा यदनुभागकदम्बकं तत्सर्वस्तोकम्, तत उद्वर्तनापवर्तनयोर्जघन्यो निक्षेपोऽनन्तगुणः स्वस्थाने परस्परतुल्यः, ननूद्वर्त्तनायां जघन्यनिक्षेपे आवलिकाऽसंख्येयभागप्रमाणस्थितिकान्यनुभागस्पर्द्धकानि, अपवर्तनायां तु समयाधिकावलिकात्रिभागगतान्यनुभागस्पर्द्धकानि भवन्तीति कथं स्वस्थाने परस्परं तुल्य इति चेत् ? अत्रोच्यते–प्रथमस्थितिषु स्तोकान्येव स्पर्द्धकानि प्राप्यन्ते, अन्तिमस्थितिषु प्रभूतानि स्पर्द्धकानि भवन्तीति तौल्यं न विरुध्यते । एवमग्रेऽपि कारणं द्रष्टव्यम् । ततो द्वयोरपि निर्व्याघातभाविन्यबाधा अनन्तगुणा, स्वस्थाने परस्परं द्वे अपि तुल्ये, न्यूनाधिकत्वेऽपि तुल्यत्वकारणं प्रागुक्तमेव द्रष्टव्यम्, ततः व्याघातभाविन्यामपवर्तनायामुत्कृष्टातीत्थापनात्वेनोपजायमानं समयन्यूनकण्डकसत्करसस्पर्द्धकपटलमनन्तगुणम्, तत उद्वर्तनापवर्तनयोरुत्कृष्टनिक्षेपो विशेषाधिकः, स्वस्थाने तु द्वावप्युत्कृष्टनिक्षेपौ परस्परं तुल्यौ, ततः पूर्वबद्धोत्कृष्टस्थित्यनुभागसत्कर्मयुतोत्कृष्टानुभागबन्धो विशेषाधिकः, समयाधिकातीत्थापनावलिकागतैः पूर्वबद्धैर्बध्यमानैश्च स्पर्द्धकैरधिकत्वात् ।

उद्वर्त्तना बन्धे सत्येव भवति, अपवर्त्तना तु बन्धेऽबन्धे वा भवति । एष कालनियमः । यद्वा यावन्मात्रः स्थितिबन्धः तावन्मात्रस्य च स्थितिसत्कर्मणः स्थित्यनुभागयोरुद्वर्त्तना प्रवर्त्तते, उपरितनस्य तु सत्कर्मणः स्थित्यनुभागोद्वर्त्तना न भवति । अपवर्त्तना तु सर्वत्र प्रवर्त्तते । किट्टीकृते त्वपवर्त्तनैवैका प्रवर्त्तते । किट्टीकृतवर्जे तूभयं प्रवर्त्तते । एष सर्वोऽपि विषयनियमः । तदेवमुक्ते उद्वर्त्तनापवर्त्तने ॥

॥ समाप्तोऽयं सोद्वर्त्तनापवर्त्तनः संक्रमकरणप्रख्यो ग्रन्थः ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

॥ अथ प्रशस्तिः ॥

(स्रग्धरा)

प्रेमापाराम्बुराशेः स्मरजलधिशुचेः कोपयादःप्रवृत्ते-
मायावर्त्तप्रचण्डाद्विकृतिखरसरित्संगमान्मानवातात् ।
दूरेत्यो द्वेषवीचेः पृथुभवजलधेर्लोभपाषाणपूर्णात्,
दद्यात्सिद्धिं वृषाङ्को जिनवृषवृषभः सम्यगक्षिप्रसाध्याम् ॥ १ ॥

(शिखरिणी)

जगत्पुण्यद्बाह्यान्तररिपुकुलारण्यदहनो
वरेण्यार्हच्चक्रिप्रवरपदसंकेतसदनः ।
स्वकायार्चिःस्तोमापहसिततसमुत्तप्तकनकः,
स शान्तिर्मे शान्त्यै स्फुरतु सततं स्वान्तसदने ॥ २ ॥

(मालिनी)

नतिततिपरकंसारातिसच्चारुचूडा-
मणिरुचिरमरीचिस्तोमरक्तांघ्रिपीठः ।
नवघनरुचिनेमिर्भक्तिनेमित्रिलोको
दिशतु मधुपभावं मां स्वपादारविन्दे ॥ ३ ॥

(पृथ्वी)

मरुद्घटसुरद्रुमत्रिदशधेनुचिन्तामणि-
प्रभावपरजित्वरक्रमसरोजसेवाफलः ।
कुपूयकमठस्मयक्षितिधरेन्द्रसारस्वरुः,
पिपर्तु भवतां विभुः स रुचितानि पार्श्वप्रभुः ॥ ४ ॥

(स्रग्धरा)

त्रैलोक्याजेयमोहावनिपतिपरमोद्यद्यशोरोहिणीश-
ग्रासस्वश्चित्रभानुर्भवगहनवने कर्मवल्लौ सुसार्थः ।
कायव्योमस्थलोलेन्द्रियविहगगणानन्यपाशप्रभः स
पारं संसारवासाद्वितरतु विततात्वर्धमानो जिनेन्द्रः ॥ ५ ॥

(मन्दाक्रान्ता)

श्रीमन्तस्ते गणधरवरा गौतमादिप्रमुख्या
यस्मात्तीर्थं प्रसृतिमगमन्नाथनाथः सुधर्मा ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तस्मात्कम्रश्चरमशिवगः स्वामिजम्बूप्रबर्हो
धौरेयाग्र्याः प्रभवविभवः पूज्यशय्यंभवाद्याः ॥ ६ ॥
विख्यातास्ते हरिनतपदाः श्रीयशोभद्रसेव्याः
श्रीमत्संभूतिविजयवरा नायको भद्रबाहुः ।
सद्ब्रह्माष्टापदकषदृषत्स्थूलभद्रप्रभुर्यः,
सर्वे स्युर्मे मुदितमनसः श्रीसुहस्तिसरूपाः ॥ ७ ॥ युग्मम् ।

(शिखरिणी)

करोमीदं सर्वं जिनपसमयं संस्कृतगिरि,
गृहीत्वेत्थंभावाद्रुचिरहृदि पारांचिकमिदम् ।
परं प्रायश्चित्तं वरसरलतापाठददतो
दिवाकृद्देवा नो ददतु कुशलं दुश्चरचरम् ॥ ८ ॥

(मालिनी)

नृपसुषमसभायां मातृमोहं विहाय,
हृदि सुभरितभक्त्या धर्मकेतुं गृहीत्वा ।
नभसि जिनवराज्ञावैजयन्तीविनेतु-
र्जयतु जगति वज्रस्वामिनो कीर्तिमूर्तिः ॥ ९ ॥

(इन्द्रवज्रा)

संदर्भसंदोहकिरीटकल्पः कर्मप्रबोधार्णवकेन्द्रतुल्यः ।
नैपुण्यनिष्कर्षनितान्तकारी गुम्फो नु कर्मप्रकृतिः सुनाम्ना ॥ १० ॥
योऽग्रायणीयाभिधपूर्वमध्यादुद्धृत्य किञ्चिद्रचयांचकार ।
संसारजन्तूपकृतिप्रसक्तः पायात्स पाताच्छिवशर्मसूरिः ॥११॥ युग्मम् ।

(शार्दूल०)

साहित्यार्णवकर्णधारकुशला निर्वेदलीलाजुषो
निःश्रेयोनियमप्रकाशपदवीसद्वर्त्मनिर्दर्शकाः ।
श्रीपञ्चाननदसंनिभगिरः कर्मेभवित्रासने
वः श्रीचन्द्रमहत्तरर्षिपतयो यच्छन्तु शश्वच्छ्रियम् ॥ १२ ॥

(हरिणी)

युगगणिवरः श्रीदेवर्द्धिक्षमाश्रमणः स्मृति-
पथवहिरयन्दृष्ट्वा सार्वागमं वलभीपुरे ।
अमुमुदधरद्ग्रन्थारूढं विधाय कृपादृशा,
स भवतु विभुः शश्वद्भूत्यै मुमुक्षुगवांभरैः ॥ १३ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

(शिखरिणी)

न चार्वाकः सह्याक्-न तु कणभुजो बुद्धिबलिनो
न कानीनः काम्यो न कविसुमतं जैमिनिमतम् ।
न सांख्यः संख्यार्हो नयनरुचिरो नाक्षिचरणः,
समिद्धे सत्तर्कैर्लसति हरिभद्रस्य समये ॥ १४ ॥

(अनुष्टुप्)

विश्वे सार्धत्रयकोटी-ग्रन्थसंचयनिर्मितेः ।
सर्वसाहित्यस्वर्वापी-शिलोच्चयेशसंनिभाः ॥ १५ ॥
निर्वृतिनगरीपान्थान्, नयन्तु नेयपद्धतिम् ।
ते कलिकालसर्वज्ञाः, श्रीहेमचन्द्रसूरयः ॥ १६ ॥ युग्मम् ।

(वसंततिलका)

निर्जित्य सच्चतुरशीतिविवादिवृन्द-
मभ्यागतः कुमुदचन्द्रदिगम्बरेन्द्रः ।
श्रीसिद्धभूमिपतिसंसदि पत्तनेऽस्मिन्
येनार्दितोऽवतु स वादिपदेवसूरिः ॥ १७ ॥

(इन्द्रवंशा)

सन्स्वान्तदुर्गम्यतपोऽरुणातपाद्दूरीकृतानेकतमोऽन्धकारकः ।
श्रीमत्तपोगच्छपरागपुष्करो वः श्रीजगच्चन्द्रविभुः स बोधये ॥ १८ ॥

(वंशस्थ)

मनोरमानेकसुगुम्फनिर्मितिनिर्बर्हिताजावरसृष्टिदक्षतः ।
वहन् सहस्राभिनवावधानभाः पुनातु सूरिर्मुनिसुन्दरार्यमा ॥ १९ ॥

(शार्दूल०)

तस्मात्पट्टपरम्परापरिगतश्रीदानसूरिप्रभोः,
पट्टाम्भोरुहराजहंससदृशाः श्रीहीरसूरीश्वराः ।
नानासद्गुणराजिभूषितपुरः सत्कीर्त्तिविख्यातिगा
राजन्ते सविता यथा सुरपथेऽर्हच्छासनाभ्राश्रये ॥ २० ॥
म्लेच्छो यैर्विहितो नृपोऽप्यकबरोऽनार्यालयालङ्कृतिः,
शुद्धस्वान्तकृतानुकार्यनियमोऽहिंसापराकृष्टहृद् ।
तीव्रानन्तरसन्निरीहतपसा तेजस्विकायश्रिताः,
कल्याणं कलयन्तु नः कुवलये कारुण्यकम्रालयाः ॥२१॥ युग्मम् ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

(सुवदना)

वाराणस्यां विवादे बुधजनसमितौ तैलङ्गिविदुषः,
संप्राप्ता न्यायवैशारदपदममलं निर्जित्य नितराम् ।
न्यायाचार्यत्वमाप्ताः शतवररचनानिर्माणसमये,
जीयासुस्ते यशोयुग्विजयमुनिवराः श्रीवाचकनृपाः ॥ २२ ॥

(शार्दूल०)

इत्येवं जिनशासनाम्बरवरे सिद्धान्तसाराशया
वैयावृत्यकराश्च केचन पुनर्वादाहवे जित्वराः ।
केचित्ते विनयान्विता गुरुपदे संवेगरंगाञ्चिता
वैराग्यामृतपानपीनहृदया ग्रन्थाम्बुधाराधराः ॥ २३ ॥

केचिद्ध्यानधराग्रिमा वरतपोनिष्ठाश्च केचित्पुन-
र्येऽन्ये शान्तिसरस्स्थिताः समुदियुर्वन्द्याभिवन्द्या मुदा ।
यन्नामस्मरणेन पापनिकरा गच्छन्ति दूरे सदा,
ते सर्वेऽपि भवन्तु नः शिवकरा भद्रंकराः सर्वदा ॥ २४ ॥

(शोभा)

ततो भूयो भूस्पृग्नतपदविजयानन्दसूरीशितारोऽ-
भवन्पृथ्वीपीठे शशिकरयशसः कोविदौघाग्रगण्याः ।
लसद्भाग्योद्भूताः प्रशमपरिमलाः सच्छरण्याः परार्घ्याः,
भवैनोजम्बाले प्रखररविरुचः पुण्यपाथःपयोदाः ॥ २५ ॥

सुनीतो येनानार्यजनजनपदे जैनपञ्चास्यनादो
यदीयः शिष्यौघो विशसति जडवादक्षमाजं समूलम् ।
यशोमूर्तिर्यस्याद्य विकटसमये व्याप्यवृत्तिर्दिगन्तं
पुनातूर्वीभालं विकचसदलिको मान्यमूर्धन्यसूरिः ॥ २६ ॥

(पृथ्वी)

तदीयगतपट्टपूर्वगिरिसान्वनन्यार्यमा,
बभूव विजयाग्रिमः स कमलाह्वसूरीशिता ।
यदीयमुखतेजसा खलु विहाय पृथ्वीं हरि-
र्नभोनिलयमिष्टदं वसति तत्र मत्वैव किम् ॥ २७ ॥

स वीरविभुशासनोन्मिषितनीलक्षेत्रे वरे,
पतत्करकनिह्नवानवितृवेषभृद्भक्षकान् ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

प्रदापयति यस्य दिक्षु शरणं प्रतापातपः,
श्रियेऽस्तु मम सर्वदा कमलसूरितिग्मत्विषः ॥ २८ ॥

(मन्दाक्रान्ता)

सत्साम्राज्ये विजयकमलाचार्यभूपालभर्तु-
रेजुस्तेऽमा विजयचरमाः पाठकप्रेष्ठवीराः ।
येषां चारुप्रखररुचिरप्रौढमूर्तेः समीपे,
घूकायन्ते सुहृदशरिपवः काममुत्सूत्रवाचः ॥ २९ ॥

(हरिणी)

धरणिविसृतां दृष्ट्वा कीर्तिं नु यस्य परां सिताम्,
प्रवररुचिरा चन्द्रजोत्स्ना शुचा धवलायिता ।
अपि सुधवलं भास्वत्तेजो रुषा समभूत्खरम्,
शुचिशुचिशुचिस्तिग्मस्पर्शः पिशङ्ग इताऽभवत् ॥ ३० ॥

(प्रभा)

विजयकमलसूरिसूत्रामपट्टाब्धिजैवातृका
विजयचरमवाचकादित्यवीरक्रमाब्जालिनः ।
जिनसमयविदालया वर्तमाना गणस्वामिनः,
श्रुतिमतिशमदमप्रभास्मारितानेकपूर्वर्षयः ॥ ३१ ॥

विशसितमदने शमस्फाटिके यन्मनोमन्दिरे,
श्रुतविनयदशेन्धने सारसद्भावदौवारिके ।
खलु परिवरितो निरातङ्कनिर्दोषक्रीडां क्षमा-
दिदशदयितया स सद्धर्मभूपः सदा कुर्वते ॥ ३२ ॥

उपकृतिगुणगां तु बुद्ध्वा तपो दुश्चरं तेपिरे,
प्रतिसमयसुभङ्गुरां वार्धके ये तनुं सन्ततम् ।
प्रवचनपरमोन्नतावर्पितानन्तरायुःश्रियो
ददतु विजयदानसूरीश्वरास्तेऽव्ययार्चिःश्रियम् ॥ ३३ ॥ विशेषकम् ।

(शार्दूल०)

साम्राज्ये रमणीयभावरुचिरे श्रीदानसूरिप्रभो-
रश्वेभग्रहचन्द्रसंवति वरे सेव्याग्रसेवावशात् ।
तेषां पद्धरपङ्करुण्मधुलिहा प्रेमाभिधेनर्षिणा
वाङ्मार्गे विजयान्तिमेन निदधे श्रीसंक्रमग्रन्थनम् ॥ ३४ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

(वसन्त०)

संसारदुःखदववह्निकठोरताप-दन्दह्यमानभवजन्तुमनोधरित्र्याम् ।
वैराग्यवारिवरसंगमशब्दजात-पानीयधारजलदागममेघवक्रैः ॥ ३५ ॥
पूज्यप्रवेकविजयाग्रिममेघसूरि-सुत्रामभिः प्रकृतग्रन्थविशोधनादौ ।
संपीडितैरपि निरन्तरमौलिदुःखात् , साहाय्यमत्र करुणैकरसैर्व्यधायि॥३६॥युग्मम् ।

(वसन्त०)

तादृग्विशोधकवरं रचना विनेयं प्राकाश्यपद्धतिपरां न बभूव नूनम् ।
कर्मापरप्रकृतिसर्वककर्मग्रन्थ-पञ्चाग्रसंग्रहवरादिककर्मगुम्फान् ॥ ३७ ॥
तस्मात्पपाठ निकटे मम मे विनेयो जम्बूत्तरत्यविजयोः द्विविभागभाजः ।
अस्याः प्रसिद्धिजनकं विशदं च कार्यं संशोधनादिसकलं निरतो व्यधत्त ॥३८॥ युग्मम् ।

(प्रहर्षिणी)

धीमान्द्यप्रभृतिबहुप्रदोषजाला-
दत्रोत्सूत्रमदवतरेच्चु यद्धि किञ्चित् ।
मिथ्यादुष्कृततरमस्तु मे सदा तच्-
छोध्यं च प्रकृतिवरैः कृपां विधाय ॥ ३९ ॥

(शार्दूल०)

सत्यासत्यसुपोषरोधजनकं काम्यां गुणानां खनिं
श्रेयोऽनन्यनिदानशान्तिधरणिं सन्मंगले मंगलम् ।
देवादेवनरेन्द्रसेवितवरं भव्यात्मभद्रङ्करं
श्रेष्ठश्रीजिनशासनं जयकरं भावान्नमामो वयम् ॥ ४० ॥

(शार्दूल०)

जम्बूद्वीपजलेरुहे सुरगिरिः सत्कर्णिकालङ्कृतिम् ,
यावत्सूर्यनिशाकरौ सुरपथाध्वन्यत्वमाबिभ्रतः ।
यावन्नीरनिधिर्दधाति रसनाभूषां धरित्रीकटौ,
तावन्नन्दतु जैनशासनभुवीदं संक्रमग्रन्थनम् ॥ ४१ ॥

॥ इति श्रीसंक्रमकरणप्रशस्तिः ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

निवेदन.

संवत १९८७ मां श्रीसंक्रमकरणनो प्रथम विभाग प्रसिद्ध कर्या पछी लगभग दोढ वे वर्षना गाळे आ द्वितीय विभाग अमो प्रसिद्ध करवाते भाग्यशाली थई शकीए छीए. आटलो बधो लांबो वखत जवा माटे अमारा जीज्ञासु वाचक महाशयोनी अमारे प्रथमथी क्षमा याची लेवी जोवीए साथे साथे ए पण जणावी देवुं जरूरी छे के कर्मप्रकृतिमांना संक्रमकरण जेवा सूक्ष्मतर विषयने चोतरफथी बहु समर्थ रीतिए स्पर्श करता प्रस्तुत ग्रन्थरत्नना प्रकाशनमां ग्रन्थकार **परमर्षि पूज्य प्रकाण्ड शांतमूर्ति सिद्धांत महोदधि वाचकशीरोमणि श्रीमत् प्रेमविजयगणिप्रवरना** तथा अन्य पूज्य मुनि प्रवरोना विहारादि संयोगो जोतां पण आटलो टाइम लागवो, बेशक, वधारे पडतो गणी नहि शकाय.

आ ग्रन्थ प्रकाशनमां नीचेना श्रद्धालु धर्मप्रेमी सद्गृहस्थो तरफथी आर्थिक सहाय अमने मळी छे तेमनो आ स्थळे अमे आभार मानीए छीएः

२०० शेठ ताराचंद दलीचंद पादरावाला.
१०० ,, छगनलाल कस्तुरचंद खंभातवाला.
१०० ,, नवलचंद खीमचंद झवेरी.
१०० श्री अक्षयनिधि तपमांथी सुरत. हा. झवेरी नवलचंद खीमचंद.
३५० शेठ धारशीभाइ गणपतभाइ. पोताना स्वर्गत चि. भाइ हुकमचंदना पुन्यार्थे.
१०१ शेठ चुनीलाल कमलशीभाइ.
१०१ शेठ कस्तुरभाइ साकलचंद अमदावादवाला.
२५१ शीवगंज, मारवाडना एक सद्गृहस्थ.
२५ शाह मनसुखभाइ बापुभाइ खंभात.
६० ,, चंदुलाल मोतिलाल अमदावाद.
८०–४–० लालबाग, जैन उपाश्रय, सुश्राविकाओ तरफथी. हा. भूरीब्हेन. मुंबई.

भावनगरना **शाह देवचंद खीमचंद,** जेमनी आ ग्रन्थो प्रकट करावावामां अमोने प्रथमथी आखर सुधी पोतानी बीमारीना समये पण खूब चीवट भरेली मुंगी सेवाओ जो न मळी होत तो छपाववानुं काम लगभग मुश्केल थई पडयुं होत, तेमने तो भूलायज केम ?

प्रेसना कार्यकर्ताओ के जेमणे ग्रन्थनुं काम चलाववामां सारी धीरज ने सानुकुलता बतावी छे तेमने एकवार फरीथी धन्यवाद. टुंकाणमां तमाम शुभेच्छको अने सहायकोने पण अमारा कोटीशः धन्यवाद छे.

आ विभागमां एकंदर २०० उपरांत यन्त्रो आवेल छे. तेमज अवान्तर अनेक प्रकारना विषयोनी गुंथणी करेली छे. आ आखाए महान ग्रन्थमां ७५ उपरांत आगमादिक पुस्तकोना संबंधो आपवामां आवेला छे. एम, घणी महेनत दोहन तथा खर्चना फळरूप आ उत्तम ग्रन्थरत्नने दरेक साहित्यप्रेमीओ अने विद्याविलासीओ सहृदयताथी अपनावो, ए अभिलाषापूर्वक अमे अत्रे विरमीए छीए.

ता. १४ एप्रील १९३३. मुंबई.

प्रकाशक. धी. य. मे. जै. सो. प्रमुख.
शांतिदास खेतसीभाई.

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सं. २४

१६८

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

श्री दिगम्बर जैन संघ
जयधवला कार्यालय
काशी

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

जैनं जयति शासनम्

J.R.K.